तर्क·प श्रीगणेशाय नमः। श्रीगुरुभ्यो नमः॥ जयजटोल्लसत्फणिगजसंभूषितमस्तकः॥ पुनातु गिरिजाप्रेमपात्र
२ मेकमनेकधा॥१॥ उपजीव्योपजीवकभावसंगत्या उपमाननिरूपणानन्तरं शब्दनिरूपणं शिष्या
वधानाय प्रतिजानीते। अथेति॥ अत्र ज्ञायमानपदस्य शब्दप्रमाणेति पापदे उपमानोपजीवकत्वाभा
वो [blot]स्फलयोः स्वरूपफलयोश्च संगतिर्बोध्या। तस्याश्च फलनिष्ठत्वेपि स्वाश्रयकरणत्वात्मकपरंपरा
नं५ संबन्धेन करणनिष्ठत्वात्करणयोरपि तदभिधानवियामकत्वमवधेयं॥ तथाहि॥ शक्तिपरिच्छित्तिरेवो
पमितिस्तस्याश्च सर्वस्यापव शाब्दबोधजनकत्वेन फलयोरुपजीव्योपजीवकत्वसंभवः॥ एवं स्वरूप प
लयोरपि अतिदेशवाक्यार्थज्ञानरूपोपमानप्रमाणस्योपमितिद्वारा शाब्दबोधोपजीव्यत्वादिति
॥ केचित्तु॥ ज्ञायमानं पदं करणमित्यस्य शक्तत्वेन ज्ञायमानमित्यर्थात्सविशेषणे हि विधिनिषे
धौ विशेषणमुपसंक्रामतः सति विशेष्यबाध इति न्यायेन स्वर्गीश्वस्तु इति वत् विशेषणीभूतश
क्तिज्ञानमादायोपमानोपजीवकत्वसंभवेन स्वरूपत उपजीवकत्वमपि संगतिरित्याहुः॥ परं ज्ञा राम
नस्य शब्दप्रमायां लोकिकत्वेन वा नमतं तु उपमितेः शक्तिपदविषयकत्वेनातिदेशवाक्यार्थज्ञा १

नात्मकोपमानप्रमाणस्योपमित्यात्मकशाब्दप्रमाणोपजीव्यत्वेन स्वरूपतः उपजीवकत्वमप्यस्त्येवे
ति द्रष्टव्यं॥ ननु अतिदेशवाक्यरूपशाब्दप्रमाणस्यापि अतिदेशवाक्यार्थज्ञानरूपोपमानोपजीव्यत्वा
त् उपमानमेवादौ निरूपितं। नानुशब्द इत्यत्र किं विनिगमकमिति चेत्। प्रमाणत्वावच्छेदकधर्मावच्छि
न्नोपजीव्यतानिरूपितोपजीवकताया एवानुसंगतित्वात्। प्रमाणतावच्छेदकधर्मश्च इन्द्रियत्वादिः। अ
वच्छिन्नत्वं च व्यापकत्वं॥ एवं चोपमानस्य संकेतमात्रग्राहकतया सर्वस्यैवोपमानस्य शब्दप्रमाणोपजी
व्यत्वं॥ शब्दप्रमाणस्य तु न सर्वस्यातिदेशवाक्यार्थज्ञानात्मकोपमानोपजीव्यत्वं घटमानयेति श
ब्दे तदभावात्॥ न चैवमुपमानपदत्वेन शाब्दत्वावच्छिन्नं प्रति हेतुता घटमानयेतिशब्दनिरूपितशा
ब्दत्वावच्छिन्नस्य प्रतीतावुपमाने सत्त्वादुक्तदोषतादवस्थ्यमिति वाच्यं॥ प्रमाणविभाजकोपाधिनिपत
धर्मावच्छिन्नतायाउपजीवकताया विवक्षितत्वात्। प्रमाणविभाजकोपाधिश्च साक्षात्कारकरणत्वादि
। अवच्छिन्नत्वं चात्र स्वस्वरूपसंबंधविशेषः॥ इत्थं च शाब्दत्वादेः उपमितिकरणत्वानियतत्वात्। अति
देशवाक्यार्थज्ञानत्वादेरेव तथात्वेनानुभवेन तु शब्दस्य समीति॥ आत्मविशेषगुणानां विषयोनि वि

श्रीमतेरामानुजायनमः

तर्क-प्र १ मीकेनमानानुपगमात्॥तथाचशाब्दजन्यघटादिविषेयकज्ञानत्वमेवतद्विषयोनत्वतिरिक्तशाब्दत्व
जातिरित्यतआह॥जन्यपदधीरित्याहुः॥नस्सत्॥शब्दलिंगकघटानुमितेरपिशब्दजन्यघटविधेय
कज्ञानत्वेनतद्वृत्तेरपिशाब्दयामीतिप्रतीत्यापत्तेःशाब्दत्वजातिस्वीकारस्यआवश्यकत्वात्॥तद्दत्वीका
रमाद्दपद्धिती यत्नत्तत्र अपायेनतद्व्यापकशाब्दत्वस्येत्यग्रिमग्रंथासंगतेश्चेत्यपवधेयं॥जन्यपदधी
जन्यत्वव्यभिचारिणी अनुभवत्वाव्यापिकाचयाजातिःप्रत्यक्षत्वादिस्तच्छून्यत्वेसतिपदविषयकत्वाव्य
भिचारिणीयाजातिरूपमितित्वंतच्छून्यधीत्वमितिलक्षणार्थः॥अतिव्याप्तिंवारयति॥नैवेति॥प्रत्यक्षा
नुमितिस्मृतिष्वित्यर्थः॥तादृशीनोजन्यपदधीजन्यत्वव्यभिचारिअनुभवत्वाव्यापिकानोसत्त्वादिति॥ श्रीमतेरामानुजायनमः
तथाचतच्छून्यत्वाभावान्नातिव्याप्तिरितिभावः॥स्मृतित्वस्यजातित्वेअनुभवसामग्रीप्रतिबंध्यता
वच्छेदकत्वेननअनुभवप्रत्यक्षत्वादावतिव्याप्तिवारणायजातिशून्यत्वेसतीत्युक्तं॥पदविशाब्देपिज्ञान
त्वादिसत्त्वादसंभवइतिविभाव्यतेतदनुभवत्वाव्यापकजातिशून्यत्वेसतीत्येवास्तुइत्यतआह॥ राम २
जातिशून्यत्वमिति॥जातिशून्यत्वमात्रमित्यर्थः॥अनुभवत्वेति॥अनुभवत्वाव्यापकजातिशून्यत्व

मात्रमिति स्वार्थः॥ अनुभवत्वादीनामिति। आदिना ज्ञानत्वानुमितित्वादिपरिग्रहः॥ तथा चेदृशज्ञानीनोत्वत्वाज्जातित्वं न्यत्वं न तत्र मितिमिति वृ
१ अन्यथापि ज्ञानक
दीना १

दीनामित्येव वक्तुमुचितं। तथापि तद्व्यापकेत्यनेन तद्घटकत्वेनानुभवत्वपरामर्शाय अनुभवत्वामित्युक्तं। न द्व्या
पकेति। अनुभवत्वाव्यापकेत्यर्थः। अनुभवत्वाव्यापके त्वस्य व्यावृत्तिमाह। जन्येति। तथा संभविता दृशि
धी ।जन्यधीपदे जन्यत्वव्यभिचारीत्यर्थः। ननु अनुभवत्वेवारणाय अनुभवत्वान्यत्वमेवोपादीयतामित्यत आ
ह। आदीनामिति। आदिना ज्ञानत्वपरिग्रहः। अनुभवत्वाव्यापकसामानाधिकरण्यादिरूपव्याप्यत्वनि
निवेशे गौरवात्। एवमनुभवत्वस्यापि स्वव्याप्यत्वात् तद्वारणाय भेदघटितस्वव्याप्यत्वस्यापि विशेषणवाच्य
ति तयां गौरवात् मन्मते अनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वस्यानुभवत्वेऽसत्वेनानुपपत्त्यभावात्॥ अ ५
धी स्य तावति व्याप्तिवारणाय चरमं पदं स्यानुभवपरत्वं विनाऽनिर्वाहाच्चेति। पदजन्यत्वव्यभिचारी अनुभ
वत्वाव्यापकजातिशून्यत्वमिति कृतेऽसंभवः। ज्ञापमानपदस्य करणत्वासंभवेन शाब्दत्वस्यापि पदजन्य
त्वव्यभिचारित्वादतः पदधीति। इत्थं च जन्यपदव्यावृत्तिमाह पदधीति। नन्वनुमितित्वस्यापि तादृशस्य
सत्वात् कथमतिव्याप्तिरित्यत आह। अनुमितित्वस्येति। भगवदिति। अनुमितित्वस्य शरीरपदधीजन्य
त्वव्याप्यत्वेनात्मत्वादिजातिरेव न तथा तद्धून्यत्वं चानुमितावपीत्यतिव्याप्तिः। जन्यपदोपादाने चानुमिति

व्यापकत्वं वानुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वं तेनानुभवत्वादिव्युदासः॥ ननु अनुभवत्वव्याप्यत्वमेव किं नोपादीयते कतमत्राह
कघटितत्वेनेति केचित्।८

तर्कप्र त्वस्यापि तथात्वेन तच्छून्यत्वाभावाभावान्न क्षतिरिति भावः । अत एव अतिव्याप्त्यादिति ॥ समुदितमिति । जन्यपद
३ धीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्यत्वात् इत्यर्थः । अन्यथा जन्यत्वव्यभिचारीति जन्यधीत्वव्य
भिचारीति धीजन्यत्वव्यभिचारीति जन्यजन्यत्वव्यभिचारीति वा नोक्तौ । अनुमितित्वस्यैव जन्यज्ञानत्वजन्यव्या जन्यत्व२
प्तिज्ञानजन्यत्वव्याप्यत्वात् तद्व्यभिचारिजातिशून्यत्वस्यानुमितावपि सत्त्वादतिव्याप्तेः । जन्यपदधीत्वव्या
भिचारिजातिशून्यत्वोक्तौ शाब्दत्वस्यापि तथात्वेनासंभवापत्तिरिति विशिष्टमुपादेयमेव ॥ ननु जन्यपद
धीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्यत्वमेवास्तु लक्षणमस्तु तत्विशेष्यदलेनेत्यत आह । उ
मितावितिः ॥ उपमितेः पदविषयकातिदेशवाक्यार्थज्ञानजन्यत्वनियमेन जन्यपदधीजन्यत्वव्यभिचा
रित्वप्रयत्नत्वादिजातिशून्यत्वादिति भावः । शून्यान्ते पदविषयकत्वाव्यभिचारिजातिशून्यत्वमित्यर्थः । पद
विषयकशाब्दबोधे पदस्यापि भानात् पदविषयकत्वसमानाधिकरणशाब्दत्वशून्यत्वाभावादसंभव इति द२
समानाधिकरणेति विहाय अव्यभिचारीति । ननु सर्वत्र शाब्दबोधे पदस्य भाने बाधकाभावाच्छाब्दत्वस्यापि पद राम
विषयकत्वाव्यभिचारित्वमेवेति चेन्न । वृत्त्या पदजन्यपदार्थोपस्थितितात्पर्यज्ञानादेरेव शाब्दबोधहेतुतया ३

वृत्यसर्वत्रमानेमानाभावात्तापत्रभिन्नविषयकानुमितिसामग्रीकालेघटमानयेतिशाब्देच्छाव्यलाच्छा
ब्दबोधः।तत्रशब्दविषयकशाब्दजापनाभितीच्छाविरहविशिष्टानुमितिसामग्र्याः प्रतिबंधकत्वेनशब्दशा
ब्दानुपपत्तेश्च।घटशाब्देच्छापापितत्वोत्तेजकत्वेतत्तदिच्छाभावकूटनिवेशनातिगौरवात्।मिथोविशेषणवि
विशेष्यभावेविनिगमनाविरहेणानंतकार्यकारणभावकल्पनेनापत्तेश्चेतिशाब्दविषयकशाब्दस्यैवोत्प
चा५ त्त्याशाब्दत्वस्यपदविषयकत्वाव्यभिचारित्वाभावेनासंभवाभावादिति।।नकिंचिदेतत्।जानातीति।।ज्ञाप्या
दावित्यर्थः।तत्रजात्यभावादिव्याप्तिभावः।मणिकृतत्वप्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यशब्दप्रमाणमि मि५८
वा५ तिशब्दलक्षणंप्रयोगेकृतहेतुभूतपदार्थतत्त्वज्ञानजन्यशब्दप्रमाणशब्दत्वमित्यर्थः।वाक्यार्थप्र
ममाहापर्वतोवह्निमानित्यादावप्रयोगेऽतिव्याप्तिवारणायतत्त्वपदं।तथापिपदार्थतत्त्वज्ञानमादायप्रयोगेप
तिव्याप्तेः।प्रयोगहेतुभूतेति।इत्थंचार्थपदस्यवाक्यार्थप्रमाणादायवह्निमानित्यादावप्रयोगेऽतिव्या
प्तिवारणायतत्त्वपदं।तथापिपदार्थतत्त्वज्ञानमादायप्रयोगेऽतिव्याप्तेः।प्रयोग।नुभूतेति।इत्थंचार्थप
दस्यवाक्यार्थपरत्वपर्यवसानात्तत्रपदार्थतत्त्वज्ञानमादायातिप्रसंगः।तथाहि।हेतुपदसमभिव्याहारान्

तर्कप्र त पदस्य मृषा भावितिपावदनुसारादित्तरनैरपेक्ष्यस्वोत्पन्नत्वपासजातीयनैरपेक्ष्यस्य चात्र विवक्षितत्वात्प्राम
४ त्यप्रयोगप्रतिपाद्यज्ञाने प्रयोगे कर्त्तव्ये प्रयोगप्रतिपाद्यज्ञानोत्तरं नापेक्षते। तादृशार्थतत्वज्ञानजन्यत्वेन लु
ब्धा न हि वाक्यार्थज्ञानवत् पदार्थज्ञानमपि अर्थज्ञानेमनपेक्ष्य प्रयोगहेतुः। वाक्यार्थज्ञानात्मकार्थ
तत्वज्ञानेस्येवापेक्षणीयत्वादिति। अत्र प्रयोगो वाक्यं तथा च तत्कालीनतत्पुरुषीयत्वजन्यज्ञानविष
यविषयकं प्रमात्मकं ज्ञानं प्रकृतवाक्ये जननीये स्वस्मिन् जननीये प्रयोगप्रतिपाद्यज्ञानोत्तरं तत्काली
नतत्पुरुषीयत्वजन्यज्ञानविषयविषयकज्ञानोत्तरं नापेक्षते। तादृशार्थतत्वज्ञानजन्यत्वमर्थः। वाक्यार्थ
ज्ञा र्थज्ञानेन वाक्ये जननीये स्वपूर्ववृत्तिपदार्थज्ञानस्यापेक्षणात्। अन्यथा तस्याहेतुत्वापत्तेरिति स्वोत्त
रोत्पन्नत्वमपि स्वजन्यज्ञानविषयविषयकज्ञानोत्तरे विशेषणीयं तथा च तत्कालीनतत्पुरुषीयत्वज
न्यज्ञानविषयविषयकं पदार्थज्ञाने स्वस्मिन् जननीये तत्कालीनतत्पुरुषीयत्वजन्यज्ञानविषय स्वोत्तरोत्पन्न
यविषयक ~~[illegible]~~ ज्ञानोत्तरं नापेक्षते। तादृशप्रमात्मकज्ञानजन्यशब्दत्वं तत्कालीनत राम
त्पुरुषीयप्रमाणशब्दत्वमिति फलितम्। अत्र स्वोत्तरोत्पन्नत्वपदमर्थतत्वज्ञानपरं स्वपदं ज्ञानप ४

प्रकृत

णा॥ प्रकृतवाक्यपूरणात्। पदार्थतत्त्वज्ञानेन च वाक्ये जननीये सत्त्वात्तदीत्यन्तप्रकृतवाक्यजन्यज्ञानविषयवि
षयकस्य वाक्यार्थज्ञानस्यापत्तेः। तेन पदार्थतत्त्वज्ञानजन्यत्वमात्राद्याप्योग्यतिव्याप्तिरिति। स्वसंको
रादावतिव्याप्तेर्लक्षणे शब्दपदं प्रमाणमात्रस्य लक्षणत्वे प्रत्यक्षादावव्याप्तेर्लक्षणेऽपि शब्दपदमनुषज्
नीयमिति। न च तत्कालीनतत्पुरुषीयत्वजन्यज्ञानविषयविषयकं यत्प्रमात्मकं ज्ञानं त्वस्मिन्ननीय
तत्कालीनतत्पुरुषीयत्वजन्यज्ञानविषयविषयकज्ञानोत्तरं नापेक्षितेति तादृशप्रमाजन्यशाब्दत्वं तत्का
श्री लीनतत्पुरुषीयप्रमाणशाब्दत्वमिति फलितं। प्रमात्वं च यावद्रूपभिन्नत्वं ततः। ओशिकप्रमाणमादा स्त्र५
यातिप्रसंगः। इत्थं च वह्निनासिंचतीत्यादौ पदार्थतत्त्वज्ञानस्य तत्समानजातीयवाक्यार्थज्ञानोत्तरापे
क्षितयातदादायातिव्याप्तिसंभावेऽपि कंठाभिघातवाक्यरूपदुष्टसाधनताप्रमापाद्यपातिप्रसंगवह्निकरणा
कसेकानुकूलकृतिमानिति प्रकृतवाक्यजन्यज्ञानविषयकरणाता घटकाभावादिविषयकत्वेन दुष्टसा
धनताज्ञानस्यापि प्रकृतवाक्यजन्यज्ञानविषयकार्यरूपज्ञानत्वात्। तेन च वाक्ये जनयितव्ये सजातीय
यज्ञानोत्तरानपेक्षणादिति॥ एवं शब्दो द्वयमिति वाक्यस्यापि तादृशवाक्यजन्यज्ञानविषयतयातादृश

तर्कप्र ५ वाक्यजन्यज्ञानविषयवाक्यविषयवाक्यार्थरूपेष्टसाधनताप्रमामात्रायशब्दोऽद्रव्यमित्ययोग्यवाक्येतिव्याप्तिः
॥ अपि चायं पयःकरणकसेकानुकूलाकृतिमान्वगुणत्वद्रव्यमित्यादिकभ्रमात्मकसमूहालंबनजन्ये पयसा
सिंचतीति वाक्येऽव्याप्तेः ॥ तादृशवाक्यार्थज्ञानस्य भ्रमभिन्नत्वाभावात् ॥ ईश्वरीयवाक्यार्थज्ञानस्य स्वसमान
जातीयास्मदीयवाक्यार्थज्ञानसापेक्षतया तदीयपदलक्षणागमनात् ॥ अन्यथा तदीयपदार्थ[illegible]तत्वानु
नमादायायोग्यतिप्रसक्तेः ईश्वरीयत्वादिति कथ्यमिति दृतिचिन्मेव ॥ यादृशार्थतत्वज्ञानं स्वसमानजा[illegible]यज्ञान तीपु
नपे६ तरानंतरसाम्यप्रयोगहेतुः तज्जन्यत्वमिति ल[illegible]क्षणार्थः ॥ किंतु प्रयोगहेतुभूतं यत्पदार्थतत्वज्ञानं प्रकृतवा
क्यार्थविषयकं तज्जन्यत्वलक्षणं ॥ तत्कालीनतत्पुरुषीयत्वजजन्यज्ञानमनेपघतत्संसर्गकेपयसप्रकार
कत्वावच्छिन्नप्रयोगहितशेष्यताकं तत्तत्संसर्गकतत्तत्प्रकारकतत्तद्विशेष्यकंभ्रमभिन्नज्ञानजन्यशब्दत्वं त त्र ८
त्कालीनतत्पुरुषीयप्रमाणत्वमिति पर्यवसितोऽर्थः ॥ वह्निना सिंचतीत्यादौ वह्निकरणकसेचनानुकूल
कृतिमानिति बोधोदयेन तद्विषयविषयकज्ञानस्य भ्रमत्वान्न तत्रातिव्याप्तिः ॥ एवं शब्दोऽद्रव्यमित्यादाव राम
पि ॥ भ्रमात्मकसमूहालंबनजन्ये पयसा सिंचतीत्यादौ तु ईश्वरीयप्रमामादाय संगतिः ॥ एवमन्य[illegible]वाक्य ५
नस्तु कोदी

न्ने

मो निश्चोकादावपीति॥ नचपच्चवह्निना सिंचति पयसा सिंचतीत्यादिवाक्याभ्यां वह्निकरणकसेकानुकूलकृ
तिमान् पयःकरणकसेकानुकूलकृतिमानिति समूहालंबनशाब्दबोधः तत्र पयसा सिंचतीति वाक्येऽव्याप्तिः
न्द ३ ।तद्वाक्यजन्यपदज्ञानपदविशेष्यताकतत्तद्विशेष्यकत्वमभिन्नज्ञानाप्रसिद्धेरिति वाच्यं॥ पयद्विशेष्यताकत्वांशे
त्वजन्यतात तद्विशेष्यकत्वमभिन्नज्ञानत्वस्याविवक्षितत्वादित्याहुः॥ इदं च बुबोधयिषापूर्वकवाक्यत्वावच्छि
न्नेप्रतिवाक्यार्थज्ञानेहेतुरिति संप्रदायमतेन॥ वस्तुतस्तु बुबोधयिषाया अन्यथासिद्धतया तस्य कारण
त्वासंभवेन तदपेक्ष्य शाब्दप्रमितिकरणं शब्द इति फलघटितमेव लक्षणमनुकृतमिति ध्येयं॥ अस्य ह्याति
रिक्तप्रमाणसत्वे मानाभावप्रतिशब्दस्याप्रमाणत्वप्राप्त्यर्थं तन्निर्वचनेनेति चार्वाकमतं कटाक्षयन् श
ब्दस्यप्रमाणत्वं साधयति॥ सोपि शब्दोपि शाब्दप्रमितिकरणं शब्द इत्यर्थः। सकलेति। शाब्दयामीत्य
नुभवविषय इत्यर्थः। इत्यपाकृत इति।तादृशप्रत्यक्षस्यान्यविषयकत्वे बाधाच्छब्दविषयकत्वे एव पर्यव
सानेन शब्दसिद्धिः। प्रतीतेस्तत्साधकत्वे परार्थमात्रा छेद इति भावः। ननु नवयं शब्द एव नास्तीति प्रमोऽपि
तु तस्यातिरिक्तशाब्दप्रमितिकरणत्वमेव नास्तीत्यत आह। तज्जनकत्वमपीति। तस्य शब्दस्य जनकत्वमपि

तर्कप्र शाब्दप्रमितिकरणत्वमपीत्यर्थः। वस्तुतस्तु सोपेशाब्द इति पाठः। शाब्दयामीति प्रतीतिसिद्धः शाब्दबो-
६ धइत्यं । तज्जनकत्वमपि शाब्दे तादृशशाब्दप्रमितिकरणत्वमपीत्यर्थः। [illegible] इत्यन्वयः। तत्र हेतुमो-
ह। आगोपालेति। प्रतीतेरिति। वाक्यादमुमर्थं प्रत्येमीति ज्ञानस्य प्रत्यक्षविषयकत्वात् भवेन प्रत्य- ४२
क्षातिरिक्तप्रमितिस्वीकारस्तत्करणस्वीकारश्चावश्यक इति भावः। नन्वस्तु शब्दस्य प्रमाणत्वं आ-
स्तां च तज्जन्यज्ञानस्य प्रत्यक्षातिरिक्तत्वं तथाप्यनुमित्यात्मकत्वमेव तज्जन्यज्ञानस्यास्त्वतो व्यर्थ-
पृथक्कृत्य निरूपणेनेत्यत आह। केवलमिति। अनुमानविधया अनुमानत्वेनान्यथा वेति। शब्दवि-
धया वेत्यर्थः। न तु तस्य प्रत्यक्षातिरिक्तप्रमितिजनकत्वमेव नास्तीति विवाद इति भावः। विप्रतिपद्येन
इति विप्रतिपत्तिस्वशब्दः। अनुमितित्वासमानाधिकरणप्रमितिविभाजकोपाध्यवच्छिन्नजन्यता-
निरूपितप्रमाणविभाजकोपाधिनियतधर्मावच्छिन्नजनकताश्रयो न वेत्याकारिका। अत्र विधिको- राम
टिर्नैयायिकानां। निषेधकोटिर्वै षिकाणां। विधिकोटिप्रसिद्धिः प्रत्यक्षप्रमाणे इन्द्रियस्यैव प्रत्यक्ष- ६

शे

प्रमाणजन्यप्रत्यक्षप्रतीतिं इन्द्रियत्वेन तादृशजनकत्वात् । निषेधप्रसिद्धिश्च घटादावेव सुलभा । अत्र सिद्धसा
धनेवारणायानुमितित्वासमानाधिकरणप्रमितिविभाजकोपाध्यवच्छिन्नत्वनिवेशः प्रत्यक्षविषयत्व
हेतुतया शब्दस्याधिसाक्षात्कारत्वावच्छिन्नजन्यताभिरूपितजनकताशालित्वात्प्रमाणविभाजकोपाधि
निष्ठधर्मावच्छिन्नत्वनिवेशः । अनुमितिभिन्नशब्दविषयकप्रमितिकरणं नवेति प्रत्यक्षानुमित्यन्यत
रत्वव्याप्यानुभवनिष्ठजन्यतासामान्यको नवेत्याकारो वा ॥ पथ्यमिति । अनुमितिभिन्नशब्दविषयक
प्रमितिकरणमित्यर्थः । अतो न सिद्धसिद्धिव्याघातः । न त्वनुमानेन तु प्रत्यक्षानुमित्यन्य[illegible]रत्वव्याप्यानु त
शब्द नु वतिष्ठजन्यतासामान्यके । अतो नै[illegible]लिंगकानुमानमादाय बाधः । नन्विदं घटानयनादिरूपार्थ र्थ
वक्तृत्वादिप्यनुमानस्यादत आह शब्दस्येति । अर्थाव्याप्यत्वात् । स्वजन्यप्रतीतिविषयार्थनिरूपि
तव्याप्त्यभावादित्यर्थः । अव्याप्यत्वं दर्शयति ॥ न[illegible]ति । न स्ववृत्तित्वात् आकाशावृत्तित्वात् । तथा चाव्यभि
चारितसामानाधिकरण्यरूपव्याप्तिः शब्दे न संभवति । साध्यहेत्वोर्वैय्यधिकरण्यादिति भावः ॥ ननु घ
टमानयेति पदानि तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकांक्षादिमत्कदंबकत्वादित्य

प्रव ३ पं

तर्कप्र त्तेनवैयधिकरण्येनरजतज्ञानवानयमितिज्ञानात्प्रवृत्त्यापत्तिवारणाय पुरोवर्त्तिविशेष्यकत्वस्य
७ तावच्छेदकप्रकारकज्ञानस्यैवप्रवर्त्तकतयानतत्सिद्धिरिति वाच्यं लाघवात्प्रवृत्तिविषयेष्टतावच्छेदकवैशि
ष्ट्यावगाहिज्ञानत्वेनैव प्रवर्त्तकतया साध्यस्य ज्ञानपदस्य प्रमापरत्वेन प्रमात्वस्य प्रवर्त्तकतावच्छेदकत्वात्तस्य च हेतुस्व त्पे
तानवानुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन तस्मादितिपदार्थैकत्वेनैव रजतत्वादिसिद्धिः । ननु रजतत्वा
दिना प्रमेयत्वादिना तादृशज्ञानस्य प्रवर्त्तकत्ववारणाय रजतत्वादिप्रकारकज्ञानस्यैव प्रवर्त्तकत्वादिति
वाच्यं । पूर्वं रजतत्वादिना रजतत्वादेरुपस्थितत्वादितरबाधवलात्तेन रूपेणानुमितौ भानसम्भवात् । अत
(पो) एवसत्कर्त्तकोनुमाने लाघवोपनीतमेकत्वादिकमपि भासते लाघवेन ज्ञानेतरबाधातिरिक्तस्थलेपव
च व्यापकतानवच्छेदकरूपेणाभानानुपगमादिति ॥ पक्षेणेत्यत्र पदार्थतात्पर्यविषयमित्यस्य संसर्गवतः आ र्थे
रि३ कांक्षादिमत्त्वात् तस्मा[illegible]त्वादित्यनुमानेन विशिष्य रजतत्वादेः प्रवृत्तावच्छेदकतयात्तसिद्धिः । नचनादीज
लसंसर्गपरत्वेपाच्चारितेर्थविमलेजलेनघटःकच्छेमहिषश्चरतीतिवाक्येअप्रत्यायकेनढोकद्रूपसार्थेषु ग्रम
व्यभिचारः तात्पर्यगर्भसाध्यमत्वात् इति वाच्यं तात्पर्यगर्भे परस्परनिरूपितार्थताकादिमत्त्वाभावेनैवाव्यभि ७

घ,ले २

मे ३

चारित्वात्‌। ननु तथापि हेतुतावच्छेदकावच्छिन्नहेतुमत्तानिश्चयस्यैवानुमितिहेतुतया पक्षे योग्यतासंशयः
तत्र योग्यतागर्भहेतुमत्तानिश्चयाभावाद्बन्धयावोधप्रसंगः। न च योग्यतासंशयस्य बाधसंशयपर्यवसन्नत
यासाध्यसंदेहस्यैवानुमित्यनुगुणत्वात्‌ योग्यताघटकसंशयातिरिक्तसंशयाप्रयत्वे [illegible] व हेतुमत्तानिश्चयत्वे मि ३
तिवाच्यं। गौरवात्‌। साध्यव्याप्यसाध्यवत्त्वेनैवातिसंशयादनुमित्यापत्तेश्चेति चेन्न। अयमालोको धूमो वा भय
थापि वह्निव्याप्य इत्यत्र हेतुतावच्छेदकसंदेहेपि नैयायिकैरनुमितेरभ्युपगमात्‌। व्याप्यवत्तानिश्चयत्वेनै
वानुमितिहेतुत्वे तस्य च योग्यतारूपहेतुविशेषणसंदेहेपि संभवान्न कोप्यनुपपत्तिरत आह। इष्टापत्तेवे
ति। ननु व्याप्तिभ्रमादेवानुमितिरस्तु। न च भ्रमात्मकपरामर्शजन्यत्वादनुमितेर्भ्रमत्वापत्तिरिति वाच्यं
। विषयबाधस्यैव भ्रमत्वनियामकत्वेन दोषाभावादित्यत आह। इष्टापत्तेवेत्यपि कश्चित्‌।। व्याप्तीति। पद
निष्ठव्याप्तिज्ञानशून्यानामित्यर्थः। न चेति नहीत्यर्थः। अपूर्वव्याप्तिज्ञानशून्यकालीनः शाब्दप्रमोज्योनुभ
वः तस्यानुमितेः। ननु विषयव्याप्तिज्ञानजन्याविलम्बतौ वानुमितिः। न च तत्रानुमितित्वसत्वेमानाभावः। समा
नेविषये शाब्दसामग्र्याः प्रबलत्वादनुमितिप्रति शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवं। मन्मते तत्र शा

तर्कप
८

व्याप्तिकानुमितिस्वीकारेणानवत्तत्प्रतिबंधकत्वात्। एवं भिन्नविषयेऽनुमितिसामग्र्याः शाब्दसामग्र्याश्च
प्रतिबंधकताद्वयकल्पने गौरवमिन्मते अनुमितिसामग्री प्रतिबंधकतयैवोपपत्तेरत आह प्रतीयेति चे-
अननुमित्सामिति। न च व्याप्तिज्ञानादिघटितसामग्रीजन्यानुमितित्वाभाव एव तर्हि प्रपद्यतीति वाच्यं व्याप्त्या-
घप्रतिसंधानेपि तस्या अनुभवसिद्धत्वात्। असाक्षात्कृतमिति। यद्यपि नोपमितमित्यपि वक्तुमुचितं त-
थाप्युपमितेः शक्तिमत्त्वविषयतया घटादिविषयकज्ञानस्य ततोऽसंभवेन तन्निराकरणस्य किं प्रयोजन-
कत्वात्। नोपमितमिति शेषइत्यपि कश्चित्। तथा च शब्दजन्यज्ञाने अनुमितित्वाद्यभावेन विलक्षणप्र-
मित्यंतरस्वीकारस्यावश्यकस्या वश्यकतया तत्करणस्य प्रमाणांतरत्वमावश्यकमिति भावः। अत
मिति। नैयायिकशब्दजन्यशाब्दबोधविषयइत्यर्थः। अधातोर्नानार्थत्वेन शाब्दत्वविशिष्टे शक्त-
त्वात्। अत एवात्मा वा रे द्रष्टव्यः श्रोतव्य इत्यादिश्रुतिरप्युपपद्यते। इदं घटकर्मकानयनादि। नैयाय-
केभ्य इति। वैशेषिकस्य शब्दोच्चारयितत्वेलिंगविधयैव तद्बोधकत्वान्नैयायिकेभ्य इत्युक्तं। नैयायिका
नां शाब्देऽच्छयैवोच्चारणात् शाब्दतात्पर्यज्ञानसंभवात्॥ शाब्दबोध एव श्रोतुरिति भावः। जरन्मीमांसका

राम
८

न१

क्तो लौकिकवाक्यस्थले शाब्दबोधात्पूर्वं प्रकृतवाक्यार्थगोचरयथार्थज्ञानवक्तृज्ञानरूपाप्तोक्तत्वानुमिति
सामग्रीसत्वेनाप्तोक्तत्वानुमितिसंभवात्। वाक्यार्थज्ञानस्यावश्यकत्वात् उक्तं वैदिकस्थलवत्तु न शाब्दसा
मग्रीति शाब्दोपि तत्र लौकिकः शब्दोनुवादकः। अनुवादकत्वस्य गृहीतग्राह्यनुभवमात्रजनकत्वरूपत्वा
त्। स्वसमानाधिकरणाव्यवहितपूर्ववृत्तिस्वसमानाकारनिश्चयविषयविषयकत्वद्विशेष्यकतत्प्रका
रानुभवमात्रजनकत्वरूपत्वादिति यावत्। स्वपदमनुभवपरं वेदस्य तु पौरुषेयत्वेनाप्तोक्तत्वानुमाना
संभवादननुवादकत्वात्प्रामाण्यं। अनधिगतार्थानुभवकरणत्वस्यैव प्रामाण्यरूपत्वात्तु च गृहीतग्रा
रका हीतरानुभवकरणत्वं स्वसमानाधिकरणस्वाव्यवहितपूर्ववृत्ति स्वसमानाकारनिश्चयविषयविषय
केतरतद्विशेष्यकतत्प्रकानुभवकरणत्वमिति यावत्। स्वसमानाकारत्वं च स्वस्मिन्यादृशी तद्विशेष्यक १४
त्वावच्छिन्नतत्प्रकारिता तादृशतद्विशेष्यकत्वावच्छिन्नतत्प्रकारिताशालित्वमित्यूचुः। तत्समत्वावा त्ति
प्तिस्मृतिविलंबेनाप्तोक्तत्वानुमितिसामग्र्यभावेन प्रथमत एव शाब्दबोधा ननुवादकत्वेन प्रमाण
त्वात्। ननु लौकिकवाक्ये इदमाप्तोक्तं न वेति संशये शाब्दबोधा नुपपत्तेः। परस्प्राय व्याप्तिरेकनिश्चयोप

तर्कप्र ८

न प्रतिबंधकौत्तन्निश्चयस्तत्र हेतुः। अनुमितौ व्याप्तेरिवेति नियमेनाप्तोक्तत्वनिश्चयस्य हेतुत्वाच्छाब्दबोधा
त्पूर्वं तस्यावश्यकत्वात्। किंच। तत्कार्यतावच्छेदकं हि शाब्दत्वं वा लौकिकवाक्यजन्यशाब्दत्वं वा लौकिकत्वेन ज्ञात
वाक्यजन्यशाब्दत्वं वा नाद्यः। वेदात्तदभावात्। न द्वितीयः। आप्तोक्तत्वानिश्चयेऽपि वेदानुकारेणापभ्रमाणाम
न्वाह्निवाक्येऽपौरुषेयत्वाभिमानिनो मीमांसकस्य शाब्दबोधोदयेन व्यभिचारात्॥ नापि तृतीयः। लौ
किकत्वेन ज्ञाते लौकिकवाक्यस्थले [illegible]न शाब्दसामान्यसामग्री तत एव लौकिकत्वेन ज्ञातवाक्यादपि
शाब्दोत्पत्तिसंभवे तस्याकारणत्वात्। [illegible]यासंशयेष्टाद्दिनियमेन तद्धेतुत्वमिति वाच्यं। तत्संशयेऽपि वाक्या
च्छाब्दबोधोत्पत्तेः संशयस्याप्रतिबंधकत्वात्। अव्यभिचारसंशयव्यतिरेकनिश्चयस्य प्रतिबध्यव्याप्तिज्ञाने व्य वे त्य
भिचारेणाप्रयोजकत्वेन च तादृशनियमाभावाच्च। एतेन शाब्दसामान्ये अनाप्तोक्त[illegible]शयाविरहो हेतुः सव्य
लौकिके आप्तोक्तत्वानुमानाद्वेदे त्वपौरुषेयत्वानुमानात्॥ न चापौरुषेयत्वनिश्चयदशायामेव वेदस्याद्
भावकत्वे हेयस्वबुद्धस्य श्रोत्रपदस्मारितत्वरूपहेतुज्ञानसत्त्वेन पदार्थसंसर्गसिद्धिसंभवाद्वेदस्याप्यनुवा राम
दकतापत्तिरिति वाच्यं। व्याप्तिस्मृतिविलंबेन तद्विलंबादिति परास्तं। अनाप्तोक्तसंशयस्याप्रतिबंधकत्वा ८

उप दो३ क२

तायोँ[illegible]तासंशयवद्विति दिक्॥ प्रामाकराणां॥ क्वचिद्भ्रमः क्वचित्प्रमेति नियमनिर्वाहाय शाब्दप्र
मात्वायच्छिन्नप्रतीतिं किंचित्कारणमुपेयं॥ तच्च नयोग्यता अन्वयप्रयोजकरूपवत्त्वरूपयोग्यतायाः कारकाभिप्राय
व४ प्रयुक्तयत्नासत्तिचतात्पर्ययोग्यवाक्येपि तुल्यत्वात्॥ अथ ॰षाभाव एव तथास्तु॥ दोषाश्च भ्रमप्रमादविप्रलिप्सा
करणापाटवरूपाः॥ [illegible]निष्ठः भ्रमश्चोच्चारणीयवाक्यार्थगोचरो भ्रमः॥ प्रमादोनवधानता॥ सा च वाक्या
र्थज्ञानत्वरूपयोग्यप्रयत्नत्वरूच्चारणीयवाक्यार्थेनिश्चयव्यतिरेकः॥ शुकादिप्रयुक्तवाक्यार्थनिश्चयव्यतिरेके
वारणाय प्रयत्नपदनिवेशः॥ अन्यथाप्रतीतस्यार्थस्यान्यथाप्रति॰पादयिषाप्रतारणेच्छा सैव च विप्रलिप्सा॥
इच्छाविषयीभूतवर्णानुकूलकण्ठताल्वाद्यभिघातानुत्पादकालीनापरवर्णानुकूलकण्ठताल्वाद्यभिघा
तात्प. तः करणापाटवं करणकण्ठाभिघातः तस्यापाटवमसामर्थ्यं॥ इच्छाविषयीभूतवर्णाननुकूलत्वमिति याव वि
दिति चेन्न॥ आप्तप्रतारकवाक्यसंवादेन प्रमाणोपतारणारूपदोषसत्त्वेन व्यभिचारात्॥ अन्यथाप्रतीत
स्याविद्यमानार्थस्यान्यथाप्रति[illegible]पादयिषाया एवात्र प्रतारणात्वेनोक्तदोषाद्वारपि सर्वसाधारणदोष
त्वस्यैकाभावेन तत्तदभावस्य प्रत्येकं कारणत्वे भ्रमसत्त्वेप्य[illegible]दोषाभावसत्त्वात्तु प्रमात्वापत्तिः॥ अभावकू

तस्याविद्यमानार्थप्रति न्य

तर्कप्र १० दस्य च वारणात्वे गोत्वादिमत्वादि शुकवाक्यादपि प्रमापत्तेश्च ॥ तस्माद्यथार्थतात्पर्यकत्वमेव लोकवेदसाधारणं शा
ब्दप्रमाप्रयोजकं । यथार्थतात्पर्यकत्वं च यथार्थवाक्यार्थप्रतीतीच्छयोच्चरितत्वम् एकपदार्थे वदपरपदार्थप्रतीती
च्छयोच्चरितत्वमिति यावत् ॥ उच्चरितत्वं चानुसंधीयमानं च तेनानन्तमेव वर्णानां नित्यैकरूपत्वेऽपि नासंभवः । न वा
मो निस्रोके व्याप्तिः । वेदे तु पूर्वपूर्वाध्यापकेच्छामादाय संगतिः । मार्वयुग्यमाणा वेदस्तु येदित यद्यमानं वेदादभिन्न
स्य वेदस्य नित्यत्वात् ॥ नित्यानुमेयवेदस्तु तदर्थज्ञापकत्वेन ज्ञानमन्यूवसामग्रीति न व्यभिचारः । शुकवाक्येऽपि शि
क्षकवाक्यमादायोपपत्तिः । वर्णानां तन्मते नित्यैकरूपत्वात् । न च देवरशमसपेन शुकवालादिवाक्ये गत्यभा
व इति वाच्यम् । तस्याप्रमाणत्वात् तद्व्यवहारस्तु प्रत्यक्षात्त[illegible]सिसगीग्रहादेवेति ॥ केचित्तु ॥ शुकबालादिभिन्नलौ ग्र ५
च किकवाक्ये यथार्थवाक्यार्थप्रतीतीच्छयो[illegible]रितत्वं वेदे वेदत्वादि ॥ शुकबालादिवाक्येऽबाधितार्थत्वं का ।
नानेव शाब्दप्रमाप्रयोजकमेकशक्तिमत्वेन च तेषां कारणत्वमिति । नानमनुगमः ॥ न च सर्वत्राबाधितार्थकत्व
मेव प्रयोजकमस्त्विति वाच्यम् । पश्चान्न घटाभिप्रायेण गृहे घटोऽस्तीत्युक्तौ घटोऽन्त[illegible]र्दृष्टात्तमानयतित[illegible]प राम-
रत्वेनाप्रमाणेऽपि प्रामाण्यापत्तेः । तदुक्तम् ॥ यत्परः शब्दः स शब्दार्थोऽयत इतीत्यादुरिति दिक् । तच्च ज्ञातमुपयुज्यते १०

१२ ग्रन्थ १

प१ त१

॥ज्ञातोपमानकरणोज्ञानोपयोगित्वेव्यभिचारित्वेलक्षणापात॥व्याप्तिवच्छब्दशक्तिवच्चेति तज्ज्ञाने हेतुः। ज्ञातमु
पयुज्यतेशाब्दबोधनिरूपितज्ञाननिष्ठकारणतायांविषयतासंबंधेन।वच्छेदकंशाब्दबोधनिरूपितज्ञाना
वच्छिन्नकारणता। अर्थ[illegible]स्यशाब्दबोधजननीयेउपयोगित्वेसतिसहकारित्वेसतिव्यभिचारित्वेलक्षणाप
दितितदर्थः सामान्यमुखी च व्याप्तिः॥ प[illegible]ज्ञाननिरूपितज्ञानावच्छिन्नकारणता। अपस्य ज्ञानेजननीये
सहकारित्वेसतिव्यभिचारित्वेलक्षणापे भवति। तत्तज्ज्ञाननिरूपितज्ञाननिष्ठकारणतायांविषयतासंबंधेना
वच्छेदकंभवतियथाव्याप्तिः॥ शब्दशक्तिश्चेति॥ अभूपोवयवतनिकर्षव्यभिचारवारणाय ज्ञापमानकर
णाइति॥ शाब्दबोधंप्रति ज्ञापमानकरणस्य शब्दस्य स्वप्रयत्नेज्जननीयेउपयोगिनि शब्दनिष्ठोत्र समवा
येव्यभिचारवारणायपदज्ञानोपयोगीति॥ तथाच यज्ञाने [illegible] ज्ञापमानकरणे तज्ज्ञाने जननीये तत्सहकारी
त्यर्थान्नदोषः॥ नच सल्लिंगपरामर्शे व्यभिचारः॥ ज्ञापमानु इत्यस्य ज्ञानविशिष्टत्वर्थात्सल्लिंगपरामर्श
स्य ज्ञानविशिष्टज्ञापमानकरणसहकारित्वात् यस्मिन्सति यद्भावात्कार्याभावः तस्यैव तत्सहकारित्वे
नत्वविशिष्टेत्वात्सहकारित्वात्। तथाच ज्ञाननिरूपितकरणतावच्छेदकज्ञानविशिष्टकरणस्य ज्ञाप

तयत्
त
त५

द१ तु

तर्कप्र
२१

मानत्वघटितधर्मावच्छिन्नकरणताकज्ञानेजननीयेसहकारित्वमर्थः पर्यवस्यतीतिपरामृश्यमानलिंग
त्वेनैवानुमितिकरणतापरामर्शविशिष्टत्वेनपरामर्शाभावासंभवान्नव्यभिचारः।ह्रदोवह्निमान्ह्र
दत्वादित्यादौपरामृश्यमानलिंगत्वेपिव्याप्त्यभावेनप्रमानुमित्युत्पत्त्यभावाद्व्याप्तिपदमितिदृष्टांतसंग
तिः।व्याप्तिपक्षधर्मतावल्लिंगत्वेनप्रमानुमितिकरणत्वात्।ज्ञाधूमानशब्दसत्वेशब्दसमवायाभावात्संभ
वेनैवतादृशसहकारित्वस्पर्शशब्दसमवायेभावेपिआघ्राणोधूमसंत्वेमान्यलक्षणाज्ञानस्यपरामर्शविशि सत्य
ष्टधूमसत्वेपिधूमनिष्ठरूपाभावेनधूमचाक्षुषानुदयात्परामृश्यमानधूमस्यप्रत्यक्षेजननीयेसहकारि
भूतेधूमनिष्ठरूपादौव्यभिचारवारणायपक्षानोपयोगीत्यनुमानघटितधर्मावच्छिन्नकरणताकज्ञा
नपदस्यज्ञानपदस्य[illegible]निवेशः॥अन्येतुचिंत्य॥परामृश्यमानलिंगसत्वेपि[illegible]परामर्शाभावसंभवा तत
नि त्कथंसल्लिंगपरामर्शव्यभिचारवारणायनचपक्षानुपपत्त्युपयोगिनज्ञानकरणतावच्छेदकज्ञा
नविष्टकरणसहकारित्वविवक्षितं।सत्यपरामृश्यमानलिंगत्वेनप्रमानुमितिहेतुत्वेनसल्लिंगपरा प
मर्शस्यप्रमानुमितिप्रत्येवोपयोगितयाप्रमानुमितिकरणतावच्छेदकसत्परामर्शविशिष्टलिंगसत्वे राम
२१

ह ता २

का २

सत्परामर्शाभावात्सैमवहनिवा[illegible]त्तथा सति व्याप्तिवदिति दृष्टान्तासंगतेः। व्याप्तिपक्षधर्मता वह्निमत्त्वे
नप्रमानुमितित्वे वा प्रयोगितया सत्परामर्शविशिष्टलिङ्गासत्त्वे व्याप्त्यभावासत्त्वेन वैतादृशसहकारित्वस्य व्या न
प्यभावादिति। आत्ममनोयोगाद्यधाभावादिवारणाय व्यभिचारिवैलक्षण्यापादिति। नच प्रमित्यजनकव्या
वि वृत्तत्वे प्रमित्यजनकज्ञानजनकसामग्र्य[illegible]ष्टत्वमिति यावत्। नच सर्वांशेऽत्र माभावे न प्रमित्यजनकज्ञा
जे ने[illegible]निकासामग्र्येवाप्रसिद्धा प्रमितिपदेन भ्रमभिन्नत्वविवक्षणे चानुमितेश्च भ्रमाप्रसिध्याऽप्रसिद्धिरितिवा
ष च्यं। तेन व्यधिकरणप्रकारे[illegible]वच्छिन्नविशेष्यताशाल्यनुभवत्वस्य प्रमितिपदेन विवक्षणात्। तादृशी ब
च स्मृतिसामग्र्येव प्रसिद्धा। अथानुभवस्य स्मृतिकरणात्तथा सल्लिङ्गपरामर्शस्याप्यनेन वारणे ज्ञानविशि न
ष्टकरणसहकारित्वस्य न ज्ञानविशिष्टस्य वैयर्थ्य[illegible]मितिचेन्नाकरणातातिरिक्तज्ञानजनकताप्रयोजकारणा
पं२ लापस्यैव ज्ञानजनकसामग्रीपदेन विवक्षितत्वात्। अन्यथा बाधात्मककूटलिङ्गकानुमितिस्थानाभिषिक्त[illegible] सा२
धा [illegible]स्मृतिमात्रस्मृतिसामग्र्यपि विशिष्टस्य व्याप्तावप्यसत्त्वेन दृष्टान्तासिध्यापत्तेः। अवच्छेदाभाव[illegible]कत्वांश्च
सिद्धिवारकत्वेऽपि करणतातिरिक्तत्वस्य वैयर्थ्यं। वस्तुमानस्यैव बाधात्मककूटलिङ्गका[illegible]नुमितिस्थानी

ने थी ४

षिन्न:
तर्कप्र
१२

ध्यं ... प्र१ ... ल

मि... साध्या स्मृतिजनकतया ... सिद्धिवारकत्वात् जनक... न करणतोभयसाधार... जनकतावच्छेदकस्या
भावात् । विशिष्यैव निवेशे करणतात्मकत्वजनकताव्यक्तेर्न प्रवेशः । न तु करणतातिरिक्तजनकतात्वेन प्रवेश इ
तिव्यर्थ... शेषकापा... नवकाशाच्च । उद्बोधकव्यावृत्ताच स्मृतिजनकता निवेशनीयानातः उद्बोधकतया जनक
तामादाया सिद्धिः । प्रागभावस्यतत्वव्याप्तित्वेनाहेतुत्वाच्च । न स्यानुमितिप्रागभावे व्यभिचार इति दिक् । केचि
त्तु इष्टप्रवृत्तिविषयवैशिष्ट्यावगाहिज्ञानमेव प्रकृतेप्रमितिशब्दार्थ इत्याहुः । अथवा ज्ञायमानकरणाइ
त्यत्रा...धेयत्वसप्तम्यर्थः । तथा च पतत्पद्मा... ज्ञायमानकरणनिष्ठत्वे सति पक्षज्ञानोपयोगित्वे सति व्यभि
चारित्वे लक्षणं भवतीति तत्तज्ञा...ननिरूपितज्ञाननिष्ठकारणतायो विषयतासंबंधेनावच्छेदकं भवतीति
तिव्याप्त्यर्थः । सल्लिंगपरामर्शस्तु न ज्ञायमानकरणधूमादिनिष्ठ अथात्मलिंगकानुमितिप्रति ज्ञाय
मानकरणे आत्मनि तत्सत्वात्तत्तद्वारणमितिचेन्न । तज्ज्ञानानधिकरणत्वस्य ज्ञायमानकरणे निवेशात् त०३
। अत एव प्रागभावस्यतत्व्याप्तित्वे न हेतुत्वेपि न स्यानुमितिप्रागभावे व्यभिचारः । धूमनिष्ठानोपाधिक गम
त्वावारणाय ज्ञानोपयोगित्वसतीति । बाधाभावादिवारणाय व्यभिचारित्वे लक्षणं पादि इति नदर्थित्वा १२

ननु विशिष्या लोके नु घट विशिष्टधर्मिता विशेष्यकघटप्रकारकप्रतीतं छयोच्चरितत्वरूपतात्पर्यज्ञानमेव हेतुः

भासव्यावर्त्तकत्वं भ्रमभिन्नज्ञाने केवलमिति यावत् तावन्मात्रस्यैव लिंगविधया भ्रमजनकतया साध्यमानत्वे
गत्वातिरिक्तरूपेण भ्रमजनकभिन्नत्वविवक्षणीये न च तन्मते तत्सिद्धिः। विसंवादिप्रवृत्त्यादिजनकज्ञा
नमात्रस्यैव तन्मते तथाभावानवबाधितत्वादि॥ तथा बाधस्य विपरीतनिश्चयस्य संभवे ज्ञानमात्राभा
वेन तज्ज्ञावस्य ज्ञानमात्रप्रयोजकत्वादिति। ननु तन्मतेऽग्रहीतासंसर्गकयथार्थस्मरणात्मकज्ञानद्वयस्यै
व भ्रमतया विसंवादिप्रवृत्तिजनकत्वेऽपि तस्य च निर्धर्मितावच्छेदकतया बाधावभासनेन हेतुत्वमिति
कथमेतत्॥ अत्र केचित्। विसंवादिप्रवृत्तिजनकत्वेन न ज्ञानस्य प्रवेशः अपि तु स्मृतित्वेन तथा च स्मृति
जनकतावच्छेदकावच्छिन्नान्यत्वादिति तदर्थः। जनकतावच्छेदकव्यावर्त्तनेन नासिद्धिरिति। असंसर्गाग्र
हविशिष्टज्ञानद्वयेऽन्यप्रमातिरिक्ताबाधस्य विरोधित्वमिष्यत एवेत्यपि केचिदिति कू॥ तत्र तात्प
र्ये सामान्यतः ज्ञातत्वपदार्थत्वेन रूपेण तत्तत्पदार्थघटितविशिष्यतत्तत्पदार्थघटितत्वेन च वेदस्थले घट
पदार्थविशिष्टपदार्थविशेष्यकघटपदार्थप्रकारकप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानमेव हेतुः
तत्र सामान्यतः घटपदार्थत्वादिना तात्पर्यग्रहेऽपि घटादेरपि लक्षणादिना घटपदार्थसंभवेन घटविशि

देतु।

तर्कप्र ष्टकमित्वाविशेष्यकप्रतीतीच्छयोच्चरितत्वनवेतिविशिष्यसंदेहे शाब्दबोधापत्तेः। वैलक्षण्यादिनाऽन्यार्थासं
भवेनैकपदार्थत्वेनज्ञातेनेपिविशिष्यसंदेहाभावात्। यथा कपिंजलानालभेतेत्यादौ प्रथमोपस्थितत्वबहुत्व
१२ लाघवतर्कनिराकृतत्रित्वविशिष्टकपिंजलपदार्थपरबहुवचनात्कपिंजलपदमिति सामान्यतःकपिंज
लपदार्थरूपेणतात्पर्यनिर्णयेपिविशिष्यकपिंजलत्वादिरूपेणतात्पर्यसंशयासंभवाद्। लोके तु गुरुभू तर४
तेष्वर्थेतात्पर्यसंभवेनलाघवतर्कानवतारात्विशिष्यसंदेहसंभवे घटविशिष्टकर्मत्वविशेष्यकघ न५
टप्रकारकप्रतीतीच्छयोच्चरितमिदमितितात्पर्यनिर्णयेपिशाब्दबोधासंभवे सर्वमेवव्यापकत्वनितत्त्वपालौ। किंक
मनु। वा। मठ्ठकांवादकेनस्यात्ब्ध्नो। किंकवाकोसर्वमेवानुवारकत्वादप्रमाणात्॥ वेदेतुतदभावावाप्रामाण्यमित्यपुः
॥तदसत्। एकपदार्थविशिष्टापरपदार्थविशेष्यकएकपदार्थप्रकारकप्रतीतीच्छयोच्चरितत्वसं प४
शयापादिततात्पर्यनिश्चयत्वेनहेतुत्वेपाद्यार्थ्यनिवेशेगौरवात्॥ किंतुनानार्थनिरोधेनशाब्दसामान्ये
एकपदार्थप्रकारकापरपदार्थविशेष्यकप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानस्यैव॥ नचैवंकर्तृका रामः
भिप्रायप्रयुक्तपपक्षासिंचती त्यत्रैवप्रकारादिप्रमापत्तिरितियुक्तमितिवाच्यं। एकपदार्थपरपदार्थवत्त्व १२

त्ता २

सा२ तु८

पयोगपत्ताप्रमापारुवसंशयनिश्चयसाधारणतारूपेणाकारणत्वात् । अपि चेदेवाकं भ्रमादिविशिष्टज्ञानयोरन्य
तरजन्यवाक्यार्थज्ञानजन्यवाक्यत्वात् । न तु भ्रमादेर्वाधेऽपवक्ता स्वप्रयुक्तवाक्यार्थगोचरयथार्थज्ञा
नवान् भ्रमाद्यजन्यवाक्यार्थज्ञानजन्यवाक्यप्रयोक्तृत्वाद् हमिवेति विवक्षितपयार्थज्ञानानुमानपूर्वक एव य
थार्थवाक्यार्थप्रतीतिनिश्चयोऽवेयः । तच्चानन्तभवति ॥ प्राचीनगुरुपक्षेत्वेन भ्रमाद्यजन्यत्वनिर्णयास
भवात्तेवाद्यप्रवृत्तिजनकत्वाद्वावृत्तदूहकलिंगस्यशाब्दबोधान्तरकापत्तिलीनत्वादित्यास्तां विस्त
शा६ रः । ननु शाब्दस्यानुमानान्तर्गतत्वे घटमानयेति घटादिपदेशक्तिमविदुषोऽपि शाब्दबोधापत्तिः । स्म मते
तत्र व्याप्तिज्ञानाभावाद्देवदत्तसंभवद्स्यापशयेनाशक्यतोनन्विति ॥ स्वाभित्रेणाशब्दत्वेनापामराणां घटा
दिपदेऽग्रहात्तशक्तिकानामसहकारित्वादिति । इतरकारणानां कसमवहितकारणस्यैकफलोपधा
यकत्वेन केवलशाब्दसत्त्वेऽपि शक्तिज्ञानरूपसहकारिविरहान्न तत्फलोपधानमिति भावः । उपोद्व
तसंगत्या शक्तिं निरूपयितुं शंकते । अर्थेति । पशब्दसहकारिग्रहविषय ॥ पदार्थान्तरमिति । तत्तत्पद
ता१ र्थावच्छेदाभाववत्त्वादित्यर्थः । तेन नासिध्यासिद्धिव्याघातः । संकेतग्राह्य वक्ष्यमाणसंकेतजन्यग्रहविष

श्यम १

तर्कप्र २४ पइत्यर्थः। आवश्यकत्वात्। अभिधाज्ञानेऽभवर्त्तामपेक्षणीयत्वात्। संकेतं निरूपयति सच्चेति। अस्मादिति।
एतत्पदजन्यत्वप्रकारतानिरूपितएतदर्थविषयबोधविशेष्यताशालिनी इच्छेत्यर्थः। हेत्वैवमिति। एवमिच्छामात्र
स्यैवाभिधारूपत्वे पामरादीति। गर्गरीत्यादिशब्दा इत्यर्थः। अभिधापकाम्नुरिति। तथा च नापभ्रंशितवैन
म्लेच्छितवै इत्यादिश्रुतिविरोधः शक्त्या प्रतिपादकत्वस्यापभ्रंशानपभ्रंशसाधारणत्वात्। अतिरिक्तशक्ति
स्वीकारे तु तेन नानासंकेतसत्त्वेऽपि अतिरिक्ताभिधायास्तत्रानंगीकारात् न तादृशश्रुतिविरोध इति भावः
संकेतमात्रं तादृशेच्छामात्रं। अपभाषिते गर्गर्यादिशब्दे सोऽस्ति ईश्वरसंकेतोक्तिमानाभावादिति। शाब्द
नित्यात् बुद्धौ नागर्गर्यादिशब्दात् शाब्दरूपफलाभावेनापभ्रंशेन तादृशी स्वरसंकेत इत्यर्थः। नापभ्रंशि त्वं५
तवै इति श्रुतिविरोधस्य बाधकोऽत्र संपः। ननु शाब्दसामान्ये शक्तिज्ञानस्य हेतुत्वे अपभाषिते शक्त्यभा मा
वे कथं शाब्द इत्यत आह शंकते। कथं तर्हीति। शक्तिभ्रमादिति। भ्रमप्रमासाधारणशक्तिज्ञानत्वेन हे
तुत्वादिति भावः। ननु भ्रमेपत्वादिना शक्तिज्ञानेऽपि शाब्दबोधानुदयात् शक्तित्वेनाज्ञाने हेतुः। शक्तित्व राम
वत्तादृशेश्वरसंकेतत्वात् तथा च पामराणामीश्वरज्ञानात्संकेतस्य ईश्वरसंकेतत्वेन ज्ञानात्कथं शाब्दबोध २४

कात्तिदितित्र्येभ्येष्वारूपसंकेतस्तानाभावादितिभावः। तस्यापि· आधुनिकसंकेतितत्वेत्रापि
शब्दस्यापि· ईश्वरेति· तादृशा [illegible] तत्कालीनपित्रुद्धदितत्नामहर्षिनामवान्यः शिशुः
शंकते३ ·म२ इत्याकारकेश्वेवेष्वेतात्तादृशाभ्युत्थितिप्रलापनात्तत्रावीश्वरसंकेते३

इत्याशंकते। कथंतर्हीति। ईश्वरमविदुषामिति। पामराणांमीमांसकानांचेत्युभयपक्षान्वेतित्ति। तथेति। संकेतात्वेनेत्य
र्थः। तेषामपिसंकेतत्वप्रकारकज्ञानसत्वादितिभावः। चैत्रशब्दादर्थबोधोद्भवइत्याधुनीकेनेच्छाविषयाणांचैत्रा
दिशब्दानांचशक्तत्वापत्तिः। तत्रेश्वरसंकेताभावादित्यत्र। आधुनि[illegible]केतित[illegible]तोस्तीतिभावः। ईश्वरी
यज्ञानस्येच्छायाः कृतेर्वाशक्तिरूपत्वमितिविनिगमनाविरहस्तिरित्वेवशक्तिरितिनव्याः। संकेतग्राहकप्रमाणप्र
भावेनसंकेतग्रहासंभवात्कथंशक्तिज्ञानहेतुरितिचाशंकांसमादत्तदिति। कथंग्राह्यः। केनप्रमाणेनग्राह्यः।
शंकतेउपमानादित्ति। तित्तस्यातिदेशवाक्यार्थज्ञानरूपोपमानस्यावाक्यार्थज्ञानेति। गोसदृशोगवयपदवा
च्यइत्यतिदेशवाक्यार्थज्ञानेनतावच्छाब्दंचगोसदृशइतिवेडवाक्यार्थज्ञानेसतिस्यादित्यर्थः। तस्मिन्गोसदृ
शइतिवाक्यार्थज्ञानस्यशक्तिग्रहमूलकत्वात् गोपदेगविशक्तमितिशक्तिज्ञानमूलकत्वादित्यर्थः। तथा
चशक्तेरप्युपमानागरात्यग्रहेऽनवस्थापत्तिरितिभावः। व्यवहारादिति। प्रयोज्यप्रयोजकव्यवहारादित्यर्थः। व्य
वहारश्चघटानयनादिक्रियारूपः। केनचित्प्रयोजकवृद्धेनकथनप्रयोज्यवृद्धंतदर्थप्रयोजकवृद्धवाक्यार्थे
घटमानयेति। घटानयनानुकूलचेष्टावान्भवतितयाक्रियया घटानयनक्रियपातस्यप्रयोज्यवृद्धस्यप्रयत्न

तर्कसं मिति। इयं क्रिया प्रयत्नपूर्विका विलक्षणक्रियात्वात् मम क्रियावदनुमिनोतीत्यर्थः। ज्ञानं घटानयनगोचरज्ञानो
२५ ऽयं घटानयनगोचरः प्रयत्नः घटानयनज्ञानजन्यः घटानयनगोचरप्रयत्नत्वात्। स्वीयस्तनपानगोचरप्रयत्नव
त्। यो यद्गोचरप्रयत्नः स तज्ज्ञानजन्य इति सामान्यमुखी व्याप्तिरतो न दृष्टान्तासङ्गतिरिति॥ दृष्टान्तमेवाह। स्वप्रयत्न
इति। स्वीयस्तनपानगोचरप्रयत्न इत्यर्थः। तेन बालेन तथानिश्चयात्। ज्ञानजन्यत्वनिश्चयात्। तद्धेत्वाकांक्षायां
घटानयनगोचरज्ञानहेत्वाकांक्षायां शब्दमेव घटमानयेति शब्दमेव। आवापोद्वापाभ्यामिति। आवापः संग्रहः
उद्वापस्त्यागः। यथा घटमानय पटं नयेत्यादि। कृते च तस्मिन्निति। घटपदे घटधीजनकत्वे निश्चये कृते। अतिप्रसं
गभंगायेति घटपदे घटधीजनकमिव पटधीजनकमपि स्यादित्यतिप्रसंगभंगायेत्यर्थः। वस्तुतस्तु। अतिप्रसं
गभंगाय अगृहीतशक्तिकानामपि घटशाब्दबोधापत्तिप्रसंगभंगायेत्यर्थः। तज्ज्ञानानुकूलं घटधी। जन
नानुकूलं किमनुपपन्नमिति। तदर्थविषयकशाब्दत्वावच्छिन्नं प्रतिज्ञायमानं तच्छक्तपदत्वेन कारणत्वान्नाति
प्रसंग इति भावः। नन्वेवं व्यवहार एव शक्तिग्राहक इत्यापाते। इत्थं च शक्तिग्रहं व्याकरणोपमानकोशाप्तवा राम
क्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः इति प्राचीनगाथाविरोध इत्यत आ २५

ग

हात्तदनंतरमिति ॥ आद्यशक्तिग्रहानंतरमित्यर्थः ॥ व्यवहारात् ॥ गवानयनगोचरप्रयोज्यप्रयोजकवृद्धव्यवहारा
त् ॥ पूर्वं तु घटानयनगोचरव्यवहार उक्त इति नाभेदः ॥ अनवस्थाभियापूर्वव्यवहार एव शक्तिग्राहकः ॥ तत्र व्यवहा
रे गाउपमानेनवा शक्तिग्रहो जायत इत्यनेनास्माकमाग्रह इति न प्राचीनगाथाविरोध इति भावः ॥ उपमानादिति ॥
अनवस्थाभियापूर्वव्यवहार एव शक्तिग्राहकः ॥ तत्र व्यवहारे गाउपमानेनवा शक्तिग्रहो जायत इत्यनेनास्माक
माग्रह इति न प्राचीनगाथाविरोध इति भावः ॥ उपमानादिति ॥ गोसदृशो गवयपदवाच्य इत्युपमानाद्गवयो ग
वयपदवाच्य इति शक्तिग्रहो दयादित्यर्थः ॥ शब्दादिति ॥ आप्तवाक्यादित्यर्थः ॥ कोकिलपिकपदवाच्य इति
आप्तवाक्यात्पिकपदादेः कोकिले शक्तिग्रहादिति भावः ॥ व्याकरणादिति ॥ प्रकृतिप्रत्ययादीनां शक्तिग्रहो व्या
करणादित्यर्थः ॥ कोशादेरिति ॥ अथैकदंतहेरंबौ लंबोदरगजाननौ इत्यत्र गणेशत्वविशिष्टे शक्तिग्रह इत्यर्थः ॥
नित्यत्र गणेशत्वविशिष्टस्य पदार्थत्वे तथा पदार्थस्य पदार्थतावच्छेदकस्य वा भेदाभावात्कथं द्वैध इत्याति वे
न ॥ कोशस्य शक्तिग्राहकतया इदं पदमत्र शक्तमिति शक्तिग्रहस्तस्माद्दुदयेन तत्र पदानामेव पदार्थ
त्वापन्नेदसत्वात् ॥ आदिपदाद्वाक्यशेषविवरणप्रसिद्धपदसामानाधिकरण्यग्रहः ॥ वाक्यशेषाद्य

रा मः लं

विशिष्टस्यवाव्यवहारस्योभयत्राविशेषादिति संदेहे वस्तेतेसर्वसिस्थानांनायत्वेपक्षतानंमोदमानाभ्युते स्थितियवाकाणस्थितादिनः निवाद्यशेषादीर्घशक्य

कं २

तर्कदी २६ ष्या ॥ एवमपस्वर्गमेवतीत्यत्र यवृशब्दस्येवं च प्रसिद्धेर्मालोके गोर्वाचकः । आर्यव्यवहारदर्शनादीर्घशक्यं

विशिष्टशक्तिनिर्णयः ॥ न च वेदे दीर्घशूकविशिष्टशक्तिबोधने पिकेग्वादौ शक्तिमत्वे बाधकाभावः ॥ ना

नार्थत्वेनापि वेदोपपत्तेरिति वाच्यं ॥ अन्याय्यत्वानेकार्थत्वमिति न्यायेन वेदस्य बलवत्वान्नैव शक्तिपरिच्छे

दात् ॥ एवं पक्षे दुःखेन संभिन्नं न च ग्रस्तमनंतरं । अभिलाषोपनीतं तत्सुखं स्वःपदास्पदं इत्यर्थवादात् देव

स्वःपदशक्तिग्रहः ॥ ननु दुःखासंभिन्नत्वं दुःखासमानाधिकरणत्वं आदावंते च दुःखेनासंभवात् ॥ ना स

पि दुःखासमानकालीनत्वं ॥ अस्मदादिसुखेपि तथात्वात् निवानंतरमित्यस्याविरलल ग्नप्रवाहात्मक

कतयाविरलग्नप्रवाहस्य दुःखासंभिन्नमोक्षप्राप्त्यानातिव्याप्तिरिति वाच्यं ॥ अस्मदादिसुखस्यापि कतिप

य कालावच्छेदेन तथात्वसंभवात् ॥ चक्रवर्तिसुखे तथात्वसंभवेन अभिलाषोपनीतमित्यनेनापि तन्नि

रां रासासंभवात् ॥ अन्यथाविशेषणांतरवैयर्थ्यापत्तिरिति चेत् ॥ अत्र केचित् एकजन्मावच्छेदेन दुःखा

संभिन्नत्वादिकं नानैव ग्राकानावच्छेदकमित्याहुः ॥ तन्न नानार्थत्वकल्पने गौरवात् ॥ तथात्वे पि ग्राह राम

कत्वाभावाच्च ॥ केचित्तु यावति न वै यर्थ्यं तद्वग्राकानावच्छेदकमित्याहुः ॥ अपरे तु दुःखासंभिन्नत्वा २६

दिकं न शरीरावच्छेदकं। किंत्वधर्माजन्यशरीरजन्यसुखत्वोपलक्षकमिदं। योगिनां तु नाधर्माजन्यं शरीरं
तत्र दुःखोत्पत्तेरधर्मजन्यत्वात्। सुखमात्रावच्छेदके तच्छरीरे मानाभावात्। अथ मरणस्य दुःखनियतत्वा
त्स्वर्गिशरीरेपि मरणाजन्यदुःखसंभवादसंभवः। न चर्त्तिनराः सुखमर्त्यैव इत्यनेन विरोधः।। तस्य दुःखोत्
त्पत्त्यादिति चेन्न। अनुकूलतर्काभावेन मरणस्य दुःखनियतत्वे मानाभावात्। भावे वा मरणादुःखजन
काधर्मान्याजन्यशरीरजन्यसुखत्वस्य प्रवृत्तिनिमित्तत्वात्। एतेन स्वर्गेपि पतनभीतस्येति श्रवणात्स्वर्गि
योनिपुण्यक्षयशोकया स्वर्गेपि दुःखोत्पत्तेः संभव इति निरस्तं।। तदन्यत्वेनाद्य धर्मस्य विशेषणीयत्वं। स्व त्वा।
र्गिशरीरस्य सुखमात्रावच्छेदकत्वेन तत्र दुःखधीः भ्रांतैव।। अत एव तद्धर्ममात्रजन्यमेवेति दत्तविशेषणो
पि हानिविरहाच्चेत्याहुः। अविरलप्रवाहिचिरस्थायीच्छामात्र दुःखेपि निर्दुःखासंभिन्नसुखत्वं शक्यताव
च्छेदकं। तत्प्रकारकबोधस्यानुभवसिद्धत्वादित्याप्याहुः। न च प्रयुक्तमिति प्रयुक्तत्वं चिरस्थायित्वं प्रवाहस्यानि
बोध्यं विवरणात्। यथा पचति पाकं करोतीति पक्षार्थककरोतिना सर्वाख्यातविवरणात्। आख्यातस्य य
त्नत्वविशिष्टे शक्तिः। यद्यपि पूर्वं चरितत्वाकास्य स्वसमानार्थकोत्तरोच्चरितत्वाकेनान्वर्थकयत्नापविव

तर्कप
२७

शास्य शक्तिग्राहकत्वान शब्दविषमाह इदंपदमत्र शक्तमिति शक्तिबोधकपदाभावात् तथाप्याख्यातपदं य
त्नत्वविशिष्टे शक्तं। यत्नत्वविशिष्टशक्तं करोतिधातुप्रतिपादितार्थकत्वात्। पाकत्वविशिष्टशक्तं पाक
पदप्रतिपादितार्थकपचधातुवत्। यद्धर्मविशिष्टशक्तं प्रतिपादितार्थकं भवति तत्तद्धर्मविशिष्टे श
क्तं भवतीति सामान्यमुखी व्याप्तिस्त्वानाभिमता। इह सहकारतरौ मधुरं पिको रौतीत्यत्र सहकारतरु
प्रसिद्धपदसमभिव्याहारेण पिकपदं कोकिले शक्तमिति प्रसिद्धपदसमभिव्याहारेण शक्तिग्र
ह इति ध्येयं। ननु कोशस्य शक्तिग्राहकत्वे गुणे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वतीत्यनेन शुक्ला
दिपदानां गुणे गुणविशिष्टे च शक्तिप्रतिपादनात् गुणविशिष्टेपि शक्तिः स्यादिति चेन्न। अनन्यलभ्य
स्यैव शब्दार्थत्वात् शुक्लादिपदानां गुणविशिष्टे लक्षणयैवोपपत्तौ न तत्र शक्तिः कल्प्यते असति बा
धक एव च कोशस्य शक्तिग्राहकत्वात्। अत एव वैयाकरणानामाख्यातस्य कर्तरि शक्तिप्रतिपादने लाघ
वात्॥ कृत्वावेव शक्तिरित्यपेव हस्यत इति दिक्॥ तयोः प्रयोज्यप्रयोजकवृद्धयोः पश्यता बालेनान्य

राम·
२७

योः स्वपूर्वकालीनप्रयोज्यप्रयोजककक्रुद्धयोः अनवस्थेतितयोर्व्यवहारो ह्यन्योन्यव्यवहारपूर्वक एवेत्यन
वस्थापत्तिरित्यर्थः। इयमनवस्था बीजाङ्कुरवत् अनाघनवस्थानदोषाय प्रामाणिकत्वादिति भावः॥ नन्वसं
भवादिति। चेत्राद्योत्पन्नबालस्य स्वपूर्वकालीनप्रयोज्यप्रयोजकरूपव्यवहारादर्शिनो नाच्छक्तिग्रहासंभ
वादित्यर्थः। ननु संसारस्यानादित्वात् खण्डप्रलयाद्यभावेन सर्गाद्यकालाभावात् कथं तदसंभव इत्याशंक
ते॥ प्रलय इति॥ खण्डप्रलय इत्यर्थः। कार्यद्रव्येति। सृष्टिकालवारणाय कार्यद्रव्यानधिकरणेति। कालि
कसंबंधेन चानधिकरणत्वं बोध्यं। कार्यानधिकरणेत्युक्तौ च संभवः। खण्डप्रलयेपि परमाण्वादेः रूपक्रिया
सत्वादतः कार्यद्रव्येति। द्रव्यानधिकरणेत्युक्तौ वपि तथा परमाण्वादेः सत्वादतः कार्येति। कार्यद्रव्यानधि
करणेत्युक्तौ महाप्रलये तिव्याप्तिरतः कार्यानधिकरणेति। कार्यत्वं चात्र ध्वंसप्रतियोगित्वं तेन महाप्रलय
ध्वंसरूपकार्याधिकरणत्वेपि नातिव्याप्तिः। अभावातिरिक्तकार्यपरं कार्यपदं। सामान्यपदस्य विशेषपरत्वा
दित्यपि कश्चित्॥ महाप्रलयस्य चरमदुःखध्वंसादिरूपत्वात् प्रागभावप्रतियोगितासंबंधेन कार्याधिकरणत्वात्कालेति
कालिकसंबंधेनाधिकरणत्वबोधकं॥ भिन्नकालीनयोर्निधाराधेयभावइतिभावः॥ वस्तुतस्तु॥ प्रागभावादिरूप

कार्याधिकरणत्वात् गगनेऽतिव्याप्तेः कालेति ॥ आगमेति ॥ धाता यथापूर्वमकल्पयदिति वेदसिद्धत्वा
दित्यर्थः ॥ तथा च संसारस्य प्रवाहानादित्वेन तत्त्वनादित्वमेवेति भावः कालकपालान्यावृत्ति घटप्रागभा
वे कार्यद्रव्यानधिकरणे कार्याधिकरणावृत्ति ॥ अभावत्वात् गगनस्य वृत्तिघटात्पत्त्याभावत्वात् ॥ पूर्वत्रधर्मि
ताबलाच्च घटप्रागभावे ईदृशकालवृत्तित्वे सिध्येत्तावदुत्पत्तिपूर्वत्वमादाय पर्यवसानं त्वनुमानम
पि तत्साधकं बोध्यं ॥ शरीरं द्वयप्रयोज्यप्रयोजकवृद्धशरीरद्वयात् तथा पूर्ववत् ॥ संकेत घटपदादिकं केन
॥ नन्वेवं संभवति ईश्वरे मानमलं तदेवतु नेत्याशंकते ईश्वर एवेति ॥ शक्तिग्राहकाभावाच्छक्तिग्रहे घटा
दिगोचरप्रवृत्तिरनुपपत्तिरेव मानमित्यर्थः ॥ यद्यप्यर्थापत्तेर्नास्मन्मते प्रमाणांतरत्वं तथापि स
र्गाधिकालीनशक्तिग्रहः प्रयोज्यप्रयोजकवृद्धव्यवहारप्रयोज्यः प्रयो[illegible] प्रयोजकवृद्धव्यवहारान्यप्रयो
ज्यत्वे सति प्रयोज्यत्वात् यन्नैवं तन्नैवं यथा गगनादीति व्यतिरेक्यनुमानमेव तदानीमन्यवृद्धासंभवादी
श्वरसाधकमिति हृदयं ॥ मन्वादयस्तीति तथा च नेश्वरसिद्धिरिति भावः ॥ यद्यप्येतावता पि न संकेतग्रहानु
पपत्तिस्तथापि प्रसंगादीश्वरो पि साध्यत इति भावः ॥ तेषामिति ॥ कपिलमन्वादीनां सर्वज्ञत्वं संभवतु व्यवहा

तै

रहेतुत्वेपरेतूक्तेषोतथात्वएवविवादइतिभावः। ननुव्यवहारान्यथानुपपत्तिर्भवन्मतेईश्वरइवमन्मतेपि
षुसर्वज्ञत्वेएवमानेस्याद्धर्मिकल्पनातोधर्मकल्पनापाःलघीयस्त्वेनैवव्यवहारेति। एवमपिपूर्वस
र्गसिद्धसर्वज्ञत्वकमन्वादिस्वीकारेपिअनुपपत्तेरिति पूर्वसर्गासूर्वसर्गसिद्धसर्वज्ञकःस्वकल्पितघादिस्य
त्तदानततस्तत्रव्यवहारप्रवर्त्तनास्यात्तसएवतुनास्तीतिभावः। तत्रापिपूर्वसर्गेपि। अन्यएवेति। स्वपूर्व
सर्गसिद्धसर्वज्ञत्वकः। अन्यएवेत्यर्थः। तथाभावः व्यवहारप्रवर्त्तकत्वे। सार्वज्ञादिशालिएकोमनुर
एवसर्वमू[illegible]लमित्याशंकते। अस्त्वेकएवेति। सएवेति। सार्वज्ञादिशालीमनुत्वेनभवदभिमतइत्यर्थः।
तथाचनाम्निभेदेननतुवस्तु नीतिभावः॥ दिगिति॥ स्वोपादानगोचरजन्यापरोक्षज्ञानचिकीर्षाकृत्यज
न्यानिजन्यानिसकर्तृकानिकार्यत्वात्। घटवदित्यनुमानमपिईश्वरसाधकमवसेयं॥ ननुशाब्दबोध
शक्तिज्ञानस्यहेतुत्वेपिघटपदंघटेशक्तमितिशक्तिज्ञानकालेपटशाब्दबोधापत्तिः। नचतदाघटशाब्द
बोधस्यघटशाब्दत्वावच्छिन्नंजायतएव। पटशाब्दत्वावच्छिन्नस्यचापादकाभावएवेतिवाच्यं। योग्यताज्ञा
नादेरेवतदवच्छिन्नापादकत्वादित्याशंकते। स्यादेतदिति। ननुतदर्थविषयकशाब्दत्वावच्छिन्नंप्रतितद

तर्कसं २९ त्तोपस्थत्वेन हेतुत्वाल्पनानोक्तापत्तिरित्याशंकते ॥ अथेति ॥ तस्यैदेशांतरस्थस्य पुंसः तस्याएव काशिस्थगो
रेवाज्ञातत्वादिति ॥ असंनिकृष्टत्वादिति भावः ॥ गोः काशीवृत्तिरिति वाक्यजन्यबोधे काशीस्थगोरेव विशे
ष्यात् ॥ एवं च देशांतरीयपुंसः तादृशगोरसन्निकृष्टत्वेन तत्र शक्तेरग्रहात् शाब्दबोधानुपपत्तिरिति तद्वि
शेष्यक शाब्दत्वावच्छिन्नं प्रति तद्विशेष्यक शक्तिग्रहत्वेन कारणता दुर्वचेति शाब्दत्व शक्तिज्ञानत्वाभ्या
मेव कार्यकारणभावो वाच्य ॥ योग्यत्ताबलाच्चागृहीतशक्तिकव्यक्तेरपि भानमुपेयं ॥ एवं च घटपदात्प
टशाब्दबोधापत्तिर्जागरूकैवेत्यनुपपत्त्याशाब्दप्रमितिरनुमित्यंतर्गतैव एवं च घटपदान्न पटबोधाप
त्तिः ॥ तन्निरूपितव्याप्तिज्ञानादेरभावादित्याखंडलभावार्थो विस्तेयः ॥ अत्र शाब्दत्व शक्तिज्ञानत्वाभ्यां
पं कार्यकारणभावविचारे ॥ गो[illegible] एवेति ॥ गोत्वविशिष्टशक्तिस्वीकारेऽवश्यकत्वान्नागृहीतविशेषणान्या
येन गोत्व एव शक्तिः ॥ विशिष्टे शक्तिस्वीकारमपेक्ष्य विशेषणे शक्तिस्वीकारे लाघवात्तदिदमुक्तं विशेष्यं
नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे इति ॥ कथं तर्हीति ॥ व्यक्तेरशक्यत्वे इत्यर्थः ॥ लाभः बोधविषयता ॥ राम
अशक्यस्यापि शाब्दबोधविषयत्वोपगमे पदादेरपि बोधापत्तेरिति भावः ॥ नन्वाहेयो नुमानेंतर्गतं न संभवति २९

साध्यहेतुप्रयोगासंभवात्तथाहि। अयं गौः गोत्वादिति तावदनुमानमसंभवि शब्द[illegible]ज्ञानाभावात्। धि
गोत्वे गवाश्रितत्वे गोत्वादिति पक्षतावच्छेदकहेत्वोरैक्येन सिद्धसाधनत्वात्। अथ गोत्वं व्यक्त्याश्रितं जातित्वा
दित्यनुमानेन पक्षधर्मताबलात्सत्वाश्रयव्यक्तिसिद्धिरिति चेन्न। जातित्वादेर्लिंगस्य पदानुपस्थितेः व्याप्त्या
दिप्रतिसंधानमंतरापि व्यक्तिबोधस्यानुभवसिद्धत्वाच्चेति। कथमा[illegible]पाव्यक्तिलाभः इत्याशयेनाशंकते दी ४
ननु कोपमितिः। समाधत्ते। तस्येति। गवादिधर्मिण इत्यर्थः। अर्थापत्तिमेवाह। गोत्वे हीति। अनुपपन्न
मिति। आनयनाद्यन्वयेऽनुपपन्नमित्यर्थः। तमाश्रयं आक्षिपतीति। अनुपपत्तिज्ञानजन्यार्थापत्त्यां त्म ६
कज्ञाने व्याप्त्यादिज्ञानस्यानपेक्षितत्वात्। अत एव शतवर्षजीविनो गृहे भावः बहिःसत्वं विनानुपपन्न
इत्यनुपपत्तिज्ञानाद्यधिकरणेनापि शतवर्षजीवित्वे गृहाभावेन बहिःसत्वसिद्धिर्भावः। तथा च गोशब्दात् रि नि ४
त्वस्य शाब्दबोधः। व्यक्तेस्त्वनुमितिविषयत्वं अर्थापत्तिविषयत्वं वा। न तु शाब्दबोधे तस्याप्यवगमः। अ
हमते पदोपस्थिता एव शाब्दबोधं भासन्ते। यथा गामानयेत्यादौ। पदानुपस्थिता एव वा यथा पश्यतः श्वेति
मारूपं हेषाशब्दं च श्रावतः। खुरविक्षेपशब्दं च शृण्वतो धावतीति धीरित्यन्ने पदानुपस्थितानामेव शाब्द

तर्कप्र बोधविषयतात्तत्रशाब्दयामीत्यनुभवात् न तु केचित्पदोपस्थितानां विशेषपदानुपस्थितानामन्यर्द्धेऽन्वयरतीप
२० न्यायस्यभेदेऽनंगीकारात्। नच गौरिति पदाद्युगपदेव जातिव्यक्त्योः प्रतीतिर्व्याहन्येतएवंगोपदाद्धौ तथा
तत्र अनुपपत्तिज्ञानेन तत्त्वव्यक्तिधीरिति ज्ञानधाराकल्पने चेति गौरवमिति वाच्यं। गोपदस्य जातिमा
त्रवाचकत्वेसिद्धे युगपत्प्रतीतेरसिद्धेः। ज्ञानधाराकल्पनस्य च फलमुखत्वेनादोषत्वात्॥ यथा पञ्च
तीत्यत्र कृतिमात्रे शक्त्या व्याप्तेन न कृतिमात्रप्रतीतिः॥ कर्त्तुर्लाभस्त्वाक्षेपादेवात्र अन्यथा सकर्तृके
क्रियापादएवं विगतेस्तत्राऽपि कर्त्तरि शक्तिः प्रसज्येतां अन्यथा नभ्यलातत्रेन शक्तिरिति चेत् अत्रापि तु
ल्यत्वादिति ध्येयं। अनुपपत्तीति। गामानयेत्यादौ गोत्वस्यानयनेऽन्वयानुपपत्त्या व्यक्तेरादेपसंभवे
पि गोरस्तीत्यत्र गोत्वस्यास्तित्वेऽन्वयसंभवेनानुपपत्तिज्ञानस्यैवासंभावितयानतेन व्यक्तेर्ला
भसंभवइत्यर्थः। नत्वनुपपत्तिज्ञानं विनापि व्यक्तिबोधस्यानुभाविकतया तदनुपपन्ने रित्यर्थः
। तथा सति पचतीत्यत्रापि आक्षेपात् स्यकर्त्तरि शक्त्यापत्तेः॥ अनुभवस्य तुल्यत्वात्॥ अत एव गा राम
मानयेति विहाय गोरस्तीत्येवोक्तमिति॥ चिन्तामणिकृतस्तु॥ व्यक्तेरपदार्थत्वे तु बर्थसंख्यादीनां तत्र २०

नं२

पू२

न्वयासंभवः। सुब्विभक्तीनां प्रकृत्यर्थान्वित[illegible]स्वार्थबोधकत्वनियमात्। तिङः ष्यीसंख्यादीनां कर्त्र्यैव

त २ न्वयो[illegible]युक्तं[illegible]निवेशः॥ जातावेव शक्तिस्वीकारेपि पश्वादिपदे उपाधिविशिष्टव्यक्तौ तेषपि शक्तिस्वीका

रेणात्तत्रैव तन्नियमावधारणात्। न च प्रकृतिपदतात्पर्यविषय एव तदन्वय इति नियमः। लक्षणोच्छेदाप —

त्तेः। गौरवाच्च। नन्वयपत्तौ त्पन्न यथा आहृत्पलभ्येनैव कर्त्रा सर्वो[illegible]पः तथाहृत्पलभ्यव्यक्तेपाप्यतदन्वय न्व

प ५ स्यात्ताद्दृशनि[illegible]मस्य च तन्नैवानापि संकोचादिति वाच्यं तन्नापि चेन्न इति पदमध्याहृत्यैवान्वयबोधस्वी

कारात्॥ तदिदमुक्तं। अयमेव यद्वाहृत्योपसर्गमात्तपदोपस्थाप्यत्वेनामेति। अतः संकोचेनापपत्तौ व्युत्प

त्तिसंकोचे मानाभावाच्च। नह्येकत्र संकोचे त्पन्नापि सर्वव्युत्पत्तिमात्रोच्छेदापत्तिरिति। परन्तु गोपदस्य गो ना

द्दा त्वे शक्तिः व्यक्तौ तु ल[illegible]णेति मण्डनमिश्राः। तदुक्तं। जातावस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति। नित्यत्वा

ल्लक्ष्यमाणायाः व्यक्तेस्ते हि विशेषणाद् इति॥ २॥ अस्तित्वनास्तित्वे उत्पत्तिविनाशौ गौरुत्पन्ना गौर्नष्टे

त्यादौ गोत्वस्य नित्यत्वे उत्पादविनाशयोरसंभवाद्व्यक्तौ लक्षणा। तासर्वज्ञानसत्वेगगनापाघोषमृत्स्यो

त्त इत्येत्रैव युगपद्वृत्तिद्वयविरोधे मानाभावादिति गन्नाशकाद्रन्यै[illegible]रूपेणाज्ञातो भवति लक्षणापोतिऽथ

न२

त्या त्वदि

तर्कप्र था गंगायां घोष इत्यत्र तीरत्वेन ज्ञातैः [illegible]त्वव्यक्तिर्गोत्वादितिरिक्तेन रूपेणाज्ञाता व्यक्तित्वेन सा[illegible]मत्वेन ब
२१ ज्ञातेति नैव शाब्दबोधापत्तिः लक्ष्यतावच्छेदकरूपेणोपस्थितस्य भानं नियमात्। किंच जातिमात्रे शक्तिः व्यक्तौ ल
क्षणेति जरन्नैयायिकादि जातिमात्रमुख्यप्रयोगः [illegible] न वेदे किंच गां पश्य गौरस्ती[illegible]दौ मुख्यार्थान्वयानुप
पत्त्यभावेन लक्षणाया मानाभावाद्व्यक्तिबोधानुपपत्तिश्चेति ध्येयं तस्मादिति॥ अस्य विधापेक्षत्वदु
चितत्वादित्यर्थः॥ समानेति एकज्ञानविषयत्वमेवेत्यर्थः। इदमेव विशदयति। यावतीति। व्यक्तिप्रत्य
क्षं विना जातिप्रत्यक्षाभावेन तत्तद्व्यक्तिषु नियमावधारणादित्यर्थः॥ ननु प्रत्यक्षस्थले संयुक्तसमवाया
दिरूपजातिप्रत्यक्षसामग्री सत्त्वे संयोगादिरूपव्यक्तिभासकस्य सत्त्वादस्तु तथा। शाब्दे तु कथमेवमि
त्याशंकते॥ इदमेवेति। समानवित्तिवेद्यत्वमेवेत्यर्थः। जातिभानेति जातिविषयकशाब्दबोधे जा
त्री तिशक्ति[illegible]नस्य हेतुतया तद्बला[illegible]ति शाब्दबोधे जायमाने व्यक्तिरपि भासते तत्पदशक्[illegible]विषयक का ३
शाब्दबोधेन सदनिरूपित जातिशक्तिग्रहस्य हेतुत्वादित्यर्थः॥ इदं तु गुरुमते कुब्ज शक्ति स्वीकारे बो राम
ध्यं॥ तथा हि। तन्मते जातौ व्यक्तौ च शक्तिः परं तु जातिविषयकशक्तिज्ञानमेव जातिविशिष्टव्यक्तिवि २१

षयकशाब्दबोधे कारणं व्यक्तिशक्तिस्तु स्वरूपसदुपयुज्यते न च। तत्र जातिविशिष्टव्यक्तिशाब्दबोधे व्यक्तिश
क्तिज्ञानमेव कारणं। जातिशक्तिस्तु स्वरूपसदुपयुज्यत इत्येवं किं न स्यादिति वाच्यं। तथा सति देशान्तरस्थगोवि
शेष्यकशक्तिज्ञानाभावेन तद्बोधानापत्तेः। एवं च घटादिबोधापत्तिरपि न तत्पदशक्यविषयकशाब्दबुद्धिप्र
तितत्पदनिरूपितजातिशक्तिज्ञानत्वेन कारणत्वादिति कु[illegible]शक्तिवादनिष्कर्षः। ननु कुत्र शक्तिवादिमते त्र
व्यक्तिशक्तिज्ञानस्य हेतुतया तत्स्वीकारप्रयोजनाभावः। न च तथा सति जातिविषयकशाब्दत्वमेव जाति
शक्तिज्ञानस्य कार्यतावच्छेदकं योग्यतावलाच्च व्यक्तिरपि भासत इत्येवोपेयं। तथा च घटादेरपि भानाप
त्तिः। अशक्यत्वाविशेषात्। मन्मते च तत्पदशक्यविषयकशाब्दत्वस्यैव कार्यतावच्छेदकत्वेनानुपपत्त्य
भावादिति वाच्यं। जातिप्रकारकव्यक्तिविशेष्यकशाब्दबोधं प्रति जातिविषयकशक्तिज्ञानत्वेन कारण
शक्तिरे त्वे तत्तिविरहादिति। अलं कुत्र[illegible]वादिमतेनेत्यत आह पदमिति। तथा चेष्टापत्तिरिति भावः। कुत्र शक्ति
वादस्त्वेकदेशिवादिमतेन जिनां द्वयीकारे [illegible]यासिद्धान्तविरोध इति भावः। जातिशक्तिरेवेत्येव कारणं
व्यक्तौ कुत्र शक्तेः स्वरूपसदुपयोगित्वव्यवच्छेदः। अन्यशक्त्या जातिशक्त्या अन्यबोधने तत्पदशक्यव्यक्ति

तर्कप बोधने अतिप्रसंगः घटादिबोधनप्रसंगः तत्पदाशक्यत्वाविशेषात् । मन्मते च व्यक्तेरपि तत्पदशक्यतया
२२ व्यक्तिबोधनेन कापि क्षतिरिति भावः । उत्तरयति गोत्वशक्तेमिति । गोत्वप्रकारकगोविशेष्यकशाब्दबोधं प्र
तिगोत्वशक्तिज्ञानत्वेन कारणतया न घटादिबोधापत्तिरिति भावः । ननु गोत्वप्रकारकगोविशेष्यकशाब्द
प्रत्येव गोत्वशक्तिज्ञानस्य कारणत्वमुपपत्तौ घटत्वप्रकारघटविशेष्यकशाब्दबोधं प्रति तु नेत्यत्रापि निय
मकाभावः । अशक्यत्वाविशेषादित्यत आह । अन्यथानुपपत्तेरिति । गोपदाद् गौरिति [illegible] शिष्टस्यैव बोधः । न त
त्य तु घटत्वादिविशिष्टस्येति फलानुपपत्त्येत्यर्थः । तथैव गोत्वविशिष्टशाब्दबोधं प्रत्येव कल्पनात् । गोत्वशक्ति कां
ज्ञानस्य हेतुकल्पनात् । एवकारेण घटादिशाब्दबोधं प्रति तु न तथा हेतुत्वकल्पने फलाभावादिति सूचि
तं । अथवा पूर्वोक्तकुब्जशक्तिवादिमतेऽस्वरसं प्रकाशयति । [illegible]न्यथेति । अन्यथा कुब्जशक्तिस्वीकल्प
रेण घटादिशाब्दबोधं प्रति तु न तथा हेतुत्वकल्पने फलाभावादिति सूचितं । अथवा पूर्वोक्तकुब्जशक्ति
वादिमतेऽस्वरसं प्रकाशयन्नाह । अन्यथेति । अन्यथा कुब्जशक्तिस्वीकारे व्यक्तिबोधोपपादने अनुप राम
पत्त्योपपत्त्यभावेन व्यक्तौ कुब्जशक्तिस्वीकारे प्रयोजनविरहेण तन्मते प्रमाणाभाव इति भावः । तथैव गो २२

न न च शाब्दस्य त्वेन तथा नियमः। तथापि जातिभासकसामग्र्या [illegible] व्यक्तिभासकत्वे [illegible] द्यर्थः रपि कु
त्वविशिष्टबोधे प्रत्येवकल्पनात्। गोत्वशक्तिज्ञानस्य हेतुत्वकल्पनादित्यर्थ इति॥ वस्तुतस्तु जातिभास नोनरोध
कसामग्र्या एव व्यक्तिभासकत्वादिति। अग्रे च जातिशक्तिरेव व्यक्तिबोधकेति ग्रंथपर्यालोचनया तु अशक्ति
मादाय यत् पूर्वग्रंथसंगमनं गोत्वपदस्य व्यक्तौ शक्त्यभावेन तथा सतीत्यग्रिमदूषणदानस्य पक्षे पूर्वक
धा२ ल्पे समवितयाचनैव व्याख्येये न च यद्धेतिनिष्कृष्टमत एव तथा सतीति दूषणदानमिति वाच्यं। सदर्भीशुद्धे
रपरिहारात्। किं त्वन्यथैव तथा हि। जातिभानेति। जातिशब्दस्यैव जातिशक्तिज्ञानकार्यतावच्छेदकजाति
भाने च जायमाने अनुत्तरविषयकस्य तस्याभामाबात् व्यक्तिरपि भासते। यद्धियेन विना न भासते तत्तद्बोधस्य तद्बो कृ
न धकमिति [illegible] पर्यन्तं। जातिभासकसामग्र्या एव तद्बोधोपधायकत्वादित्यर्थः। ननु जातिविषयतां विना पि व्य
रि४ क्तिप्रत्यक्षोदयात् जातिभासकसामग्र्यां तिंक्ता व्यक्तिभासकसामग्र्यावश्यमुपेयानि च व्यक्तिबोधे समानवि श्र ४
त्तिवेद्यत्वमेव नियामकमिति वाच्यं। नहि व्यक्तिबोधे समानवित्तिवेद्यत्वेन कारणता तथा च व्यक्तिविषय
तायाः कारणानियम्यत्वावश्यकत्वे व्यक्तिशक्तिज्ञानमेव कारणमस्त्वित्यस्वरसादाह। यद्वेति। जातिशक्ति
ग्रहेत्येव कारेणाव्यक्तिशक्त्यवच्छेदः। तथा च व्यक्तिविषयतायाः जातिशक्तिज्ञानकार्यतावच्छेदकोत्येति

नि

तर्कभा [illegible]वेशान्नतस्याः कारणतानियमकत्वमिति भावः। गोत्वशक्तिज्ञानस्य घटबोधं प्रत्येव हेतुत्वमास्तामित्यत आह। अ
८३ न्यथेति। गोपदाद्धटस्य बोधं न तु घटादेरिति गोशाब्दं प्रत्येव हेतुत्वकल्पनादित्यर्थः॥ पद्य॥ ननु व्यक्तिशक्तिरेव जा
तिविशिष्टबोधकेत्येव किं न स्यात्। भवन्मतेऽपि तत्पा[illegible]शक्यापाः व्यक्तेरिव मन्मतेऽपि जातेर्भाने बाधकाभावादि
त्यत आह। अन्यथेति। अथवा ननु तत्पदशक्यबोधने ऽतिप्रसंगाज्जातिविशिष्टशक्तिरेव बोधिकेत्येव अ
स्तामित्यत आह। अन्यथेति। व्यक्तिशक्तिज्ञानकारणत्वे देशान्तरस्थस्य गोबोधानुपपत्त्या जातिशक्तिज्ञान
त्वेनैव हेतुकल्पनादित्यर्थः इति ध्येयं। तथा सतीति जातावेव शक्तिस्वीकारेण गोत्वविशिष्टविषयकशा
ब्दबोधं प्रति गोत्वविषयकशक्तिज्ञानत्वेन हेतुत्वस्वीकारे इत्यर्थः। गोत्वमस्तीति। गोत्वपदस्या[illegible] गोत्वप्र
क्तत्वेन गोपदगोत्वपदयोरविशेषात् गोत्वविशिष्टशाब्दबोधापत्तेरित्यर्थः। न च गोत्वे गोपदशक्य
मिति निर्धर्मितावच्छेदकक गोपदशक्तिज्ञानं गोत्वविशिष्टबोधे हेतुः। गोत्वत्वधर्मितावच्छेदकक
गोत्वपदशक्तिज्ञानं गोत्वत्वरूपेण गोत्वशाब्दबोधहेतुरिति नातिप्रसंग इति वाच्यं। गोत्वेन गोप
दशक्यमिति बाधकालेऽपि निर्धर्मितावच्छेदककशक्ति[illegible]नसंभवेन गोत्वविशिष्टशाब्दबोधापत्ति राम ८३
तेः।

रिति गोत्वत्वधर्मितावच्छेदककशक्तिज्ञानहेतुतायाः आवश्यकत्वात्। एवं च गोत्वत्वस्य शक्यतावच्छेदक
त्वावश्यकतया तद्रूपेण गोत्वजातेरेव तथात्वमुचितमित्यपि लाघवमवज्ञेयं॥ अथ गोत्वे निरवच्छिन्नैव
शक्तिः। गोपदं गौरित्याकारकशक्तिसंबंधेन स्वरूपाऽगोत्वप्रकारकगोपदत्वावच्छिन्नविशेष्यकशक्ति
ज्ञानं गोत्वविशिष्टबोधे हेतुरिति न बाधकाल्लेशः शाब्दबोधापत्तिः। गोत्वपदं गोत्ववदिति गोत्वत्वे गोत्वप्रका
रकशक्तिज्ञानं च गोत्वशाब्दबोधे हेतुरिति न गोत्वमत्तीत्यतो गोत्वविशिष्टबोधापत्तिरिति चेत्। तथापि
गोपदात्कदाचित्समवायेन गोत्वविशिष्टबोधः कदाचिच्च कालिकादिसंबंधेन तद्विशिष्टबोध इति
नियमानुपपत्तिः। गोत्वविषयकशक्तिज्ञानस्याविशिष्टत्वात्स्वजन्मते तु समवायेन गोत्वविशिष्टशा
ब्दबोधे प्रतिसमवायेन गोत्वविशिष्टशक्तिज्ञानस्य हेतुत्वेनानुपपत्तेरभावात्। न च तात्पर्यज्ञानान्निय
मात्तथा नियमः। तथा सति जातावपि शक्तिस्वीकारे प्रयोजनविरहात्। एवं गोत्वे गोपदशक्तमित्याकार
कस्यैव शक्तिज्ञानस्य तैर्हेतुत्वोपगमेन सिद्धांतभंगाच्चेति॥ एवमुपाधिप्रवृत्तिनिमित्तस्थले तैरप्युपा

त्य २

तर्कप्र २५ धिविशिष्टेशक्तिस्वीकारात्॥यथापशुपदस्यलोमवल्लाङ्गूलविशिष्टेशक्तिः॥तथाजातिविशिष्टेपिव्य
नुभवस्यतु[illegible]त्वात्नचजातेर्व्यक्तिवित्तिवेद्यत्वनियमात्व्यक्तेर्भानमुपपाद्यौऽतात्तादृशनियमाभावात्व्यक्ति
बोधार्थमुपाधिविशिष्टेशक्तिरितिवाच्यंनहिनियमबलादेवव्यक्तेर्भानंकारणनियम्यत्वात्कार्यस्य।तथा
चजातिविशिष्टबोधेजातिशक्तिज्ञानस्यकारणत्ववदुपाधिविशिष्टबोधेउपाधिशक्तिज्ञानस्यापिकार
णत्वस्यसुवचत्वादितिदिक्॥कुत्रशक्तिवादिनस्तुजातौव्यक्तौचशक्तिःपरन्तुजातिविषयकत्वेनैवज्ञाता
शक्तिःव्यक्तिविषयकशाब्दबोधेकारणंव्यक्तिशक्तिस्तुस्वरूपसदुपयुज्यते।नचैवंव्यक्तिशक्तिस्वीका
रवैयर्थ्यमितिवाच्यंतत्पदाशक्यस्यापिभानेघटादेरपिभानप्रसङ्गेनव्यक्तिशक्तिस्वीकारस्यावश्यकत्वा
त्॥तथाचगोत्वप्रकारकगोविशेष्यकशाब्दबोधंप्रतिगोत्वविषयकगोपदशक्तिमतीगौरित्याकारकं
शक्तिज्ञानंहेतुः॥नतुगोत्वविशिष्टविषयंगोपदशक्तिमतीगौरित्याकारकं।गोत्वमस्तीत्यादौतादृशगो
त्वप्रकारकशक्तिज्ञानाभावान्नगोत्वविशिष्टबोधापत्तिरित्याहुः॥तदसत्॥गोत्वविषयकगोपदश
क्तिमतीगौरित्याकारकस्यगोत्वविषयकत्वेनशक्तिज्ञानस्यहेतुत्वेगोत्वविषयकत्वस्यकारणतावच्छे राम २५

क

दवकोटौनिवेशेगौरवात्।अथमास्तुगोत्वविषयकत्वनिवेशस्तथापिगोपदशक्तिमतीगोरितिगोत्वप्रका
रकशक्तिज्ञानत्वेनैवगोत्वविशिष्टशाब्दबोधंप्रतिहेतुता।नचैवमविवादइतिवाच्यं।व्यक्तिविषयतायाःका
रणतावच्छेदककोटौननिवेशात्स्येवात्मत्तनिष्ठयोत्तादृशोत्तरस्थगोबोधानुपपत्त्यासमानविशेष्यकत्वेन
भावा कार्यकारणोसंभवेनलाघवेनचसमानप्रकारकत्वेनैवकार्यकारणभावोपगमादितिचेन्न।व्यक्तिवि
षयतायाःकारणतावच्छेदककोटावनिवेशेव्यक्तौशक्तिस्वीकारेवैयर्थ्यात्।नचतदस्वीकारेगोत्वप्रका
ज्ञा रकशक्तिज्ञानत्वेनैवहेतुत्वासंभवः।व्यक्तौशक्त्यभावेनशक्तिज्ञानस्यभ्रमत्वापत्तिरितिवाच्यं।शक्तिर्हि
नस्वरूपसतीशाब्दबोधहेतुः।अपभ्रंशादपिशाब्दबोधोदयात्।किंतुज्ञाता।तथाचयदंशेशक्तिज्ञानं
हेतुःतदेवशक्यमितिजातिवद्व्यक्तिः।वैशिष्ट्यंचशक्यमेव।अन्यथाव्यक्तावेवशक्तिःशक्तिज्ञानेचजा
तेरपिप्रकारत्वात्।समानप्रकारत्वेनैवकार्यकारणभावइतिजातावपिशक्तिरस्त्विष्यते।नचपदविषयक
त्वेनशक्तिज्ञानंहेतुःतदेवस्यशक्यमितिनियमाज्जातावपिशक्तिरितिवाच्यं।तर्हिपदविषयकत्वेनशक्ति

ग्रा व

तर्कप्र २५ ज्ञानस्य हेतुतातद्वेशकमिति नियमे शक्तिविषयकत्वेन शक्तिज्ञानस्य हेतुत्वं एवं व्यक्तिशक्तिस्वीकारे वि
नत्वादिति दिक्॥ नैयायिकमतं दर्शयति॥ तस्मादिति॥ गोत्वविशिष्ट इति जातौ व्यक्तौ वैशिष्ट्ये च शक्तिरित्य
र्थः॥ तत्रोपपत्त्यापकरणे कालयोरविजातौ व्यक्तौ च विशकलिततया शक्तौ गोत्वं व्यक्तिश्चेति बोधप्रसंगा
त्। ननु गौरिति॥ तथा च वैशिष्ट्येपि शक्तिः। एवमर्थपवसंयोगविशेषरूपाकृतौ तद्विशिष्टे चान गोत्वपद
शक्तिः॥ गोपदाज्जात्याकृतिविशिष्टस्यैव प्रतीतेः॥ तदुक्तम्॥ जात्याकृतिव्यक्तयः पदार्थ इति। एकश ६५
क्तिसूचनाय पदार्थ इत्येकवचनं॥ न तु तत्प्रकारकतद्विशेष्यकशाब्दबोधप्रतीतौ तत्प्रकारकतद्विशेष्यक
मंग शक्तिज्ञानत्वेन हेतुत्वमित्यायातं। तत्प्रकाशास्यो॥ विशक्तत्वमहात्तद्बोधानापत्तिरूपबाधग्रस्तमित्याश
शंकते नन्वेति॥ उक्तदोषः॥ शक्तिग्रहाविषयीभूतव्यक्तिबोधानापत्तिरूपदोषः॥ समाधत्ते गोत्वेति॥ त
थाच सर्वेषां विशक्तिग्रहाद्वृत्तिग्रहाविषयव्यक्तेरलीकतया न तद्बोधानुपपत्तिरिति भावः॥ सामान्य
लक्षणानंगीकारेप्याह॥ अस्तु वेति॥ एकत्रैव लौकिकसाक्षात्कारविषय एव॥ अन्यगवीति॥ शक्तिग्र रामः
हाविषयगवीत्यर्थः॥ ननु योग्यताबलाद्वृत्तिग्रहाविषयव्यक्तेरपि भाने बाधकाभाव इत्यत आह। अं २५

त्ति॥ अतिप्रसंगः गोपदाद्घटादेरपि बोधप्रसंगः। शक्तिग्रहाविषयत्वस्याविशेषादिति भावः॥ प्रत्यायकइ
ति। गोत्वप्रकारकगोविशेष्यकशाब्दबोधं प्रति गोत्वप्रकारकगोविशेष्यकशक्तिज्ञानत्वेन हेतुतया न घटा
दिबोधापत्तिः। पूर्वोक्तज्ञानत्वेनापि गोनिविशेषः। इह तु गोत्वेनैवेति द्रष्टव्यं॥ नन्वेकस्य प्रवाहत्वेन बोधस्य तीरतीरत्व
नेव योरभावाच्छक्यसंबंधरूपायाः लक्षणायाः एकस्या लक्ष्यतावच्छेदकत्वस्यापरस्य भवितव्यं लक्ष्यतावच्छेदक
त्ते विशिष्टलक्षणायाः अंगीकारे गंगायां घोष इत्यादौ स्वत्वस्यानुपस्थितस्यापि तीरत्वस्य शाब्दबोधे भान
प्रसंगः लक्ष्यतावच्छेदके शक्त्यभावेपि तादृशकार्यकारणभावबलादेव गोत्वभानं निर्वाहः लक्षणेव शक्तिकल्प
नेनेति संप्रदायमतेऽस्वरसं प्रकाशयन्नव्यमतमाह गव्येवेति॥ गोत्वात्ताकेवलव्यक्तौ शक्तिस्वीकारे
गोत्वोपपत्तौ जातिविशिष्टव्यक्तौ शक्तिकल्पने गौरवादित्यर्थः। न चैवमिति॥ एवं गोत्वे शक्त्यस्वीकारे घटा
देरपि बोधापत्त्या अशक्यस्य शाब्दविषयतया गोत्वबोधानुपपत्तिरित्यर्थः॥ गोत्वेति। गोत्वविशिष्टशाब्दबो
धं प्रति गोत्वधर्मितावच्छेदकशक्तिग्रहस्य हेतुत्वेनानतिप्रसंगादित्यर्थः। गोत्वस्य शक्तिस्वीकारे गोत्व
त्वधर्मितावच्छेदकशक्तिग्रहस्य हेतुतया गौरवाद्व्यक्तावेव शक्तिरिति ध्येयं॥ ननु जातिविशिष्टे शक्ति[illegible]

स्वीकारेणा शाब्दे व्यक्तिभानोपपत्तावपि वाक्यार्थरूपान्वयस्यापि शाब्दविषयत्वप्रसंगात्तत्रापि शक्तिः स्यात्॥ ववेष्टा
पत्तिः। जात्याकृतिव्यक्तयः पदार्थ इति अक्षपादीयसूत्रविरोध इति संप्रदायमते शंकते स्यादेतदिति॥ नन्व
भेदोपि शक्य एवेत्यत आह॥ तस्येति॥ जातिविशिष्ट एव शक्तिस्वीकारादिति भावः। ननु योग्यताबलात्सोपि
प्रभासत इत्याह। न चेति। अतिप्रसंगाद्घटादेरपि बोधप्रसंगात्। गोशक्तेहीति॥ इतरसमभिव्याहृतं गोपद
मित्यर्थः॥ गवान्वयेति॥ ननु गौः शुक्ल इत्यत्राभेदः गामानयेत्यत्रान्यविधः संसर्गो भासते इत्यत्र किं निया
मकमिति वाच्यं॥ अभेदान्वयबोधे समानविभक्तिकतत्तत्पदसमभिव्याहाररूपानुपूर्वीज्ञानस्य अन्य
थान्वये तदानुपूर्वीज्ञानस्य हेतुत्वादिति भावः। पदानां जातावभिधारूपा शक्तिः आक्षेपेण व्यक्तिलाभः।
अन्वयस्य चाक्षेपात्ताभासंभवात् शक्यबोधने चातिप्रसंगादन्वयेपि शक्तिः॥ इत्थं च जातावन्विते चाभिधा
रूपा शक्तिरिति भट्टमतं दूषयति मन्दाक्षिति। अन्वयविशिष्टशक्तिग्रहादभिधारूपशक्तिग्रहात्। अन्वये
पि वाक्यार्थरूपेऽन्वयेपि शक्तिरेव। अन्वयस्येति॥ गौः शुक्ल इत्यत्र वाक्यार्थरूपान्वयस्येत्यर्थः। अन्यल
भ्यत्वात्। अन्वयविषयकशाब्दबोधे तत्तदानुपूर्वीज्ञानत्वेन हेतुतया तद्बलादेवान्वयभानोपपत्तिरित्यर्थः॥

ः अन्वयविशेषमानार्थं तत्तदानुपूर्वीज्ञानस्यैव हेतुतायास्तवाप्यावश्यकत्वादिति भावः ॥ नन्वनुपलम्भेऽपि श
क्तौ बाधकाभावः स्यात् आह। अनन्यलभ्येति शब्दार्थत्वात्। शब्दशक्यार्थत्वादित्यर्थः ॥ ननु शक्यस्यैव शाब्द
विषयत्वमिति नियमादन्यलभ्यत्वेऽपि शक्तिरावश्यकी स्यात् आह। अन्यथेति। अन्यथा शक्यस्यैव शाब्दविष
यत्वमिति नियमात्तु न शक्तिकल्पने लक्षणेति। लक्षणापातेः बोधानुपपत्तिरित्यन्यलभ्यत्वात्तु न शक्तिः। श
क्यस्यैव शाब्दविषयत्वमिति नियमे तु तीरेऽपि गङ्गापदशक्तिमत्वे गङ्गेन लक्षणोच्छेदापत्तिरित्यर्थः ॥ इदमु
पलक्षणम् ॥ अन्वितेऽपि शक्तिस्वीकारेऽपि अन्विततावेन पदार्थोपस्थितिः। अन्वयप्रकारकशाब्दबोधस्य स्यात्
। न चैतदनुभवसिद्धं नन्वन्विते शक्तिः स्वरूपसदुपयुज्यते न तु ज्ञाता। जातौ तु ज्ञातैवोपयुज्यत इति तन्म
तनिष्कर्षः इति चेन्न। पदस्मिपकत्वेनैव ज्ञाता शक्तिरनुभवहेतुः तेनैव शक्तिरित्यन्वये शक्तिस्वीकारवैयर्थ्या
त् शक्यस्यैव शाब्दविषयत्वमिति नियमस्य चलस्य व्यभिचारादिति रहस्यमनुसंधेयं ॥ केचित्तु ॥ भट्टमते
नाताऽन्वयाभिधानरूपशक्तिः अन्वितविषयकशाब्दत्वावच्छिन्नं प्रति घटपदज्ञानत्वेन कारणतेति घट
पदादौ अन्विते आनुभाविकी शक्तिः। नैय्यायिकमते त्वनुपूर्वीज्ञानस्यान्वितशाब्दत्वकार्यतावच्छेदकं

तर्कप ॥भट्टमतेघटपदशक्तिज्ञानस्येतिमतभेदात्॥अन्वयविशिष्टशक्तिग्रहणात्बालेनघटपदेनानुभाविकथ
२७ क्तेर्गृहीतत्वात्॥शक्तिरेवानुभाविकशक्तिरेवान्वितविषयकशाब्दत्वेघटपदशक्तिज्ञानकार्यतावच्छेदकमि
त्यर्थः॥अन्यलभ्यत्वात्॥अन्वितशाब्दत्वस्यानुपूर्वीज्ञानकार्यतावच्छेदकतयातत्कोटिप्रविष्टत्वात् [redacted]
त्यर्थः॥ [redacted]
॥अनन्यलभ्यस्यैवानुपूर्वीज्ञानादिरूपप्रकारान्तरालभ्य
स्यैवशक्यत्वात्॥घटपदशक्तिज्ञानकार्यतावच्छेदककोटिप्रविष्टत्वादित्यर्थः॥तथाचान्वयविषयशा
ब्दस्यानुपूर्वीज्ञानस्यकार्यतावच्छेदकत्वावश्यकत्वेऽन्वयविषयकशाब्दत्वस्यघटपदशक्तिज्ञानकार्य
तावच्छेदकत्वेमानाभावादितिभावः॥ननुशक्तिज्ञानकार्यतावच्छेदककोटिप्रविष्टस्यैवशाब्दविषयत्व
मितिनियमात्तथोपपत्तिआह॥अन्यथेति॥तादृशनियममभ्युपेत्यतथाकल्पनेलक्षणेति॥तादृशनि
यमाभ्युपगमेतीरविषयतापत्तिर्गङ्गापदशक्तिज्ञानकार्यतावच्छेदककोटिनिवेशात्ततएवतीरभा राम
नोपपत्तेस्तत्रलक्षणास्वीकारोनिरर्थकः॥वस्तुतोहिनत्वरूपसदुपयुज्यतेकिंतुज्ञातैवेत्याचक्षते॥तत्संदर्भ २७
ति

विरोधाद्युपेक्षणीयमत्रासामाकरात्त्विति।।कार्यान्वितेकृतिसाध्यानयनादावन्वितेत्यर्थः।।तत्प्रयोजकतया।।प्रवृत्ति
प्रयोजकतया।।कार्यता।विशिष्टज्ञानमिति।।कार्यता।कृतिसाध्यता।।तद्विशिष्टविषयकज्ञानमित्यर्थः।।अनुमिनोती
ति।प्रयोज्यस्येति शेषः।।अयंघटानयनगोचरकार्यता।विशिष्टज्ञानवान्।घटानयनगोचरप्रवृत्तिमत्वात्।।स्तनपा
नगोचरप्रवृत्तिविशिष्टमद्वदित्यनुमानाकारो बोध्यः।।अप्रयोजकत्वमाशंक्याह।।स्वप्रवृत्ताविति।।स्वप्रवृत्तौ स्वीय
स्तनपानगोचरप्रवृत्तौ।।तेन बालेन।।कार्यता।विशिष्टज्ञानस्य कृतिसाध्यत्वविशिष्टज्ञानस्य हेतुत्वावधारणा।।दिति
।।तथा च कार्यकारणभावएवानुकूलतर्क इति भावः।।तद्वत्वा कोत्वाया।।कार्यता।विशिष्टज्ञानकारणाजिज्ञा
सायां।।शब्दमेव घटमानयेति शब्दमेव।।तथा।।कार्यत्वविशिष्टज्ञानहेतुत्वेन।।त न्निर्वाहिको।।कार्यत्वविशिष्ट
विषयकज्ञानोपधायकत्वनिर्वाहिको।।कार्यान्वितइति।यद्यपि घटानयनगोचरप्रवृत्तौ घटानयनगोचरका
र्यता।विशिष्टज्ञानत्वेन हेतुत्वेन तु कार्यान्वितज्ञानत्वेनेति र्यान्विते शक्तौ बीजाभावः।।तथापि न केवलका का।३
र्यमिति ज्ञानात्प्रवृत्तिः किंतु घटानयनं कार्यमिति ज्ञानात्।।तच्च कार्यता।विशिष्टज्ञानं कार्यान्वितज्ञानमे
वेति तत्र शक्तिः।।एवमनाकलितघटपदस्य घटमानयेति वाक्यस्य कार्यता।विशिष्टज्ञानजनकत्वे कार्यान्वि

पदविभाग

तर्कप्र १८ त शक्तैव निर्वाहाँ च अन्यथैकपदस्यैव कार्यत्वविशिष्टे शक्तौ इतरपदस्य वैयर्थ्यात्। कार्यान्वितशक्तौ सर्वेषा
मपि कार्यताविशिष्टज्ञानजनकत्वं संभवति। कार्यताविशिष्टज्ञानस्य प्रयोजकत्वे च कार्यान्वितज्ञानस्यापि प्र न ७
वृत्तिप्रयोजकत्वान्नपपात्तः कार्यान्वित एव शक्तिः। न च कार्यतावाचकलिङादीनां कार्यान्वितशक्तत्वासंभव इ
ति वाच्यं। सर्वपदानां कार्यान्वयशालिबोधज्ञानजनकत्वात्। तद्वत् कार्यान्वितस्वार्थप्रतिपादकतया इतराभि
तकार्यप्रतिपादकतया वेति। तथा च कार्यान्वयशालित्वं कार्ये तद्भिन्ने चाविशिष्टमिति सर्वत्र कार्यान्विते श
क्तिरित्याखंडलार्थः॥ आवापोद्वापाभ्यां संग्रहत्यागाभ्यां प्रथममिति। शब्दसामान्ये कार्यान्वितज्ञानजन
ननिर्वाहकशक्तिकल्पनानुरोधादित्यर्थः। ननु लाघवात्तथात्वमपि तत्राह। आद्येति। शब्दसामान्ये का
या ४ र्यान्विते शक्तिकल्पनौ विरोधापत्तेरित्यर्थः। शब्दसामान्यस्य कार्यान्वित एव शक्तत्वे ऽवच्छेत्ते विधेरेव प्रा
माण्ये न त्वर्थवादस्येति दर्शयति। इष्येवेति॥ शब्दसामान्यस्य कार्यान्वितशक्तित्वे चेत्यर्थः। पत्रभूतो घटो ते २
स्तीत्यादौ। कार्यतावाचकेति। कार्यं वाचके पदे लिङ्लोट्तव्यः पंचमलकारः कृत्यश्चेति। विधिप्रत्ययाः राम
तासमभिव्याहारो नास्तीत्यर्थः। विध्यसमभिव्याहृतवैदिकवाक्यमर्थवादः। मूकमेव शाब्दबोधानुपधा १८

ता १

पकमेवानुवृत्तर्हि प्रवर्त्तकज्ञानाभावोऽव्याप्याद्यनुपपत्तिरत आह।व्यवहारस्त्विति।प्रवृत्तिस्त्वित्यर्थः।असंसर्गे
ति।असंसर्गाग्रहाभावात्।बाधाभावादिबलादिति यावत्।तन्मते सर्वत्र प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वानभ्यु
पगमादिति भावः।ननु शब्दसामान्यस्यैव कार्यान्विते शक्तत्वात्कार्यान्वितशक्तिस्तस्यैव च शाब्दबोधहेतुतया वि
धेरिव शब्दसामान्यस्यैव कार्यतावाचकपदत्वात्कथं सिद्धार्थे कार्यत्ववादिनां प्रामाण्यमित्याशङ्क्य तत्रान्वि
ति।कार्यतान्वितेति।कार्यताविशिष्टान्वितेत्यर्थः।कार्यताविशिष्टान्वितवाचकत्वादिति यावत्।तद्वाचकेति।का
र्यतावाचकपदस्येत्यर्थः।विधेरिव परसामान्यस्यैव कार्यतावाचकत्वादिति भावः।असंगतं चेति।सर्वस्यापि कार्य प६
तावाचकपदत्वात्कार्यतावाचकपदासमभिव्याहारस्य पुंसः प्रामाण्यकथमर्थवादस्येत्यर्थः।अन्यथापि प
दानां कार्यान्विते अभिधारूपैव शक्तिः घटादिपदानां कार्यान्वितघटत्वादिनैव पदार्थोपस्थितिः घटादिपदेन
कार्यान्वितविषयकशाब्दबोधजननी पेशाराविशेषणतया कार्यतोपस्थापकलिङादिपदस्य सहकारि
त्वाच्च न सिद्धार्थकार्थवादस्य प्रामाण्यमिति।कार्यान्विते अभिधारूपशक्तिमादायार्थवादस्याप्रामाण्यमुप
पादयितुं शक्यते।तथापि कार्यत्वोपस्थित्यर्थं हि घटादिपदानां कार्यान्वितेऽभिधारूपशक्तिः सा चावश्य

तर्कप्र पेक्षणीयलिङादिपदादेव जाते तिव्यर्थं घटादिपदानां कार्यान्विते अभिधारूपशक्तिकल्पनेन। एवं कार्यान्वि
२९ तत्वेन शाब्दबोधे अनुभवबाधश्चेत्यत आह अभिधारूपशक्तिमुपेक्ष्य आनुभाविकीं शक्तिमादाय समाधत्ते। आ नै
च्यत इति। आनुभाविका शाब्दानुभवजनिका। स्मारिका पदार्थस्मृतिजनिका। नवेति। कार्यान्वितविषयकशा
ब्दत्वावच्छिन्नं प्रति घटपदज्ञानत्वेन कारणतेत्यर्थः। स्मारिका चेति। जातिशक्तिज्ञानत्वावच्छिन्नं घटत्वजाति
स्मृतिः शक्तिज्ञानस्य बोधकविषयपदार्थस्मृतिहेतुत्वादिति भावः। ननु कार्यान्विते बोधे घटादिपदज्ञा
नस्य हेतुतया तत्त्वेन कथं नानुभवकजनकत्वमत आह। कार्यान्वयबोधे इति। घटादिपदेन कार्यान्वित
विषयकशाब्दबोधे जननीये कार्यतावाचकलिङादिपदजन्योपस्थितेः सहकारित्वादित्यर्थः। नार्थवादस्य
ग्री ४ ति। विशेषसा [illegible] सहकृताया एव सामान्यसामग्र्याः फलोपधानेन तत्तया कार्यत्वोपस्थापकलिङादिप
दाभावेन तज्जन्यकार्यत्वोपस्थितेः सहकारिणः अभावान्न शाब्दानुभवजनकत्वरूपप्रामाण्यं नार्थवादा
नामित्यर्थः। लाघवात्॥ कार्यान्वितघटविषयकशाब्दत्वापेक्षया लाघवात्। घटादिमात्र इति। घटविष
यकशाब्दत्वावच्छिन्नं प्रत्येव घटपदज्ञानत्वेन कारणत्वग्रह इत्यर्थः। नत्विति। ननु घटपदादेः कार्यान्वित राम
२९

तं

तविषयकशाब्दत्वं कार्यतावच्छेदकमित्यर्थः। अन्यलभ्यत्वादिति। कार्यतावाचकपदजन्यबोध[illegible]विषयत्वा
दित्यर्थः। घटविषयकशाब्दत्वावच्छिन्नं प्रति घटपदज्ञानत्वेन कार्यत्वविषयकशाब्दत्वावच्छिन्नं प्रति च लिङादि
पदज्ञानत्वेन हेतुता। यत्र च लिङादिपदसमभिव्याहारस्तत्र तादृशसमभिव्याहारादेव कार्यान्वयबोधः। यत्र तु न
तत्समभिव्याहारस्तत्र केवलं घटादेर्बोध इति अर्थवादस्यापि प्रामाण्यमिति भावः। नन्वन्यलभ्यत्वेन तत्र रूप
किं सत्संनिबंधकैतज्ञातं पदशक्यं स्यात्तर्हि अन्यलभ्यं न स्यादिति तर्कस्यानोत्थापनात्। तथा च यत्र [illegible]तो त
पस्थितं तत्र कार्यान्विते शक्तिग्रहे बाधकाभावस्तथापि संकेतग्रहप्रथममिति। प्रथमं लिङादिपदस्य कार्यत्वे शक्तिग्र
स्पूर्वं कार्यान्विते शक्तिग्रहोत्तरं घटपदज्ञा[illegible]नस्य कार्यान्वितविषयकशाब्दत्वे कार्यतावच्छेदकमस्त्वित्यर्थः
तत्। अन्यलभ्यत्वे। घटमात्रेति। घटविषयकशाब्दत्वं कार्यतावच्छेदकमस्त्वित्यर्थः। साकार्यान्विते शक्तिकल्प
नाबाध्यता। अप्रामाण्यग्रहविषयीक्रियतां। गौरवात्॥ घटमात्रे शक्तिकल्पनापेक्षया गौरवात्। ननु सा
मान्यतः प्रथमप्रवृत्तिकल्पनायाः बलवत्त्वेन कथं तद्बाध इत्यत आह॥ अपेक्षमिति। ननु प्रथमप्रवृत्तत्वस्य
व्यक्तत्वबलप्रयोजकत्वपाकथनेन बलवत्तमन्यत्राह॥ नहीति॥ यथा द्यादिति। शतयोजनं सर्वं द्र इति चेद्रपरिमा

८१

तर्कप्र ३० राव्योधकज्ञानोतिः प्रामाण्यादिस्पर्शः। तथात्वचक्षुरादिजन्यत्वस्वल्पतापाः अप्रामाण्यज्ञानवदन्यापिघटप्रदा
दे: कार्यान्वितघ[illegible]दौ शक्तिज्ञाने ऽप्रामाण्यकल्प्यत इति भावः॥ ननु चेदादौ शाब्दजन्यसङ्ख्यापरिमाणान
बाधात्[illegible]स्वल्पपरिमाणज्ञाने ऽप्रामाण्यकल्प्यते। प्रकृते च प्रथमे कार्यान्वितघटादिशक्तिकल्पने बाध
त ३ काभावान्न तद्बाधः। असति बाधके प्रथमप्रवृत्तत्वस्यैव बलवत्त्वेनेत्वादित्यत आह। चरमकल्पनायाम्
तिलाघवेति। कार्यान्वितघटादौ शक्तेरबाधेपि कार्यान्वितत्वविशिष्टघटत्वस्य घटत्वापेक्षया गुरुतया
शक्यतावच्छेदकत्वासंभवेन कार्यान्वितघटत्वावच्छेदेन शक्यत्वभावेन तेन रूपेण न च शक्तिकल्पने बाधः
स्यादेव तद्धर्मावच्छिन्नाभावाच्चेति[illegible] तद्धर्मावच्छिन्नप्रकारकज्ञानत्वमेव हि भ्रमत्वमिति भावः॥ ननु प्र
बुद्ध्यौ वा दिमत्वे घटत्वापेक्षया गुर्वीति गौरवज्ञाने सत्यपि केषुचिद्वादिमन्वास्तीति भन्नीस्वरूपात्स्य
ख्यागुरुधर्मस्य प्रतियोगितावच्छेदकत्वमुपपद्यते तथा गौरवेपि प्रथमप्रवृत्तत्वात्कार्यान्वितघटे श
क्तिः स्यादेवेत्यतः लब्धतु दुर्जन इति न्यायेनाह किंचैवमिति॥ एवं कार्यान्वितघटादौ शक्तिकल्पने श राम
क्तिज्ञानेन च शाब्दसामान्यजननीयकार्यतावाचकपदजन्योपस्थितेः सहकारित्वे चेत्यर्थः। अनुभव ३०

सिद्धत्वपनेन तद्रूपज्ञेयत्वे संचितोनस्यादिति। लिङ्गादिपदरूपकारणाभावादितिभावः न चेति। पदार्थोपस्थि
तिबाधाबाधाभावमात्रादेवव्यवहारादितिभावः। तदापत्तेः। अतःसंसर्गग्रहापत्तेः। कार्याद्यहो अनुभवसिद्धस्यापित्र
संसर्गानुभवस्यापलापे लिङ्गसमभिव्याहारेपि अपलापएवस्यादितिभावः। न चिष्टापत्तिरित्याह। तथाचे
ति॥ ननु प्रथमकार्यवित्त एव शक्तावधारणात्। नतत्सहकारिकार्यत्वावाचकपदरूपकारणाभावात्॥ वि
ध्यसमभिव्याहारस्थलेऽसंसर्गाग्रहएवोपपत्तेकारणाभावेकार्याभावस्यावश्यकत्वात्। विधिसमाहारस्थ [illegible] मिश्र
लेतु बाधकाभावेन शाब्दानुभवएवोपपत्ते अत एव शब्दप्रामाण्यमपीत्यत आह किंचेत्यादि। एवं कार्य
तावाचकपदसमभिव्याहारस्थले एव शाब्दानुभवस्वीकारस्यादिति। नादृशपदसमभिव्याहाराभावादिति भा५
।[illegible]भावः॥ ननु केषांचित्प्रामाण्यं पिलिङ्गसमभिव्याहृतपदमात्रापेक्षशब्दप्रामाण्यस्यादेवेति[illegible]
[illegible]ते षामंतेपुइष्टापत्तिरित्यत आह। तथाचेति॥ पुराणादीनामप्रमाणत्वं[illegible]गीकारेत्यर्थः॥ मिश्रैः वा
प्रामा२ चस्पतिमिश्रैः॥ बुद्धवंधुरिति॥ बुद्धेनैकस्यापि शब्दस्य प्रामाण्यमनुपपत्तेः॥ प्राभाकरैस्तुकस्यचिच्छब्दस्य
प्रमाणत्वांगीका[illegible]त्॥ तदुक्तं तत्वमित्यतउक्तं बंधुरिति॥ पश्चात्तैरनुभवसिद्धो व्यवहारभवोपलप्यत

रा। नं३

तर्कप इति वेदस्य प्रामाण्यमुच्यते तथा पुराणादेः प्रामाण्ये चेति तत्साम्ये बोध्यम्। एवं वद्ध्वा अनुभवसिद्धे पि त्रसंख
३२ गौ ग्रहमात्रं वदन्नुव र्णात्मकः शक्त्यत्र कार इति लिपिसादृश्यतो कारभकारयोः गोडलिप्या सादृश्ये न तत्र भाग्य
नयोः सादृश्ये बोध्यं। युक्तमुत्पश्यामइति॥ अनुभवानुरोधेनैव सर्वकल्पनात् तथा च लिङ्घसमभिव्याहृत
स्थले प्यनुभवस्योपपत्तौ न हत्वेन लाघवेन च घटत्वविशिष्ट एव शक्तिस्वीकरणमुचितमिति भावः॥ वस्तुत
स्तु॥ अतिप्रसक्तधर्ममादायान्वयव्यतिरेकग्रहासंभवात् अत्र स्थले कार्यत्वकारणतावच्छेदकधर्मग्रहमं
तरा कारणत्वग्रहासंभवे पि शब्दे ऽतिप्रसक्तधर्मसामानाधिकरण्येनापि तद्ग्रहः॥ यथा स्वर्गकामो यजेते
त्यादौ गंगास्नानादितो पि स्वर्गोदृष्टा स्वर्गत्वावच्छेदेन यागजन्यत्वासंभवेन वैजात्यस्य च प्रथममनुपस्थितेः
स्वर्गत्वयागत्वसामानाधिकरण्येन कार्यकारणभावग्रहः। तथा प्रकृते पि शब्दे कार्यान्वितज्ञानजनकत्वे
ग्रहे तेन तु कार्यान्वितज्ञानत्वावच्छिन्ने प्रतीतिस्वेतरपदसहकारादेवोपपन्नमिति न कार्यान्विते शक्तिरिति॥
पदं तावच्चतुर्विधं॥ रूढं यौगिकं योगिकरूढं योगरूढं चा तत्रावयवार्थशक्तिनैरपेक्ष्येण समुदायशक्तिमा राम
त्रेण बोधकः तद्रूढं। यथा गोपदं। यत्रावयवार्थ एव बुध्यते तत् यौगिकं। यथा पाचकादिपदं। यत्र यौगिकरू १२

नस्यपद्मत्वे ऽदित्याद्येन मलिसंज्ञादित्याद्येन प्रतिबंधकत्वेनाभावान्न हस्संवपद्मानुभवसामग्री सत्त्वासमस्यैव बोधोत्पत्तेः न तु कुमुदस्य सामग्र्यां असत्त्वांहि प्रत्वाभावेन प्रतिबंधकस्य
न्यत्र

व्यर्थयोः स्वातन्त्र्येण बोधः तद्यौगिकरूढं। यथोद्भिदादिपदं यौगिकत्वनिवेशे रूढ्यागविशेषो। योगरूढं पंकजादिपदं
। तत्र पंकजसमुदायः पद्मत्वविशिष्टे रूढो न वेति योगरूढौ विप्रपत्तिः। पंकजपदात्पद्मत्वविशिष्टप्रतीतये पद्मत्ववि
शिष्टे पंकजसमुदायस्य रूढिरावश्यकी पदान्तरानुपस्थितेर्वृत्तिसाध्यत्वात्। पंकजपदात् योगेन कुमुदस्यापि बो
धप्रसंगाच्च। मन्मते पिकबोधे ... केवलयौगिकार्थात् कुमुदबोधस्तत्र लक्षणया वा। ननु रूढिस्वीकारेपि
उद्भिदादिपदेन यत्र मित्रमिव पंकजपदात्कुमुदमपि बोध्येत योगसत्त्वात्। अत्र याचः यत्र योगरूढिस्थाने कार्थबो
धस्तत्र केवलयौगिकार्थबोधे रूढेः प्रतिबंधकत्वान्न कुमुदबोध इति॥ तन्नमाणिक्यम्॥ रूढ्यादि प्रमाताः स्वतः
पद्ममेव कार्दरूपव्यक्तिवाचकप्रत्ययेन पंकजनिकार्टं तयाऽनुभाव्यो ... बोधकं विना व्यक्तिवचनानां स वा६
र५ निहितविशेषपरत्वनियमात्। व्यक्तिवचनानां किंविशेषजिज्ञासापर्यकाणां सन्निहितः प्रथममुपस्थितइत्य
र्थः। तथाच पद्मतात्पर्येण पद्मत्वेन पंकजनिकर्तृत्वं पातहेव योगेनापि प्रतीयते न कुमुदमिति। रूढेर्न प्रतिबंधक
ज२ त्वं। यावाभावान प्रग्राहित्वा ... न कर्तृत्वाविरोधित्वाच्च। सिद्धेरनुमितिप्रतिबंधकत्वस्योनापत्तेस्त्वोक्ता मि३
रपि अन्यत्र ज्ञानादिति वदन्ति॥ अपरे त्वित्थं चिन्त्यते॥ पंकजकुमुदसमानयेत्यादौ ... पंकजपदस्य पद्मता
त्पर्याभावः कुमुदत्वतात्पर्यग्रहः॥ तत्र लक्षणां विनैव कुमुदबोधापत्तेः पद्मानुभवसामग्रीविरहात्ये
ना५

अथ योगरूढिर्यथा पंकजपदानुभवसिद्धं न तत् कुमुदे तात्पर्यविज्ञानं तत्र स्यात् योऽपरमितेत्येकुमुदेषु ... (marginal note, partly illegible)

तात्पर्याभावनिश्चयस्यैवात्र बाधकत्वेन बाधकं विना व्युत्पत्तिवचनानां संकोचे निश्चितविशेषपरत्वमिति न्यायसत्
वनितारात्। घटेन जलमाहरेत्यत्र सछिद्रघटस्य प्रथमोपस्थितत्वादन्यपवारणाय बाधकं विना तस्या
वश्यकत्वात्। तथा च रूढितः पद्मयोगस्य प्रथमान्वयानुपपत्तिपुरःसरैव कुमुदधीरिति न स्यात्। कुमु
दं पंकजं इत्यत्र कुमुदस्यैव प्रथमसंनिहितत्वसंभवाच्च कुमुदस्य [illegible] भिन्नपदोपस्थाप्यत्वेपि प्रथमो
पस्थितमात्रस्यैवापेक्षणीयत्वात्। अवयवापेक्षया समुदायस्य भिन्नत्वेन पद्मस्यापि भिन्नपदोपस्थाप्य
त्वाच्च। अथ कुमुदबोधस्तत्र शक्तौ वा सत्यां पंकजपदस्य कुमुदे लक्षणेति प्रवादस्तु [illegible]भावे दभिम
णायत्कीति चेन्न। तथापि पंकजनिकर्तृत्वस्य कुमुदे तात्पर्यग्रहकाले पुनःस्मृतपंकजपदेन शक्तौ दौप
व कुमुदोपस्थापनसंभवात् स्य च तात्पर्याभावनिश्चये [illegible] कुमुदतात्पर्यनिश्चये सत्वेन च पङ्क्ते ऽन्वया न५
संभवात्॥ अथान्यलक्षणानापत्तेरिति॥ पंतु॥ [illegible] पुनर्नानापदार्थानुसंधानपहेवाक्या
र्थविषयोगरूपोपस्थितिकल्पलक्षणायां पंकजनिकर्तृत्वस्य पदार्थतयान्वयरूपोपस्थितिकत्वमिति त
न्न। पंकजानि कर्त्तारमानयेत्यादौ वाक्यमात्र एव लक्षणापत्तेः। प्रत्येकशक्तैपके शक्तौ। वपायपत्तादि
वलाद्विशिष्टबोधाच्च लक्षणेति चेत्। [illegible] कृतेपि समाना। तस्माद्रूढित्वान्यतिवंधकत्वकल्प एवान् राम-

२१

लक्षणासंभवः।विशेष्यविपर्ययेपिसिद्धेरनुमितावित्यवरूढिज्ञानंप्रतिबंधकमिति।अस्तिपद्मत्वव्याप्यानुपप
त्तेनंतरंकुमुदधीरितिलक्षणाभवतो वक्तत्वेमुख्येएवेतितुभाति रून्मतेगतिरिति।।ननुपंकजपदस्य
पमेलक्षणावात्वावाकिंशक्तानुभावेवतद्वृत्तिकेनासंभवात्।।नचशक्यालक्ष्यसाधारणौरूढ्यभावेनाज
हत्स्वार्थोपास्त्यसंभवाद्युगपद्वृत्तिद्वयविरोधइतिवाच्यंसतितात्पर्येगंगायांघोषमत्स्यौस्तइत्यत्रेवम
येत्प ताकुन्नतेनसादोषत्वादिति।मैवं।शक्यबाधसंयुक्तेलक्षणेतिमुख्येबाधकाभावेनलक्षणायामनु
तानपेक्षतोकुमुदसाधारणाबोधापत्तेः।तात्पर्यानुपपत्त्यापत्तेः।अथपेक्षपतिवत्सलक्षणोपपादनेपिप
मकुमुदयोस्तुल्यत्वापत्तिः।लक्षणत्वाविशेषात्।तथाचपद्मानुपपत्तिप्रतिसंधानानंतरंकुमुद या
धीरितिसिद्धांतव्याकोपः।एवंधेनुपदमपियोगरूढमेवेति।ननुपद्मत्वमेवेतिप्रयोगोपाधिरस्तु
इतिचेन्न।पद्मत्वज्ञानेनप्रतिबंधकत्वमव्याहतंतदभावेनिवृत्तपद्मप्रयोगस्यकुमुदसाधारणबोध
दर्शनात्।रूढिज्ञानमेवस्वाभाववत्त्वसंबंधेनप्रतिबंधकमितिनव्यायोगपत्तयापपद्मत्वमपहाय

तर्की केवलावयवशक्त्या कुमुदे बोधोक्तौ किं लक्षणापाहुः हेतुर्योगप्रतिबंधकत्वमतो तथा सत्यभवेऽपि मणिकन्याते रूढेः
३२ प्रतिबंधकत्वादिति चेन्न। पद्मानितत्वेनोपस्थितस्य पंकजनिकर्तृत्वस्यान्वयनिरा[?]त्तत यावत्तन्नोपस्थितत्वस्थि
तये लक्षणागौरवात्। एवं पंकजपदात् स्थलपद्मबोधो लक्षणयैवास्थलपद्मे (विजाती) पद्मे वेति प[?]
त्तिसद्भावात्तौ स्थलपद्मत्वविशिष्टे वा पंकजपदस्य लक्षणा॥ यदि वानुगतप्रतीत्या जन्या पिपद्मत्वजाति पा२
तदूप५ स्तथापि त्वंतेनोपस्थितपद्मत्व[?]णा॥ अथ योगरूढ्यायोगार्थानन्वये[?] योगरूढ्या रूढ्यर्थः पद्ममेव बु पि५
ध्यत इति चेन्न। योगा[?]र्थं गतत्वेन पद्मस्योपस्थित्या[?]वाको लक्षणा त्वतन्नोपस्थितयेत दावश्यकत्वात्। निद्
पद्यपि शाक्यादन्येन रूपेण ज्ञाने भवति लक्षणेति न्यायात्। समुदायस्य पद्मत्वेन लक्षणा न तु तत्र मन्था
पिकर्तृबोधकपदद्वये सावोध्या॥ अत्रेदं चिंत्यं। स्थले पंकज[?]स्तत्र पंकजनिकर्तृत्वस्य पुनस्तात्पर्याभाव नि५
प्रहेतुदनन्वितपद्मत्वस्यासाकांक्षत्वमेव। पत्र वा प्रथममन्वयपद्मत्वेनाविस्थलपद्मानां सपर्य प्रहाने तत्र पुनः
स्थलपंकजपदात्त्वतन्नोपस्थितिर्लक्षणायोपपा। एवं च शक्त्या[?]वगतदातु उपस्थितिरास्तां अयोगरूढ्या न
अ२ योगार्थस्यानन्वयादिति[?]पि च[?]श्पने नाभिचरन्यजेतस्या हि बलवदनुबंधी इष्टसाधनत्वरूपविध्यर्थवि
रोधगणोभयमपहाय पद्याविशेष्यान्वयपत्तथा अयोगरूढ्या पविशेषणानन्वयेऽपि विरोध्यान्वये वाधकाभावः॥ रा७

निःछान २ ३२

योगार्थस्यैवविशेष्यत्वेचपंकजेन्दुमुदमित्यवृत्तसमासकोहतपालत्नगोनुपपत्तेरितिदिक् ॥ इदंबोध्यं आकाशप
दे२ दं निरवच्छिन्नैवशक्तिवृत्तीनामानन्त्यसाभावेनानुगमकधर्माननेपेक्षणात्तु ॥ नचवस्तुपस्थापितस्यैवशाब्दबो
धविषयत्वात्तद्वाच्यत्वंततःकथंभासतेतिवाच्यं ॥ नियमतोयद्धर्मवत्त्वेनोपस्थितेपत्रशक्तिग्रहस्तत्स्म
रणाजनकसंस्कारस्यतद्धर्मविषयत्वानियमेनतदुद्बोधकादेवतद्दशास्युद्बोधनियमेनाकाशपदशक्य पद८
स्यापितस्यभानात्तेथाहि ॥ शक्तिर्हिएकसंबंधिज्ञानमपरसंबंधिस्मारकमितिरीत्यापदार्थस्मारिका
येनरूपेणोचोपस्थितयोःपदार्थयोःसंबंधज्ञानंतद्रूपावच्छिन्नज्ञानात्संबंधांशोद्बुद्धसंस्कारसहकृता
वद्ध८ तद्रूपोद्बुद्धस्मरणात्तत्संबंधितावच्छेदकस्यापिजन्यतोजनकतावच्छेदककोटिनिवेशआवश्यक ।
अन्यथाहस्तिपकेचैत्रत्वेनोपस्थितेमद्रत्वेनोपस्थितेहस्तिनिसंबंधग्रहेमनुष्यत्वेनहस्तिपज्ञाना क ५
ऊजत्वेनहस्तिस्मरणापत्तेः ॥ तथाचयद्धर्मविशिष्टेशक्ति[illegible]नेतद्धर्मविशिष्टमेवतत्स्मारयतीति ॥ आ सा ८
काशमानेशक्तोवपिशब्दाश्रयत्वस्यस्मृतिसंभवः ॥ वस्तुपस्थाप्यस्यैवशाब्दविषयत्वेतेनत्वनतुलवस्तु
पस्थाप्यत्वस्यैतिलक्ष्यतावच्छेदकवत्शाब्दबोधविषयत्वमपि ॥ अत्रैवंगोत्वमपिशक्यंनस्याघ्रत्वादिपशो
व्यक्त्यैवसंस्कारवशाच्छिरोषणामस्मरणोलक्ष्यतावच्छेदवत्तानियतस्मृतेरनुपपत्तिःसमाहारेणशक्तिग्रहे

क

तर्क संस्कारविषयत्वाभावात्। किंचानन्यसंबंधेनाप्युत्पन्नसंस्कारोद्बोधे पदात्समृष्टत्तनाकस्मरणानुपपत्तिः। अनुभव
२१ विषयत्व त्तापि नियमेनानुभानसंभवाद्यदृष्टशक्तिरेव तत्तद्देशे पुद्बोधकत्वसंभवात्। उद्बोधकोत्तरानुसारेणाच
लत्त्वपतावच्छेदकवत्तनियतस्मरणानापत्तेः। तस्मात्सदान्वियतोपस्थितिः स्वसंबंधसाध्या। स च संबंधः परिशे —
षाद्वृत्तिरेव पर्यवस्यतीति पदान्वियतोपस्थितिर्वृत्तिसाध्येति नियमात्। न च शक्यमिति विंव्यतेत्तदा शब्दाश्र मा ८
यत्वेपितुल्यमिति चेदाश्रितात्तदपि शक्यपदनियमेन तत्तदुपस्थितिः आकाशः शब्दाश्रय इत्यस्याकाशप
दवाच्य इत्यर्थेनैवोपपन्नत्वान्नपर्यायत्वेपि सह प्रयोगानुपपत्तिः॥ वस्तुतस्तु कदाचि [redacted] रिक्तद्रव्यत्वेनाप्युपस्थितौर्ने नियता। तदुप
छ५ स्थितिरिति नातद्धर्मकधर्मेशाब्दबोधादेवतत्देशे पुद्बोधसंभवात्तत्तस्मान्नैः शाब्दबोधस्यचोपपन्नत्वाच्च
हिचसंस्कारस्यकदाचित्तद्देशेनोद्बोधस्तदा अस्तु वा पदाद्पिनिर्विकल्पकं। आकाशपदान्नैः प्रका
रकमेवस्मरणं शाब्दबोधश्चपदार्थान्तरमादापसविकल्पक एव। आकाशोद्रव्यं नित्यं च भिन्नं विभत्तु
पनीतस्संख्यामादायभिन्नप्रकारोपस्थितिसत्वादभेदान्वयो नानुपपन्न इति द्रष्टव्यं॥ अथाद्यं निताऽनुप राम

स्थितावपि विनिगमकाभावात्तद्वत्कां। अश्वत्वादिपदवन्नानार्थत्वेनाप्युपपन्नेः। एकत्र धर्मिण्यपि प्रव्यक्तिनिमि
त्तद्वये बाधकाभावात्। वस्तुतस्तु शक्त्यग्रहपक्षमेव शक्ततावच्छेदककलापवाह्वटत्वं वदूपान्तरेण बोधस्तु शक्ति
भ्रमात्कंबुग्रीवादिमत्त्वेनैव घटस्य। अत एवानियतोपस्थितिरपि शक्तिभ्रमात्कंबुग्रीवादिमत्तोपस्थितिव
दुपपन्नेति न नानार्थत्वमपीति॥ केचित्तु व्यक्तेरेवानुगतानतिप्रसक्ततया प्रयोजनाभावेन धर्मे शक्तिक न (
ल्पनमित्याहुः। निर्विकल्पकोपस्थिताकाशत्वाकांत्वादि नासंभवेन शाब्दबोधानुपपत्तेः। एकस्यैवे ना ५
ना॥ कात्वस्योभयार्थवादविवक्षापाविशेषतस्पर्थतत्त्वामादाय भिन्नप्रकारकोपस्थितस्वभावेनाकाशाद्व्यामित्यन्ता
भेदान्वयानुपपत्तिश्चेति। यदा निर्विकल्पकस्मृतिस्वीकारोऽनुचित इत्यन्ये इति दिक्॥ नन्वियता प्रबंधे
न पदस्तानेन शाब्दसामान्ये जननीये शक्तिग्रहः सहकारी पामराणां तदभावान्न शाब्दबोध इति विवे
चितं न चेदं संभवति। गंगायां घोष इत्यादौ गंगापदस्य तीरे शक्त्यभावेऽपि शाब्दबोधोदयादित्याशंक
ते नन्विति। तीरे इति। गंगातीरे गंगापदस्य शक्त्यभावादिति भावः। तत्त्वेन शक्तित्वेन प्रयोजकत्वात्तासां नि
शाब्दबोधोपयोगिनी किंतु वृत्तित्वेनेति प्रयोजिकेति पूर्वेणान्वितं वृत्तित्वं च क्तिलक्षणान्यतरत्वं॥

श १

पृ॰ नं १

लक्षणैवेति शाब्दसामान्ये वृत्तिज्ञानं हेतुस्तथा गंगापदस्य तीरे लक्षणारूपवृत्तिज्ञानसत्त्वात्तीरे शाब्द

तर्कप्र बोधो नानुपपन्न इति भावः ॥ ननु गंगायां घोषः प्रतिवसतीति व्यवहारदर्शनात् गंगापदस्य तीरेपि न श कथं २

३५ क्तिरिति चेन्न लक्षणोपपदार्थानामनन्ततया सर्वत्र शक्तिकल्पने गौरवात् शक्यसंबंधरूपा लक्षणा

कृतैवा एवं च एकसंबंधिज्ञानमपरसंबंधिस्मारकमिति रीत्या गंगापदजन्योपस्थितेः शक्यसंबंध

रूपलक्षणाजन्यत्वमपि क्लृप्तमेवेति लक्षणाजन्योपस्थितेः शाब्दबोधानुकूलत्वमात्रे कल्पते श

क्तिस्वीकारे त्वतिरिक्तधर्मिकल्पनमिति धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायेन तीरे ल

क्षणैव ॥ अथ शक्तिर्नातिरिक्ता किंत्वीश्वरेच्छारूपा सा तु क्लृप्तैव एवं च शक्तेरपि क्लृप्ततया तज्जन्यो

पस्थितेः शाब्दबोधानुकूलत्वमात्रमेवापि कल्पत इति न धर्मिकल्पनापि इति न्यायस्यावतारः। न चा

स्माच्छब्दादयमर्थो बोद्धव्य इत्याकारिकेश्वरेच्छा क्लृप्तैवेति वाच्यं। गंगापदात्तीरबोधोदयेनेश्वरेच्छा

यास्तादृशाकारत्वावश्यकत्वात् तस्याः सर्वविषयत्वात् न च लाक्षणिकपदेनानुभावकमिति गं राम

गापदात्तीरबोधानुदयात्तादृशाकारत्वमक्लृप्तमेवेति वाच्यं तथा सति गंगापदस्यानुभावकत्वेता ३५

दृशाकारकशक्त्यभावः। ता दृशाकारकशक्त्यभावे चाननुभावकत्वं तस्यान्योन्याश्रयादिति। अथ ता
दृशेश्वरोच्चारितत्वं शक्तिः सा च न तीरे इति तत्र लक्षणा वा। अत एवापभ्रंशेऽपि शक्तिर्भ्रम इति चे
न्न। ईश्वरोच्चारितत्वं हि न तज्जन्यत्वं अपभ्रंशादिसाधारणत्वात् कंठताल्वाद्युच्चारितत्वं। आधुनि
कचैत्रादिपदे तदभावात् द्वादशे हनि पिता नाम करोतीत्यादिना सामान्यतः नामत्वेन तदुच्चारणोपपा
दनेनापभ्रंशेऽपि न वैयर्थ्यादिनापभ्रंशत्वेन तदुच्चारणस्यापभ्रंशेऽपि सत्त्वात् ईदृक्पदस्यापि लाक्षणि
कत्वापातात् ईदृशेच्छयोच्चारितत्वं सत्त्वाल्लक्ष्येऽपि शक्तत्वापत्तेश्चेति चेत् अत्राहुः॥ अपभ्रंशादपि शाब्द
दयेनास्माच्छब्दादयमर्थो बोद्धव्य इत्याकारकेश्वरेच्छायास्तत्रापि सत्त्वात् ईदृशाकारकेच्छाया
न शक्तिः किंतु पदपदार्थसंबंधत्वविशेषिता [illegible] तथा च तस्याः नानातीरादिसंबंधत्वकल्पने गौ
रवादिच्छायाः संबंधत्वमाह [illegible] भूरिप्रयोगस्याभावाच्च न गंगापदतीरयोः संबंधत्वं किंतु प्रवाहसा
मीप्यस्यैवेति तीरे लक्षणैव न शक्तिरिति। किंचापि धेहीत्यत्र धारोपस्थापकपदानामनंततया विशिष्यानु
पूर्व्यस्थितेः पूर्वं घेतरपदमेवानुभावकं न तथा हत्तपदं तथा घोषपदप्रदाय वतीरान्वयबोधोपपत्तेर्न गंगा

कृस्या २

त कं ३६

पदेनातीरस्यबोधकमिति॥ तथाच गंगापदात्तीरबोधो जायतामित्याकारकतात्पर्यमसिद्धमेवेति दिक्॥ लक्षणांनि-
रूपयन्नुपक्षिपति॥ अथ नैपमिति॥ शक्यात् गंगापदशक्यात् प्रवाहात्। अशक्यस्य गंगापदेनाशक्यस्य
तीरस्योपस्थितिर्हि लक्षणेत्यर्थः। गंगापदेनाशक्तप्र प्रवाहोपस्थितौ तेन चान्वयानुपपत्तिप्रतिसंधानाने-
न गंगापदशक्यप्रवाहसंबंधितीरस्मरणं तेन प्रवाहेणैकसंबंधिज्ञानमपरसंबंधिस्मारकतया संबंधितीरमुपस्थाप्य-
ते तथाच सैवोपस्थितिर्लक्षणेति भावः। उपस्थितिहेतुर्हि वृत्तिरिति॥ पदज्ञानस्य पदार्थस्मारकता एक-
संबंधिज्ञानमपरसंबंधिस्मारकमिति नियमेन च संबंधी व्यक्तिरिव न तु तस्या उपस्थितिरूपत्वमित्यर्थः। से-
वेति उपस्थितिरेवेत्यर्थः। अशक्येति। गंगायां घोष इत्यत्र गंगापदाशक्ये तीरे तात्पर्यं गंगापदतात्पर्यं।
गंगापदात्तीरबोधो जायतामिति। आविषयत्वे तीरे इति तद्वल्लक्षणेत्यर्थः। शक्यतात्पर्यस्य लक्षणात्वा-
रणाय अशक्येति॥ अन्वयेति॥ घटमानयेत्यादौ घटकर्मत्वयोराधेयत्वरूपसंसर्गे तात्पर्यसत्वात्तात्पर्यस्य ल-
क्षणात्वे स्यादित्यर्थः। नचैवापत्तिरन्वयेन शक्तिर्न वा लक्षणेति सिद्धांतव्याघातात्॥ नचु शक्यसंबंधस्य राम-
लक्षणात्वे तत्त्वोकारेप्येवं दोष इति वाच्यं। अन्वयप्रयोजकसंबंधस्य समर्पितत्वाच्छाब्दबोधानुपपत्त्या गतत्वाच्छाब्द-

दि ३६

बोधानुकूललक्षणापात्तत्वाभावात्। अन्यथा गंगापदस्य मुख्यपरत्वेपि शक्यासंबंधस्फूर्तीरसत्वाल्लक्षणासिद्धत्वा
पत्तिरितिलक्षणापात्तत्वमूकत्वमेवोपेयमिति। तात्पर्यस्य लक्षणाते चान्वयेतात्पर्यस्य शाब्दबोधानुकूलत्वेन
नन्वेतच्छाब्दबोधोपयोगित्वपालक्षणापामुवीरत्वादिति ध्येयं॥ नन्वशक्यपदार्थे तात्पर्यलक्षणा। पदार्थत्वं
च पदजन्यप्रतीतिविषयत्वं विषयता च प्रकारता विशेष्यतान्यतररूपा। इत्थं च संसर्गस्य पदार्थत्वाभावादे
वनदोषइत्यत आह। किंचेति। तात्पर्येति। वक्तापदार्थोपस्थितो सत्यां शाब्दबोधे जायते न तु प्रतीतीच्छया वृत्ति
तत्वरूपतात्पर्यं निर्वाहो भवतीति तात्पर्यातिरिक्ता [redacted] व निरवशेषमुपेयाः। नहि स्वपमेव स्वानिर्वाहकमि
ति भावः। ननु वृत्तेः शाब्दबोधनिर्वाहकत्वमेवोपेयते। न तु तात्पर्यनिर्वाहकत्वमपि अत आह। शक्तेरपीति।
तथा च पत्तेः स्तात्पर्यात्मकत्वापत्तेरित्यर्थः। तथा सति शक्तिलक्षणयोरभेदापत्तिः। पदितात्पर्याच्छिन्न वृत्ति
रितिप्रवादात्तत्र पंचम्यर्थान्वयानुपपत्तेस्तन्निर्वाहकत्वपा शक्तिस्तदिति। किंचातिरिक्तलक्षणापामपि तुल्य
मिति भावः। अत्र पक्षपार्श्वरेखाहप्रशाले तात्पर्यात्मकत्वेऽश्वपि निरवस्थापि वक्तृसामान्यतात्पर्या
त्मकापत्तिरिति ध्येयं॥ स्वशक्येति। स्वेलासहिता यं पदं तस्य पदकं तत्संबंधोलक्षणेत्यर्थः। इदमेवोपपाद

त्वा

तर्क॰ दर्पति॥ अस्तिहितिा गंगायां घोष इत्यादौ खंगंगापदं तच्छक्यः प्रवाहः तत्संबंधः संयोगादिरूपस्तीरेऽस्तीति गंगापद
३७ स्यतीरे लक्षणेत्यर्थः॥ गौणीयाः क्वस्तेन रत्नवादिमृतत्वमवच्छेदग्यपलक्षणायामेवान्तर्भावेदर्शयितुं लक्षणावि
भजते॥ सा चेति॥ शक्यसंबंधरूपा लक्षणेत्यर्थः। तत्र गौणीलक्षयति। तादृशेति। तद्भिन्नेऽसंबद्धसमितनूत्नभूयोऽव
र्यवत्वेन सादृश्येन तात्मकः शक्यसंबंधो गौणीत्यर्थः॥ गौणीमुदाहरति। यथेति॥ वाहिकः वाहिकदेशोद्भवः
गोर्बली वर्द इत्यर्थः। अत्र वाहिके गवाभिदस्य बाधात्पदेन गोसादृश्यात्लक्ष्यते गोसादृश्यपदं गौर्गतजाड्यमांद्या
दिकमेव तथा च जडोमंद्श्च वाहिक इति शाब्दबोधः। एवं च लक्षणायैवोपपन्नो गौण्याख्या। तिरिक्ता वृत्तिर्नोप
तप यालक्षणायामेवान्तर्भाव इति भावादित्यपमाशयः॥ एवं सिंहो माणवक इत्यत्रापि गौणी लक्षणया सिंहसद
शोपस्थितो सिंहसदृशाभिन्नो माणवक इत्यन्वयबोधोऽवसेयः॥ शुद्धां लक्षयति। तदन्येति। तदन्या सादृश्या लट
प८ न्यशक्यसंबंधरूपेत्यर्थः॥ शुद्धामुदाहरति। यथा आयुर्घृतमिति। आयुःपदस्यायुर्जनके लक्षणा। तच्चायुःपदशक्य
संबंधो जनकत्वरूपो बोध्यः। तथा चायुर्जनकाभिन्नं घृतमित्यन्वयबोधो न तु शक्यादृशक्योपस्थितिर्लक्ष राम॰
णेति प्राचीनमते लक्षणायां कं पदं नानुभावकमिति प्रवादः संगच्छते। स्वजन्योपस्थितिसंबंधेन पदस्यानुभावकत्वाय। २

गंगापदजन्यतीरोपस्थितेरभावात् गंगापदस्यतीरानुभावकत्वात् किं[illegible]बोधपदस्यैव तच्छाब्दप्रतीतित्तदन्वयप्रतियोग्यु
पस्थापकपदत्वेन कारणत्वात् । न च तच्छाब्दप्रतीतित्वात् तत्पदजन्यपदार्थोपस्थितेर्हेतुत्वात् कथमेतदिति वाच्यं ।
तदर्थवाचकतत्पदनिरूपितशक्तिज्ञानजन्यतच्छाब्दबोधप्रतीतितत्पदनिरूपितशक्तिज्ञानत्वेन हेतुत्वेन तादृश
लक्षणाजन्यशाब्दबोधप्रतीतिं च तादृशस्वरूपसत्पदार्थोपस्थितित्वेनैव हेतुत्वेन क्लृप्तरूपेण हेतुहेतुमद्भावः
। शक्यसंबंधस्य लक्षणात्वे तु तीरोपस्थितेर्गंगापदजन्यत्वाद् अन्वयप्रतियोग्युपस्थापकतयानुभावकत्वं सं
भवत्येवेति तादृशप्रवादविरोधः ।। अथ मन्मते गंगापदात् स्वशक्यसंबंधेन प्रथममेव तीरोपस्थितिः न च
मते तु पुनः शक्यस्मरणा[illegible]त्स्मृतौ गौरवमिति चेन्न । पदस्य स्वशक्यसंबंधेनान्वयप्रतियोगिस्मारकत्व
स्याक्लृप्तत्वेन तत्कल्पने गौरवात् । स्मृतेन प्रवाहेण स्वसंबंधितीरस्मृतेरौचित्यादिति केचिन्मैवं गंगाप
दात्तीरानुपस्थितौ प्रसंगापनात् प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभंगापत्तेः । प्रकृत्यर्थोपस्थाप्या
पि विभक्त्यर्थान्वयेति प्रसंगात् । नन्वनुभवाबाधे प्रकृतितात्पर्यविषयेण स्वार्थान्वयबोधकत्वेपि तस्या भूमा

तास

तर्कः ३५ स्तानिवाचकु[illegible]र्पविषये शाब्दिनाभ्रमपदे[illegible]त्तरविमत्तमर्थान्वयापत्तेस्तस्माऽगाबद्दस्यापि तीरस्मारकत्वमे
वावश्यमुपेयं ॥ एवं च कुत्र शाक्यसंबंध एवं तीरस्मारकत्वेन कल्प्यते न तु शक्तिः । तां विनाप्युपपत्तेः । तथा च ।
न्वयप्रतियोग्युपस्थापकत्वाल्लाक्षणिकस्याप्यनुभवकत्वापत्तिरवशिष्यते । सापि पदानां स्वशक्यानुभवे
त्येवकारेणावधारणात् । अत एव पदार्थे[illegible]न सहस्व शक्यानुभावकत्वे [illegible] न कुत्राप्येकप
दार्थवृत्तीरानुभवसंभावात्लाक्षणिकपदस्यानानुभावकत्वमिति रीत्या वारणीयेति । वस्तुतस्तु ॥ उद्देश्य
विधेयभावेन लाक्षणिकेनानुभावकमित्येवात्रार्थः ॥ उद्देश्यविधेयभावे[illegible]न्वये शक्तिमत्त्वस्यैव प्रयोज ना
ते कत्वात् । अत एव लक्ष्यार्थस्य विधेयतया ऽभानादिध्यर्थस्य वाविधेयत्वेन भानेऽत्र विधेयपदः शाब्दार्थे इ
ति संगच्छते । किं च तेनु संयोगस्य पदसंयोगहेतुत्वतात्पर्यके तंतुः पटं करोतीति सर्वलाक्षणिकस्थले
न्वयानुभवापत्त्यापत्तेर्लाक्षणिकपदसमभि अनुभवकमिति तात्पर्यं प्रवाह ऽ किंचित्करः ॥ यत्तु शक्या
दृशक्यापास्थितिर्लक्षणेति मतेलक्षणावच्छेदकेलक्षणानां तीतिप्रभृतेव्याघातः शक्यसंबंधस्य लक्षणा रम
त्वमतेतुशक्यसंबंधस्य लक्ष्यलक्षणावच्छेदकीभूयसाधारण्यस्यैकस्याभावात्तदुपपत्तेरिति[illegible]ते ।
३८

इदं च शक्यार्थस्य लक्ष्यतावच्छेदकतायां द्रष्टव्यं

भवन्मतेपि यत्र लक्ष्यतावच्छेदकं लक्ष्योभयसाधारणः शक्यसंबंधस्तन्नानात्वे। तत्र लक्ष्यतामात्रव्यक्तितानिया
मकसंबंधेन तस्य लक्षणात्वोपगमे ममापि लक्ष्यमात्रव्यक्तिविषयतासंबंधेन तत्प्रयोपस्थितेर्लक्षणात्वोपग
मादिति। एतेन लक्ष्यतावच्छेदके लक्षणानात्वे तस्य लक्ष्यतावच्छेदकग्रहे शक्यसंबंधरूपलक्षणाग्रहो
नापेक्षित इत्यर्थः। पक्षे चोभयसाधारणः शक्यसंबंधस्तत्र लक्ष्यवृत्तित्वेनैव तत्संबंधग्रहापेक्षा न तु ल
क्ष्यतावच्छेदकवृत्तित्वेनापि शक्यतावच्छेदकविशिष्टशक्तिग्रहाच्छक्यतावच्छेदके पि विशेषणविधया
शक्तिज्ञानमपेक्षितमिति परास्तं॥ लक्ष्यमात्रवृत्तिविषयतासंबंधेनोपस्थितेपि शिष्टबोधप्रयोज
७५ कत्वं ममापि तुल्यत्वादिति। इदं चात्र बोध्यं॥ शक्तिलक्षणाज्ञानयोरेकस्यैव शाब्दकारणताभावे तु
याह॥ शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनिष्ठप्रकारतानिरूपितार्थनिष्ठविशेष्य
ताकत्वानुत्वेन शाब्दबोधं प्रतिकारणत्वात्। शक्तिसंबंधेन घाकसंबंधेन वा पदप्रकारकज्ञाने घा
तोः संसर्गत्वात्। शक्तित्वनिष्ठावच्छेदकतायाः पर्याप्तिः परं न निवेशनीयेन शक्यसंबंधेन पदप्रका

तर्क० ३९

एकज्ञानत्वस्यापि संग्रहः। परं तु पदप्रकारतानिरूपितायाः शक्तेः निष्ठा सांसर्गिकविषयतानार्थविशेष्यतानि
रूपिता तेन शक्तिसंबंधेन पदाभावप्रकारकबाधबुद्धिप्रतिबध्यत्वं न लक्षणाज्ञानस्येति बोध्यं॥ श
क्यसंबंधस्याविनाभूतत्वमेवेति प्राचः। तन्न॥ मंचाः क्रोशन्तीत्यत्राभावात्। तत्रापि तत्त्वमप्रमादाद्यावि
नाभावोपपादनेपि किमनेन शक्यसंबंधमात्रस्यैव लक्षणात्वौचित्यात्। विनाभूतेबोधकत्वतात्प
र्यज्ञानाभावेनैव वारणीयः। अनेकाविनाभूतसत्वेप्येकतरमानं तात्पर्यज्ञानबलादेवेति भवतो
वाच्यत्वात्। मंडपं भोजयेदित्यादौ तु रूढिपूर्विका लक्षणेति मीमांसकाः। मंडपपदस्य गृहविशेषे रूढि
ः। मंडपानकर्त्तरि च योगरूढिः समुदायशक्तिः योगः। अवयवशक्तिस्तत्र रूढेर्योपहारितेति प्र
बोदान॥ अवयवशक्त्या मंडपानकर्त्रबोधासंभवेन मंडपपदस्य मंडपानकर्त्तरि लक्षणा। गृहस्य
कर्तृसंबंधितावच्छेदकात्परगृहीतत्वेनैवत्वादिनाऽवयवबोधेन तु मंडपानकर्त्तृत्वेनेति। पंक
जमित्यादौ पद्मस्य रूपार्थस्य पंकजनिकर्त्तृत्वयोगार्थस्याविरोधादवयवशक्त्यैव पंकजनिकर्त्तृबोधः।

राम ३९

गि

।न नु शक्यार्थपरत्वे संभवति लक्षणाकल्पनमन्याय्यं न च रूढेर्योगापहारान्न तथेति वाच्यं कोयमपहारः
।न तावद्यौ[illegible]कार्थोस्मृतिः। रूढ्यर्थ इव यौगिकेपि स्मारकसंबंधस्य शक्तेस्तुल्यत्वात्। न च यौगार्थस्य म
म अस्मृतिः स इति वाच्यं। मंडपसमुदायेन पदार्थस्मरणात् तदवयवार्थस्मरणबाधकाभावात्। लक्षणा
पै पहेपि रूढ्य[illegible]न पदस्य संबंधिस्मरणात् तदवयवार्थस्मरणासंभवेन यौगिकार्थान्वयबोधसंभवाच्च। न च वा ४
स्या स्मृतौ प्यवयवार्थस्यान्वयबोधबहिर्भूतत्वमेव स इति वाच्यं। अयोग्यतापारूढ्यर्थस्यान्वयबोधानां
वा ५ वेपि यौगिकार्थबोधे बाधकाभावात्। अयमेव हि मंडपपदस्य सत्यपि योगे प्रयोगप्राचुर्याभावाद्देशतो रूढ वयव
नकल्प्यते। अयमन्नेनेकार्थोद्वादिपदादिव मंडपानकर्तुरवगमोपि कदाचित्स्यादिति चेन्न। तत्रैव प
सिद्धत्वात् पंक्तिर्भावेस्य द्व्यामि हा काजिम्यो वाजिनमित्यत्र वाजमन्नमामित्तारूपप्रश्नानि यौगाद्वा
जिपदेन विश्वेदेवा उच्यन्ते न तु रूढ्या अश्वा इति सिद्धान्तलक्षणं स्यात्। नास्ति विश्वेदेवेषु वाजिपदस्य
प्रयोगप्राचुर्यमस्ति। मंडपानकर्तरि कदाचिदपि मंडपपदस्य योगेन प्रयोगो नास्तीति तु न वैवाभिमतं

तर्कः तिमैवांमेऽपपद्मायद्मगृह्यविशेषस्स्येतितत्तदैवमेंऽपयोर्पस्थितिस्तत्तुन्तरेपिबलस्यर्थस्यात्तन्नेतरंस्मया
र्थस्यततोमेऽपानकर्तृत्वेनज्ञानस्येतियोगिकार्यस्स्येतिविशेषात्तदैवरूढयौगिकयोर्बलाबलेधीप्रवि
लंबितधीकृतमेवातथाचरूढ्यर्थस्यशीघ्रमुपस्थितत्वात्बलवत्त्वमीमांसाधिकरणन्यायेनयोगिकार्थस्यप्र
लेः करणावशात्प्रथममुपस्थितिस्तत्त्वरूढेयोगएवंबलीयानिन्यायथाग्निर्वसुभिःसोमोरुद्रैरिंद्रोमरुद्भिर्
र्गणाआदित्यैर्बृहस्पतिर्विश्वैर्देवैरित्यत्रप्रकरणावशाद्विश्वेदेवपदेनवसुरुद्रमरुद्। इत्यादयःसर्वेदे
रू वानामेवयोगेनस्स्यतिः। नतुरूढ्याप्र...रवापाढ्वप्रभृतिगणानामुपस्थितिः। एवंत्रिपपासिद्ध
ध्यानपतिमावैश्वदेव्यामिक्षावाजिभ्योवाजिनमित्यत्रवाजमन्नमामिक्षारूपंयेषांतेवाजिनइ
तियोगाद्वाजिनेपिविश्वेदेवदेवताकत्वंप्रकरणेनोपस्थितत्वात्ननुवाजिपदेनरूढ्याऽश्वानामुप
स्थितिरितिनामिक्षाधिकरणस्थितविरोधः। नचरूढयोगाद्बलीयस्त्वेनरूढ्यर्थधीरिवस्यादितिवा
वाच्यं। रूढ्यर्थयोगार्थयोर्द्वयोरुपस्थितावनुपस्थितौवारूढेर्बलीयस्त्वप्रकृतेनतुप्रकरणावरोधेनयो राम ४०

न चैवं मंडपादावपि योगार्थस्यैव प्रथमं स्मृतिसंभवेन न लक्षणेति वाच्यं अत्र प्रकरणादेरभावात् तद्रूढ्यर्थस्यैव प्रथमं स्मृतिरिति २
दा १

गार्थस्यैव स्मरणात् न तु रूढ्यर्थस्य प्रकरणेनोद्बुद्धसंस्कारस्यैव शब्दोद्बुद्धबोधशक्तिशब्देन प्रकरणसं
वलितेन योगार्थस्मृतिरेव जन्यते न तु रूढ्यर्थस्मृतिः किं तु रूढिपूर्विकालहरणा। एवं च यौगिकार्थस्य प्र
करणादुद्बुद्धतरत्वेन यौगिकार्थस्यैव बलवत्त्वान्न लक्षणा। यद्यपि प्रहृज्ञानमेवोद्बोधकं न प्रकरणा
दिकं तथाप्यत्र प्रकरणमपरस्मृतौ प्रतिबंधकमवसेयमिति वदंति॥ तन्न रूढ्यर्थान्वयबोधे वा
तत्स्मृतौ वा यौगिकार्थान्वयबोधे प्रतिबंधिकेन तावदाद्यः रूढ्यर्थस्य प्रथममुपस्थितत्वेपि तस्या
त ५ योग्यतया यौगिकार्थान्वयबोधे बाधकाभावात्। न द्वितीयः प्रकरणादिना एव यौगिकार्थान्वयबो
धस्तन्न रूढ्यर्थस्मृतेरभावात्तस्याः प्रतिबंधकत्वोपपत्तावपि तस्या यौगिकार्थस्मृतौ। इदं च प्रबोधे वा
प्रतिबंधकत्वे मानाभावात्। साक्षाद्विरोधिनो ज्ञानस्य जनकज्ञानविघटकत्वेनैव प्रतिबंधकत्वा
त्। अनुमितौ तु सिद्धिरगत्या पक्षबलेन तथात्वकल्पनात्। तस्माद्यत्र मंडपेन दृश्यगृहपरत्वेन मं
डपानकर्तृत्वरूपयोगार्थस्यायोग्यतया नान्वयबोधो न तु रूढ्यर्थस्मृतिस्तत्र प्रतिबंधिकायोग्यता

तर्की ऽपकृष्टप्रकारताविरहेपि वा तद्बोधोपपत्तेः। पचतु रूढ्यर्थस्य योगपतानन्तर्योगपतापायेगेन यौगिका

र्थबोधो भवत्येवा रूढे योगापहारप्रवादस्तु योगपाताद्रूढ्यर्थस्यान्वयबोधो न तु यौगिकार्थस्यायोगपता

१ दित्येतत्परो न तु योगपतादिमत्तापि यौगिकार्थस्या[…]न्वयबोध इत्येतत्परः। पचन्त रूढ्यर्थग्रहसंबंधिये

नै चैत्रत्वादिना तात्पर्यप्रमाणान्तराद्व[…]धापत्तेस्तत्र रूढिपूर्विकालक्षणा न तु सर्व[…]स्यपदे योगलक्षि

तलक्षणापि कल्पांतरमिति प्राचः। द्विरेफपदेन द्वौ रेफौ यत्रेति व्युत्पत्त्या भ्रमरपदं लक्षणात्तेन भ्रमरपदे न

वस्त्वशक्यसंबंधी भ्रमररूपोऽर्थो लक्ष्यते इति द्विरेफपदस्य भ्रमरे लक्षितलक्षणा। न च द्विरेफपदलक्ष्य

भ्रमरपदस्य शक्तौ वृत्तिर्वा हि लं भ्रमरे लक्षणायेति वाच्यं। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्व

नियमेन भ्रमरस्य द्विरेफपदार्थस्याभावेन तत्र विभक्त्यर्थान्वयापत्तेः। मध्यात्तेव लक्षितलक्षणापाः

द्विरेफपदस्यैव वृत्तितया भ्रमरस्य द्विरेफपदार्थत्वादिति नव्यशाब्दिकान्यैनरूपणात्तत्र भवतिलक्षणा। राम

ति भ्रमरपदशक्यतावच्छेदकं भ्रमरत्वस्यैकार्थलक्ष्यतावच्छेदकत्वं शक्तौ वत्तद्बोधसंभवादिति वाच्यं। ४१

। शक्येन रूपेण लक्षणानंगीकारे शक्तौ वृत्तिद्वयसंभवे लक्षणाकल्पनमफलमित्यपास्तमेवं तद्बीजनपाश कृतौ
च शक्ताभ्रमरत्वविशिष्टसंबोधभंगीकारे भ्रमरस्य द्विरेफपदार्थत्वाभावेन विभक्त्यर्थान्वयानुपपत्त्या शक्य
स्यापि लक्षणायैव भानमुपेयते। एतन्मतेन लक्षितस्य पदस्य लक्षणा लक्षितलक्षणा। सा च द्विरेफपदस्य व व
त्तिरिति। तन्मते शक्यसंबंधो हि लक्षणा। येवं भानमुपपत्तौ एतन्मते लक्षितस्य पदस्य लक्षणा लक्षितल
क्षणा। सा च द्विरेफपदस्य वृत्तिरिति। तन्न। शक्यसंबंधो हि लक्षणा। न तु शक्यसंबंधसंबंधो गौरवात्
। एवं च परंपरासंबंधेन लक्षणैव लक्षितलक्षणा। स्वलक्ष्यपदघटितलक्षणा सेति तु यावत्। तथा च
परंपरासंबंधेन लक्षणाया एवं तथात्वे द्विरेफपदस्य स्वलक्ष्यभ्रमरपदघटितपरंपरासंबंधेन भ्रमररूपार्थो वं ४
पस्थापकत्वसंभवात्। द्विरेफपदे लक्षणोपपत्तेर्नातिरिक्तवृत्तिकल्पनमिति दिक्। सा च लक्षणा च
विज्ञहत्स्वार्था क्वचिदजहत्स्वार्था च। आद्या गंगायां घोष इत्यादौ स्वार्थस्य प्रवाहस्य त्यागात् तीरे घोष इत्य
न्वयबोधात्। यदि गंगासंबंधितीरसंबंधितीरत्वेन बोधस्तदा तु जहत्स्वार्थैव। अन्त्या च काकेभ्यो दधि रक्ष्यताम्

तर्क॰ २ त्रि॰

छत्रिणो यान्ति इत्यादौ दृष्टुपचारत्वेन काककुक्कुटादीनां एकसार्थवाहित्वेन छत्रश्छत्रिणां बोध॰

तः एवं मंचाः क्रोशन्ति पञ्च॰ः अपेक्षणीयत्वादौ मंचपदस्यैव पुरुषे पर्यवसितपदस्य पर्यवसितत्वेन लक्षणाजहत्स्वार्थे

वस्वार्थपरित्यागेन परार्थलक्षणा । अजहत्स्वार्था स्वार्थापरित्यागेन परार्थलक्षणा । जहत्स्वार्थेति ।

लक्षणा ॥ ननु छत्रिणो यान्तीत्यादौ छत्रिशब्दस्य वाच्यत्वान्न लक्षणा नापि छत्रपदे ... पदार्थ

त्यागेनाजहत्स्वार्थत्वायोगात् । किं वा न लक्षणा पक्षे दृष्टं नैकार्थगन्तृत्वे ... यान्तीत्यस्यान्वया ... ॥ सा॰

ऽटत्वेनोपस्थितस्य गमनाकांक्षाविरहादिति । अत्राहुः । छत्रपद एव एकसार्थलक्षणा मतुबर्थ ॰ञो

स्य संबन्धस्यान्वयात्तथा च एकसार्थवन्तो यान्तीति वाक्यार्थबोधः । अन्ये तु वाक्यलक्षणाभिप्रायेणोदाजहत्स्वा

र्थेत्युक्तिः । अन्यपदस्य प्रतिपाद्यपरत्वाभिप्रायेण वा ॥ केचित्तु ॥ एकसार्थवत्त्वेन छत्रस्यान्वया ४२

न्वयात् । अत एव शक्यलक्ष्यसाधारणमप्युपपद्यते इत्याहुः । अपरे तु प्रकृते एवैकसार्थवतिलक्ष राम॰

णा । तस्य च शक्यतावच्छेदकः । अथवा संबन्धिसामान्ये शक्तं मतुप्प्रत्ययेऽकसार्थसंबन्धित्वेन लक्षणा

छत्रपदं तात्पर्यग्राहकमित्याहुः। अत्र चलक्षणायां संबंधस्यैव लक्ष्यतावच्छेदकत्वे पर्यायादुपघातकत्वेनकथा
र्थवाहित्वैकैरिति वोध्यं॥ एवं पदानां स्वपरत्वे लक्षणैव न शक्तिः। अन्यलभ्यत्वात्। केचित्तु॥ पदानामौत्सर्गि
कमर्थपरत्वं तदभावे स्वपरत्वं तथा च अप्रत्यक्षे॥ पदजन्योपस्थितिर्वा ज्ञातं तज्ज्ञानमित्याहुः। तन्न। प्रत्यया मर्
नां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेनात्र विभक्त्यर्थान्वयानुपपत्तेर्वृत्तिस्वीकारस्यावश्यकत्वात्
। अत एव पदस्य स्वबोधकत्वं वृत्तिं विनैव स्वभावात्। अन्येन हि अन्यबोधनेऽतिप्रसंगाद्वृत्तिः कल्प्या २५
स्वस्य स्वबोधकत्वे तु नैवमित्यादि पदस्वार्थान्वयानुपपत्तेः सहकारित्वाब[illegible]त्सर्वेन स्वबोधप्रसंगः। ए
वं बोधिते स्वस्मिन् विभक्त्यर्थान्वयो वोति परास्तं। प्रत्ययानामिति व्युत्पत्तिभंगप्रसंगात्। एवं चैवं निरर्थ
केऽजबगडदशमाहेत्यादौ स्वशक्यताभावात् तत्र लक्षणानुपपत्तिर्वाच्या प्रातिपदिकत्वेऽपि सुप्रत्ययोत्पत्तिरभावस्ता क्रिया मा२
पदार्थान्वयात् समुदायस्याचारश्च संभवेन तत्र तदन्वयात् तेषां च शक्तत्वेन तत्रैवोपगमात् इति। गु
णोपस्थितौ तिको शस्योभयत्र शक्तिबोधकत्वविनोत्वादिपदानां धर्म
रोगा गुरुछादयः पुंसि गुणालिंगास्तु तद्वति इति

नै २ तित ३

तर्कः
६७

लो

शक्तिः धर्मितालक्षणा। मत्सरमते तु मात्सर्यधर्मे धर्मितावशक्तिरिति संप्रदायः। नीलादिपदवत् मात्स
र्यधर्मे शक्तिः धर्मितालक्षणा। न च मत्सरशब्दस्य धर्मे धर्मिणि चातुल्यवत्प्रयोगात् द्रुमपदे शक्तिरिति वाच्यं
नीलादिपदस्यापि गुणिनि प्रयोगस्य तु पद्मे धर्मितालक्षणैवोपपत्तेः न तु शक्तिरिति तु मत्सरशब्देपि
तुल्यमिति मत्सरशब्दे पि धर्मे शक्तिः। धर्मिणि लक्षणेत्यन्ये। अत्र तु विभक्तौ न लक्षणा सर्वजानिनल
क्षणा वा दिवाके न लक्षणा विधौ न लक्षणा विध्यर्थे न लक्षणा विधेयताशालि शाब्दबोधत्वे शक्तिः ता
न कार्यतावच्छेदके लक्षणा पाः शाब्दबोधस्तु न विधेयताशालीति न व्यभिचार इति विधेयतया लक्ष्यार्थे धे ५
बोधो नास्तीति प्रवादबीजं लक्षणायां कपदं नानुभावकमिति प्रवादस्यादृश्यविधेयभावेनान्वयो नास्ती
त्यर्थः। एवं विशिष्टवाचकानां पदानां विशिष्यमानपरत्वेन लक्षणाशंकोदयेन तु पूर्वोक्तातेमवतिल
क्षणेति लक्ष्यतावच्छेदके न लक्षणेति प्रवादः। अनुसंधेयः। केचित्तु लक्ष्यतावच्छेदके लक्षणायां अ
कल्पने गौरवेपि शक्तिविलोपप्रसंगः। वस्तुपक्ष्याप्यस्यैव शाब्दबोधविषयत्वात् तत्र शक्तिकल्पने लक्ष्यता राम
६३

वं३ यो

वच्छेदकेपि तथा॥ अथ तीरत्वेनोपस्थितिं विना तीरत्वं गंगापा इति संबंधप्रत्यभावात् तत्र न लक्षणेति चे
न्न। घटो नेत्यादौ यथा प्रतियोगितावच्छेदकत्वेन संसर्गमर्यादया भासते। तथा गंगायास्तीरमित्यत्र तीरत्वेपि सा
वं मीप्यावच्छेदकसं[illegible]बंधो भासते संबंधस्य हेत्वपादशापस्यभाने तथैव तस्य स्मरणात् तथा च लक्ष्यतावच्छेदकेपि
परंपरासंबंधात्मिका लक्षणैवेति भावः॥ राजपुरुष इत्यादौ शक्तलक्षणापावाराजसंबंधिपुरुषबोधानु
पपत्तेरिति रिक्तावृत्तिरवश्यमुपेया तथा च कथं शक्तिलक्षणो एव वृत्ती स्तुतमिति अभिप्रायवानाह के थै४
तेन न्विति। एतेन एव शक्तिलक्षणो एव। एवकारेण वृत्त्यंतरस्य व्यवच्छेदः। षष्ठ्या[illegible]ति। तत्र षष्ठ्याः लुप्तेन ७४
राजपदादेस्स्वसंबंधे शक्तत्वाद्यसंभवात्कथं संबंधबोध इत्यर्थः। तदेवाह न[illegible]ति। ननु प्रकारेण तयाविशेष्य
तया वा बोधे वृत्तेरपेक्षा। न तु संसर्गमर्यादयाभाने॥ तथा च घटमानयेत्यादौ घटकर्मतयोराधारा
धेयतारूपसंसर्गवत् राजपुरुष इत्यत्रापि स्वस्वामिभावसंबंधरूपभानं च यातां [illegible]नैयस्या हित्वा शंक
ते। अथेति॥ नील इति॥ नीलपदस्य निरूढलक्षणया नीलविशिष्टमर्थः। तस्य चाभेदसंसर्गेण घटेन्व

तर्क॰ प्रवृत्त्यर्थः। तथा च यथा नीलघटयोरभेदः संसर्गमर्यादया भासते तथा षष्ठीतत्पुरुषेऽपि सेव्यसेवकभावलक्ष

६४ णः संबंधः संबंधविधया भासत इति भावः। तदापत्तेरिति। षष्ठ्यर्थसंबंधभानापत्तेरित्यर्थः। राजपु

रुष इत्यत्रैवात्रापि संसर्गस्य संबंधविधया भा[illegible]नापत्त्या राजसंबंधी पुरुष इत्यन्वयबोधापत्तेरिति भावः।

ननु घटकर्मत्वमानयनं कृतिरित्यत्र घटमानयेत्यत्रैवाधेयतासंबंधेन कर्मत्वे घटान्वयबोधापत्ते

[illegible]त्या घटकर्मकानयनानुकूलकृतिमानित्यन्वयबोधापत्तेर्नामार्थयोरभेदातिरिक्तसंबंधेन नामार्थान्व

श्री यबोधे[illegible]न स्वीक्रियत इति व्युत्पत्तिरवश्यमपेया। एवं च राजपुरुष इत्यत्र कथमभेदातिरिक्तसंबंधेन ना

न्वयबोधमापादयसीत्याशंकते। अथेति। अ[illegible]नैवेत्येवकारेणाभेदातिरिक्तसंबंधव्यवच्छेदः। मे ४

एवकारार्थं स्पष्टयति। नत्वन्यथेति। नत्वन्यथा। न त्वभेदातिरिक्तसंबंधेनेत्यर्थः। नन्वेवं नियमे मा

नाभाव इत्यत आह। तथैवेति। अन्यथा घटः कर्मत्वमानयनं कृतिरित्यत्राप्याधेयतासंबंधेन घटी राम

यकर्मत्वेत्यन्वयबोधा[illegible]पत्तेरिति भावः। ननु राज्ञः पुरुष इत्यत्र राजपुरुषयोरभेदातिरिक्तसंबंधेनैवा ६४

न२

न्वयबोधादृश्यात्तादृशनियमइत्यत आह। राज्ञ इति। नामार्थयोरेव न तथान्वयः राज्ञः पुरुष इत्यतो षष्ठ्य
र्थसंबंधस्य नामार्थत्वाभावेना भेदातिरिक्तेनापि संबंधेनान्वयो नानुपपन्न इत्यर्थः। विभक्त्यर्थेति। षष्ठ्य
र्थसंबंधनामार्थपुरुषयोरित्यर्थः॥ षष्ठ्यास्तु न नामत्वं स्याद्यत इह नामेष्टं इत्यभियुक्तादिरुद्धत्वादिति
भावः। ननु राज्ञः पुरुष इत्यत्र संबंधसंबंधकभावलक्षणसंबंधप्रकारक इव संबंधसंबंधकभावलक्षणसंबं
धेन राजप्रकारकपुरुषविशेष्यकोप्यन्वयबोधो भवति। यथा घटमानयेत्यत्र कर्मतासंबंधेनानय
नोपरि घटोप्यन्वेतीति सिद्धांतात्। तथा चैतन्नियमभंग इति चेन्न। स्यैकदेशिमतत्वात्। तन्मते तु ना न५
मार्थयोरभेदातिरिक्तसंबंधेन साक्षादन्वयबोधानस्वीक्रियत इति नियमात्। विभक्त्यर्थमद्वारीकृ
त्याभेदातिरिक्तसंबंधेन नान्वय इति यावत्। प्रकृते च संबंधस्य विभक्त्यर्थत्वात् तद्द्वाराऽन्वयबोधोपगमे
पि क्षतिविरहादिति ध्येयं। न हीति। तादृशनियममभ्युपेत्य राजा पुरुष इत्यादौ तथान्वयवारणे हीत्यर्थः
:नये राजपुरुषयोः तथान्वयः अभेदातिरिक्तसंबंधेनान्वयः। विभावयेति। तादृशनियमानभ्युपगमेन

न१

जपुरुषइत्यत्रैवतथान्वयबोधापत्तिः। अभ्युपगमेतुअन्नापिनतथास्यादित्यर्थः। ननुराजपदस्यराजसं
तर्क- बंधेलक्षणैवास्तां। राजापुरुषइत्यत्रतत्वभेदएवतात्पर्येत्। नसंबंधेलक्षणोत्पत्त्याशंक्यतौतथापत्तेः। राज
८५ पदस्यराजसंबंधलक्षकत्वेपीत्यर्थः। इतिवदिति। इतिवाक्यवदित्यर्थः। नामार्थयोरभेदातिरिक्तसंबं
धस्याव्युत्पन्नत्वात्। राजपदार्थस्यराजसंबंधस्य[illegible]पाश्रयीभावसंबंधेनपुरुषेऽन्वयासंभवइतिभावः
। नदोषेति। राजसंबंधीपुरुषइत्यन्वयानुपपत्तिरूपदोषतादवस्थ्यादित्यर्थः। ननुराजपदस्यराजसं
बंधलक्षणत्वासंभवेपिराजपुरुषइतिवाक्यमेवराजसंबंधिपुरुषलक्षकमस्त्वितिशंकते। अथेति
। समुदायएवराजपुरुषइतिवाक्यएवाशक्तिविरहेवाक्येकुत्रापिशक्तिविरहात्लक्षणापात। वाक्ये
लक्षणायाः अप्रयोगादित्यर्थः। ननुगंगापदस्यतीरेशक्त्यभावेपियथातीरेलक्षणातथावाक्येकु
त्रचित्[illegible]अर्थेशक्त्यभावेपिलक्षणास्यादतआह। वाकेति। तथाचलक्षणायाःशक्तिघटितत्वा राम- ८५
त्तदभावेतदनुपपत्तिः। तीरेगंगापदशक्त्यभावेपिगंगापदशक्यसंबंधत्वेनलक्षणाप्रवृत्तिः। अन्नतुवाक्ये

संपेनान्वयोन क्रियते नाप्यभेदेनापि तदन्वीकार इति भावः नवैवमिति षष्ठीतत्पुरुषेपि विशेषणविशेष्यवाचकपदार्थयोरभेदान्वयस्वीकारादित्यर्थः अभेदे कर्मधारय इ ४

कुत्राप्यर्थे शक्तेरसत्वाल्लक्षणानुपपन्नेतिभावः। संबंधीति। राजसंबंधिलक्षकमित्यर्थः। क्वचित्तथैव पा
ठः। ननु नामार्थयोरन्वयबोधीनत्वे कियत इति कथं पुरुषपदार्थे तदन्वय इत्यत आह। तथा चेति। राज
पदस्य राजसंबंधिलक्षकत्वे चेत्यर्थः॥ अभेदेनैवेति॥ अन्वय राजसंबंधिपुरुषयोरन्वयबोधः नामा
र्थयोरभेदान्वयेति क्तसं [redacted] त्तनेनाभेदबोधस्थले कर्मधारयविधानादिति भावः॥ समासेत्ते। समा
सेति। लक्षणा हि वाक्यानुपपत्त्या कियते समासपूर्वं तु न राजपदादौ लक्षणा अनुपपत्तेरभावात् त
था च समासपूर्वं विशेषणविशेष्यवाचकपदयोः समासार्थकयोः पत्राभेदेनान्वयबोधकत्वं तत्रै
व कर्मधारय इति भावः। पदयोः राजपदपुरुषपदयोः। तुल्येति। एकविशेष्यकबोधजनकत्वाभावा
दित्यर्थः। पदे तुल्याधिकरणो विज्ञेयः। कर्मधारय इत्यनुशासनादिति भावः। ननु राज्ञः पुरुष इत्यत्र
संबंधप्रकारको बोधः राजपुरुष इत्यत्र संबंधिप्रकारक इति विग्रहवाक्यसमाससमासयोः समाना
र्थकत्वभंगापत्तिः। समानार्थकसमासारंभकवाक्यस्यैव विग्रहवाक्यत्वादिति। राजसंबंधी पुरुष इत्य

व विग्रहवाक्यं कस्य मिति कर्मधारयत्वापत्तौ तत्पुरुषो छेदः ॥ न च शक्ताभेद प्रति योग्युपपस्थापने कर्मधा
तर्क॰ २६ रयश्रुतिवाच्या नीलोत्पलमित्यादौ नीलपदस्य नील विशिष्टे शक्तिविरहेण कर्मधारयत्वाभावापत्तेः ।
नु स्मा॰॰ जपदस्य राजसंबंध एव लक्षणा स्वीकर्तुमुचिता । न च राजसंबंधः पुरुष इति वदः॰॰ याप न॰न्व॰३
ति रूत्तेव नामार्थे॰॰ ति वाच्यं । घटो नेत्यादौ नामार्थयोरन्वयस्य दृष्टत्वात् । निपा॰॰ तिरिक्तस्थले
एवं तादृश नियमा [redacted] भ्युपगमात् । नन्वे
वं राजसंबंधे लक्षणा वैयर्थ्यमिति वाच्यं । व्यास समासयोः समान प्रकारक बोधजनकत्वरूप समा
नार्थकत्वरक्षणायैव राजसंबंधे लक्षणा या उपगमात् संबंध प्रकारक बोधस्यानुभव सिद्धत्वाच्चेति । ए
वं समानविषयक बोधजनकत्वमित्येव समानार्थकत्वं न तु समान प्रकारक बोधजनकत्वं तन्न
॥ आरूढ वानर इत्यत्र आरूढः वानरो यमिति विग्रहात् पत्कर्मक रोहणकर्त्ता वानर इति बोधान एम॰
समासाच्च वानर कर्तृकारोहण कर्मवृक्ष इति बोधेन भिन्नप्रकार बोधस्योदयेन व्यभिचारात् ॥ ए २६

वं प्राप्तोदको ग्राम्यस्यादेवपित तत्र प्राप्तमुदकं यमिति विग्रहात् । अथ बहुव्रीहेरविग्रहत्वे पानास्यविग्रहत्वा
कात्वं चित्रगुरित्यत्र चित्रा गावो यस्येति हि समासार्थकथनं न तु विग्रहः समस्यमानपदैरेवार्थकथनस्य वि
५३ ग्रहत्वादिति चेन्न । नहि तत्र विग्रह एव नास्तीति समासारम्भकवाक्यस्यैव विग्रहत्वात् । किं तु बहुव्रीहौ तत्स्वा
साधुत्वात् समस्यमानपदैरेव विग्रहस्य साधुत्वात् । अत एव बहुव्रीहौ विग्रहस्यासाधुत्व[redacted]त्वापनायत
त्र नित्यसमासत्वाभिधानं अत एव वा विग्रहोऽस्वपदविग्रहो वा नित्यसमास इति तिलकव्याख्याता ।। अथ स
मस्यमानपदैरेवार्थकथनरूपविग्रहस्य साधुविग्रहस्यैवाव्याससमासयोः समानार्थकत्वनियमे
प्रवेशान्नोक्तस्थले व्यभिचार इति चेन्न । अप्रयोजकत्वात् । वस्तुतस्तु नामार्थयोरभेदेनैव व्युत्पत्तेः सं
कोचमानाभावात्संबंधिनि लक्षणायाः आवश्यकत्वे समानविषयकबोधजनकत्वमित्येव कल्प
नात् न तु समानप्रकारकबोधजनकत्वरूपं समानार्थकत्वमिति दिक् । षष्ठी भवति । सप्तमी सती तिरो
षः । एवं च षष्ठ्या एव संबंधोऽर्थः आश्रयाश्रयीभावेन पुरुषे भासते नामार्थयोरेव चाभेदातिरिक्तसंबं
धेनान्वयबोधनिषेधादिति भावः । ननु यस्य न षष्ठी लोपस्तानं जस्यत्तु न षष्ठीस्मरणात् संभवेन अन्वयबो

तर्क ८७

धानुपपत्तिरित्यत आह। षष्ठी लोप इति। अज्ञानतस्तु अननुभवत शक्तिभ्रमाद्वाज्ञः पुरुष इति समु
दायस्य राजसंबंधिनि पुरुषे शक्तिभ्रमात्॥ ननु राजपदस्य शक्तिभ्रमादित्यर्थः। तथा सति राजपदल
क्षणायावेति राजपदस्य लक्षणापेवस [illegible] न्वयकल्पनानुपपत्तेरित्येयां नन्वेवं तत्र शक्तिभ्रमाकारस्वी
कारे तत्र दोषादीनामननुगततानियामकत्वकल्पने नियमतस्तत्पूर्वं तादृशादोषकल्पने च गौ
रवमत आह। राजपदेति। पूर्वकल्पे तु राजपदस्य राजसंबंधिनि निरूढलक्षणा। एतन्मते तु षष्ठीलोप
स्मरणासंभवे स्थले राजपदे स्वारसिकी लक्षणा। इदमेव च लाघवमिति भेदः। नच कस्य राजमातं
ग इत्यादौ एतन्मते लुप्तषष्ठीस्मरणस्यावश्यकतया समानविभक्तिकत्वेनाभेदेनान्वयबोधापत्तिरि
ति वाच्यं। न हि समानविभक्तिकत्वाभावनिबंधनमभेदेनान्वयाननुभावकत्वं किं तु समासघटकपद
मापेक्षतयातद्भावेन सविशेषणानां वृत्तिर्नेत्युक्तत्वस्य विशेषणयोगो नेति नियमात्॥ न चै [illegible] शारः शात्यं २
तितपत्रं [illegible] चैत्रस्य दासभार्या इत्यादौ शारकरणकत्वचैत्रनिरूपितत्वयोः समासविशेषणीभूतदासां राम
नदासत्वयोरन्वयानुपपत्तिरिति वाच्यं। अभेदेनान्वयस्य तथानियमात्। स्तोकं पचतीत्यादौ च भेदान्वयानु

न३

रोधेन समानविभक्तिकत्वमित्यस्याविरुद्धविभक्तिराहित्यस्य यथार्थत्वस्यावश्यकत्तापा भवन्मतेप्यगतेस्त्व। स्वीय
त्तुरित्यस्वरसोद्भावनं न द्वीजेक्षत्वित्तसमासपूर्वीक्तिमहस्यस्त्रवत्तोस्य समासार्थकथनएव तथाविग्रहस्त्र्यवत्ता
स्य सर्वत्रानावश्यकत्वपात्तुन षष्ठीस्मरणकल्पने गौरवात्। कचित्तुरा संबंधिनि स्वारसिकलक्षणाग्रह
स्यत्वानुरोधेन राजसंबंधिप्रकारकबोधे तादृशसमभिव्याहारकारणत्वस्य कारणत्वकल्पनापात्त्रावश्य
कतयातत्रे निरूढलक्षणापाएव न्याय्यत्वात्। न च संबंधिनि तात्पर्यस्यानादित्वकल्पनमेव। निरूढलक्ष
णाकल्पने गुरुस्त्र्यानादितात्पर्यविषयीभूतार्थनिष्ठलक्षणापाएव निरूढलक्षणात्वादिति वाच्यं। निप
मतोत्तुस्म षष्ठीस्मरणकल्पनापेक्षपातात्पर्यानादित्वकल्पनापाएव युक्तत्वात्। न चैवं दृधि[illegible]यतोस्या
द्यावपि दृधिपदस्य दृधिकर्मके लक्षणापत्त्यातत्रापि तुल्यविभक्त्यनुसंधानं विनापि बोधोत्पत्तिरितिवा
च्यातत्र दृधिपदस्य द्वितीयेतरविभक्त्यांतत्त्वभ्रमदशायां दृधिकर्मकपश्यति दृधिकर्मकेन पश्यती त्यन्वे
वान्वयाबोधेन कर्मत्वार्थकविभक्तिं विनानिराकांक्षत्वेन तदनुसंधानस्यावश्यकत्वात्। समासस्थलेतु
न्यथैव व्युत्पत्ति। अतएवाग्निनोदनपचेतेत्यत्र तान्यवपदानि समर्थानि न तु तदर्थकानि अग्निकरणको

स्य ५

तर्कप्र ५८

दनकर्मक कृतिरिष्टसाधनमिति तद्वाक्येन पदमित्युक्तमिति। समासस्येति॥ घटमानयेति शब्दसमुदायवा
रणाय समासस्येति। राजपुरुष इत्यादिसमासवाक्यस्येत्यर्थः। विशिष्टार्थे राजसंबंधि पुरुषादिरूपे विशि
ष्टार्थे शक्तिरेवेति। तथा च समासे शक्तेर्विशिष्टार्थबोधोपपत्तेर्नातिरिक्तवृत्तिकल्पनमिति भावः। एवं स
मासे शक्तिस्वीकारे राजपदेति। राजपुरुष इत्यत्र राजपदे राज्ञि शक्तमिति शक्तिज्ञानं शाब्दकालेपि रा
जपुरुषपदे राजसंबंधिपुरुषे शक्तमिति शक्तिज्ञानसंभवेन तादृशबोधोपपत्तेरित्यर्थः। समस्तेति। स
मासस्थले विशिष्टार्थे शक्तिग्रह इत्यर्थः। नवेति। नहीत्यर्थः। अवयवशक्तिग्रहे राजपदादिशक्तिग्रहे
। अनुशासनग्रहः। अनुशासनजन्यः विशिष्टार्थे शक्तिग्रहः। तच्छक्तिग्रहस्य। अवयवशक्तिग्रहस्य
। समुदायग्रहे। समुदायशक्तिग्रहे। हेतुत्वादिति। व्यवहारादिना नानाशक्तिग्रहः। किंतु व्याकरणादि
तः व्याकरणानहि प्रत्येकशक्ता राजपदादिसमुदायो विशिष्टार्थे शक्त इति बोधनीयं। तत्तु प्रत्येकश
क्तग्रहे। न संभवतीति तज्जन्यसमस्तशक्तिग्रहे अवयवशक्तिग्रहस्य हेतुत्वात् राजपदादिशक्तिग्रह राम
भावे समुदायशक्तिग्रहस्याप्यभावान्न ततोऽन्वयबोध इति भावः। अवयवेति। राजपदस्य राजसंबंधि ५८

५

पेयः तत्रैव प्रवाहस्य तादृशबोधविषयत्वाभावेन तादृशबोधस्वरूपयोग्यत्वमस्त्येव गंगापदस्येति गंगापदे जहत्स्वार्थलक्षणा । [illegible] मेवाः कोशंतीति स्वमनुमं स्वमर्त

लक्षणायैवेत्यर्थः। समुदाये शक्तो समासवाक्ये विशिष्टार्थे शक्तौ मानाभावादिति। अनन्यलभ्यो हि शब्दार्थ
इति न्यायादिति भावः। ननु गंगायां घोष इत्यत्रैव जहत्स्वार्थैव लक्षणोपेयास्तु न तु संभवति। राजपदस्य रा
जसंबंधिनि लक्षणायां स्वार्थपरित्यागादित्यत आह। नदुक्तमिति। यत्र रूढिशक्तिः विरोधिनी स्वार्थविष
यकविशिष्टार्थबोधस्वरूपायोग्यत्वेनैव जहत्स्वार्थ्यानत्वन्यत्रान्यत्र तु अजहत्स्वार्था। यथा गंगायां
घोष इत्यत्रानाधिकरणको घोष इत्येवान्वयबोधः स्य पुरुषे लक्षणायामेव रूपत्वार्थस्यापि तादृ
शबोधविषयत्वादजहत्स्वा[illegible]जहत्स्वार्थलक्षणामेवाक्तो शक्तीत्यत्र तु मध्ये [illegible] विषयत्वन्नु प्रथा
दृश्यमानो दृश्यपाद विषयत्वाभावेन तादृशबोधस्वरूपायोग्यत्वमस्त्येव गं[illegible] विषयेल
क्षणा। एवं च न केवलं जहत्स्वार्थैव लक्षणा येन राजपदस्य राजसंबंधिनि लक्षणा कल्प्यं तु स्या
दिति जहत्स्वार्था पीति सात्रांगीकार्येति भावः। यत्तु नतु नन्वेवं पंकजादावपि समुदाये शक्ति
र्न स्यात्। अवयवलक्षणैव पद्मत्वविशिष्टबोधोपपत्तेरित्यत आह नदुक्तमिति। यत्र रूढिः प्र

गा२

सिद्धियोगार्थविरोधिनी । तत्रैव जहत्स्वार्थालक्षणा । यथा कर्मणि कुशल इत्यादौ दर्भेरूढिः प्रसिद्धिः कु
शान्लातीति कुशादानकर्तृयोगार्थस्य विरोधिनी इहेह कुशादानकर्तृत्व बाधादिति कुशलपदस्य वि
वेचकत्वरूपशक्यसंबंधसत्वादिहेतलक्षणा बाधेन शक्तार्थपदार्थबोधाभावात् । न चानेविवे
कत्वेन लक्षणायामजहत्स्वार्थेति वाच्यं । यत्र स्वार्थस्य विशेष्यतयान्वयप्रवेशः साऽज
हत्स्वार्था यथा छत्रिणो यान्तीत्यादौ । एवं षष्ठीः प्रवेशापदस्याप्यजहत्स्वार्थैव । प्रकृते च राजपुरु
ष इति समुदायस्य राजसंबंधिपुरुषे रूढिप्रसिद्धिः । राजभिन्नपुरुषस्य योगार्थस्याविरोधिनीति त
न जहत्स्वार्थालक्षणा स्वार्थस्य राज्ञो विशेष्यतयान्वयप्रवेशाभावात् । पंकजमित्यादौ तु प
द्मस्य रूढार्थस्य पंकजनिकर्तृस्य योगार्थस्याविरोधादेशत्वैव पंकजनिकर्तृबोधः । पद्मत्ववि वयव४
शिष्टबोधार्थं च पंकजपदस्य पद्मत्वविशिष्टलक्षणा कल्पनेतु शक्त्या पंकजनिकर्तृयोगार्थस्य राम
लक्षणया च पद्मत्वविशिष्टस्य बोधो वाच्यः । तस्य च युगपद्वृत्तिद्वयविरोधेनासंभवात् पंकजपदस्य
पद्म[illegible]विशिष्टे समुदायशक्तिरावश्यकी । तस्माद्युगपद्वृत्तिद्वयविरोधेन शक्त्या लक्षणया च बो ४या

धे२

धानुपपत्तेः पंकजपदे समुदायशक्तिरावश्यकी समुदायेनैवमिति। अथ वा पंकजमित्यत्रापि ल
क्षणोपपत्तेः समुदायशक्तिर्न स्यादत आह तदुक्तमिति। यत्र रूढिः समुदायशक्तिः योगविरोधि
नी योगः अवयवशक्तिः तद्विरोधिनी तत्रैव जहत्स्वार्थालक्षणा। यथा मंडपे भोजयेत्यत्र हि मं
डपपदस्य गृहविशेषरूढिः योगविरोधिनी मंडपार्थग्रहे मंडपानकर्तृत्वासंभवात्तत्र रूढ्या यो
गापहारिता इति प्रवादात्। अवयवशक्त्या मंडपानकर्तृबोधासंभवात्। मंडपपदस्य मंडपानकर्तृ
रि लक्षणा। इत्थं च रूढ्यर्थग्रहसंबंधितावच्छेदकतया गृहत्वेनैव तादृशान्वयबोधो न तु मंडपा दि
नकर्तृत्वेन। पंकजमित्यादौ तु रूढ्यर्थस्य पंकजकर्तृत्वस्य योगार्थस्याविरोधादवयवशक्तौ प्र
बोधः। पद्मत्वविशिष्टस्य लक्षणया वा बोधोपगमे युग्मपदे [illegible]ति द्वयाविरोधात् पंकजपदे स
मुदायशक्तिरावश्यकी। राजपुरुष इत्यत्र तु राजसंबंधिपुरुषेणाभिन्नपुरुषस्यावयवार्थस्यावि
रोधादवयवशक्तौ तद्बोधाभावेन युग्मपद्ये इति द्वयविरोधाभावात् लक्षणैव स्वार्थस्यावयवार्थस्य

गकौ- ५० त्यागाज्जहत्स्वार्थेत्योक्तिरिति सारं। लोके समासेऽवयवलाक्षणिकत्वे दृष्टभकमाह। तदुक्त
मिति। पत्रेति॥ पत्रानुभूयमानसमुदायकर्योरस्य पदार्थ्यविरुद्धत्वेन पदे जहत्स्वार्थालक्षणो
ति समुदायार्थस्यापि कश्चित्। एतन्मतेन न जहत्स्वार्थैवेत्यन्वयं विनाऽगतिरिति श्येनोऽ
पसंहरति। तस्मादिति। अन्यथेति। अवयवलक्षणायोपपत्तावित्यर्थः। अन्यत्र लक्षणस्यैव
शब्दार्थत्वात्। अन्यथा गंगापदस्यापि तीरे शक्त्या पत्या लक्षणोच्छेदापत्तेरिति भावः। न
नु चित्रगुरित्यादौ चित्रगोस्वामित्वरूपार्थस्यानुभवसिद्धत्वात्तस्य चावयवशक्त्या लक्षणाया वा
ऽप्यसंभवाद्बहुव्रीहौ शक्तिरावश्यकीति कथं न समासे त्याशुकत्तेस्याहेनरिति। बहुव्रीहौ हु शक्ति रि४
दि२ चित्रगुरित्यादौ बहुव्रीहौ तु। नन्वत्राप्यवयवलक्षणे सैवोपपपत्तौ शक्तिकल्पना येत्यत आ
ह। नदीति। लक्षणायावयवलक्षणयापि निर्वाहः। विशिष्टार्थबोधः। अनिर्वाहमेवोपपादय राम-
ति। तथाहीति। गोपदस्य गोस्वामिलक्षकत्वे चित्रपदस्य गवि चान्वयाभावाच्चास्य चन संभवति ५०

छ्यु १

पदार्थैकदेशत्वादिति भावः। चित्रस्य चित्रपदार्थस्य चित्रत्वविशिष्टस्य गवान्वयः। गवि चित्रान्वयः
गवेतित्तूलोपात्तवा गोवासहेत्यर्थः। संभवतीति पदार्थस्य चित्रस्याभेदेनान्वयो गवि चित्रान्वयो न संभव
तीत्यर्थः। तस्य गोः। न च तच्छब्दस्य अव्यवहितपूर्वोपस्थितमुख्यविशेष्यपरामर्शकत्वात् गवान्वयोप
सर्जनतया कुर्यात् तच्छब्देन गोः परामर्श इति वाच्यं तच्छब्दस्य अव्यवहितपूर्वोपस्थितमात्रपरामर्शक
तया तात्पर्यबलात् अन्वयोपसर्जनस्यापि गोर्बोधने बाधकाभावात्। गवेतित्तूलोपात्तत्वेदोवास्य
शब्दापदार्थैकदेशत्वात् गोस्वामिरूपदार्थैकदेशत्वात्। गोर्नित्यत्वेन गोत्वे नित्यत्वान्वयवारणा
य पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्त्यङ्गीकारस्यावश्यकत्वादिति भावः। केचित्तु
चित्रस्य चित्रविशेषणतयोपस्थितस्य चित्रत्वस्येत्यर्थः। चित्रपदस्योभयत्र प्रयोगात्। तस्य चित्रत्व
स्य पदार्थैकदेशत्वात्। चित्रपदार्थैकदेशत्वात्। एकविशेषणतयोपस्थितस्य अन्यत्र विशेषणत्वे
नान्वयनिराकाङ्क्षत्वादिति भाव इत्याहुः। तन्न। एवमपि चित्रस्य गवि चित्राभेदेनान्वये बाधकानुक्तेः। अ

नै

तर्क॰ ५२ त एवेति। चित्रस्य गवान्वयासंभवादेवेत्यर्थः। गवानन्वयेति। चित्रपदस्य चित्रत्वार्थकत्वे पदार्थैकदेश
त्वया चित्रेण गोरन्वयः नापि चित्रस्वामिनि नामार्थयोरभेदेनैवान्वयव्युत्पत्तेरिति भावः। पदद्वयेति चित्रपदे गो
पदे चेत्यर्थः। ननूभयत्रलक्षणायां गौरवात्तदपेक्षया समुदाये शक्तिरेवास्तामित्यत आह नत्विति। अ
न्येति। अनन्यलभ्यस्यैव शब्दार्थत्वेनोभयत्रलक्षणायां गौरवस्य प्रामाणिकत्वादिति भावः। पद
द्वयेल्लक्षणा कल्पनेन्यतरपदवैयर्थ्यापत्तेः एवं लक्षणावादिमीमांसकमतमाह मीमांसकास्त्वि
ति। समुदाय एव चित्रगुरित्यादिवाक्ये एवं लक्षणा चित्रगोस्वामिनि लक्षणा समुदायस्य वाक्यस्य
शक्त्यभावादिति वाक्यस्य कुत्रचिच्छक्त्यभावात्स्वशक्यसंबंधरूपलक्षणा दुर्वचेत्यर्थः। स्वबोध्यस्ये
ति गंगापदबोध्यस्य प्रवाहस्य संबंधस्तीरेस्तीति तत्र तत्त्वमुपपन्नं परं तु शक्यत्वेनैतन्नवेशः।।
किंतु बोध्यत्वेनेति भेदः। अत्र चित्रगुरित्यत्र बहुव्रीहावित्यर्थः। वाक्यस्यापि चित्रगुरिति वाक्यस्या
पि। विशिष्टबोध्यमिति। एकदेशविकृतमनन्यवद्भवतीति न्यायेन चित्रगुरित्यत्र चित्रगोरिति वा राम॰ ५२

नं ३

रूपस्यसत्वात्। तस्यचबोध्यंचित्रागोत्वसंबंधःचित्रगोत्वाभिन्यक्तीतिभावः। प्रकारसंबंधस्यलक्षणा
निरूपणादृशीयन्नत्वबोध्यसंबंधस्यैवलक्षणात्वमुपपादयतिअन्यथेति। बाकेलक्षणापाः अनेगीका
रेइत्यर्थः। कागतिः कथमन्वयबोधः। तद्वौवापपादयति। नहीति। गभीरायामितिनदीपदस्यतीर
लक्षकत्वेगभीरायामित्यस्यतीरेऽन्वयोवाच्यः। सचनसंभवतीत्यर्थः। अनन्वयमेवाहनहीतीर
मिति। नदीपदस्यनदीतीरत्वेनवालक्षणायांगभीरस्यपदार्थैकदेशतयानद्यामन्वयासंभवात्ती
रेचविशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्थलेऽभेदान्वयस्यैवव्युत्पन्नतयाभेदे
नान्वयासंभवाद्भेदेनैवचान्वयोवाच्यः। सतुनसंभवतिबाधादितिभावः। नद्यामित्यस्येति गभीरे
पदस्यगभीरसंबंधितीरत्वेनतीरत्वेनवालक्षणायांनद्यापदार्थैकदेशतयागभीरेऽन्वयासंभ
वात्तीरेचसमानविभक्तिकस्थलेभेदेनान्वयस्याव्युत्पन्नतयाऽभेदेनैवान्वयोवाच्यःसतुनसंभवति
बाधा[redacted]दितिभावः। अनन्वयमेवाहनहीतीरनदीति। उपसंहरतितस्मादिति। अनन्येति। शक्ता।

तर्कं ५२ लक्षणापाचा विशिष्टार्थबोधस्यानुपपत्त्या वाक्यमेवा। गभीरायां नद्यां घोषमिति वाक्यमेवालक्षकमिति
।पंकजपदे [illegible] नापत्त्या वाक्ये शक्तिस्वीकारेपि अनन्यलभ्यत्वाद्वेलक्षणायां एकत्र वाक्ये शक्तिकल्प
नादन्यत्रापि तत्कल्पनेव गंगापदस्य प्रवाहे शक्तौ ज्ञानेनतीरेपि शक्तिकल्पनापत्त्या लक्षणोच्छे
दापत्तेरतः स्वबोध्यसंबंधस्य लक्षणात्वमुपगतस्यैषा रीतिः। वाक्यमिति विवेगु[illegible]त्यादिवाक्यमित्य
र्थ ५ र्थः। न वि[illegible]शिष्टेति विना भिन्ना गौरित्यादिविशिष्टार्थबोधकेनेत्यर्थः। नबोधकमिति। विशिष्टा
र्थबोधकत्वावच्छेदकेत्यर्थः। तत्सत्वे च किं लक्षणयेति भावः। अतइति शक्तेरभावादित्यर्थः। अर्थ
शून्येव च इत्यर्थेऽपभ्रंशेपि शक्तिभ्रमेण स्वबोध्यसत्वात्तत्रापि लक्षणापत्तिः। तथा च व
त्तिमत्वस्यैव पदसाधुत्वरूपत्वेन पदेपि प्रयोगापत्तिः साधुनैव प्रयुंजीतेत्यनेन विरोधाभ[illegible]वादतः
शक्त्या स्वबोध्यसंबं[illegible]धो लक्षणेत्येव वाच्यं [illegible]चैतद्वाक्ये संभवतीति भावः। ननु वाक्ये समुदाय राम
त्वेन शक्त्यभावेपि प्रत्येकपदशक्त्या स्वबोध्यमस्त्येव गभीरपदसमभिव्याहृतनदीपदशक्तमेव ५२

मीरायामिति तीरे गंभीरनदीनीरे तत्पारनेति तीरपारमेत्यर्थः विभक्त्यभावेनाधारताबोधकाभावादि

विशिष्टबोधकत्वावच्छेदकं अपभ्रंशे तु नैवमित्यत्वरसादाह किंचेति स्वबोध्येत्यत्र बोधकत्वमात्र
विवक्षितो गंगायां घोष इत्यत्र गंगायामिति समुदायस्यापि लाक्षणिकत्वापत्तिरतस्तत्वेन बोधक
त्वविवक्षणीयं तथा सूत्याह । गं[illegible]नल्लक्षणोत्साह । नापीति समभीशून्यभागस्येत्यर्थः । इह तु स
मभ्याएव बोधकत्वान्नैधारताप्रत्ययानुपपत्तिरिति भावः । तस्य गंभीरायां नदीति भागस्याप्यबोध
कत्वादिति समानविभक्तिकपदस्यैवाभेदान्वयबोधकत्वपाविभक्तिशून्यभागस्याभेदान्वयबोधक
त्वाभावादित्यर्थः । तथा च स्वबोध्यसंबंधरूपालक्षणापि नात्र संभवतीति चेत् । यद्यपि पदानां स्वस्वान्व
यबोधकत्वेन समूहत्वेन नवेतरपदाव्यवच्छिन्नेतरपदत्वेन स्वरूपयोग्यतेति विभक्तीनां भागस्य लक्षक
त्वेप्यदोषः तथापि इतरपदाव्यवच्छिन्नेतरपदे फलोपधानरूपबोधकत्वं संभवत्येव गंभीराभिन्ना
नदीति शाब्दबोधे समानविभक्तिकगंभीरपदसमभिव्याहृतनदीपदज्ञानं हेतुः नतु पूर्वोक्तज्ञानस्य का
रणत्वादिति पूर्वत्रनायं दोष इति ध्येयं । नन्वभेदान्वयेन समानविभक्तिकत्वं तत्र तत्ताकं पर्वतीत्यत्र

[illegible]

नू

रं ५ धा २

तर्क॰ व्यभिचारात् किंतु विरुद्धविभक्तिराहित्यमेव तच्च विभक्तिश्यूस्यभागेप्यस्तीत्यत आह ॥ बोधकत्वेवेति
५२ ल स्तोत्तीरह्रूपलस्यार्थ॥ विभक्त्यर्थेति। आरोत्वा [illegible]नन्वयापत्तेरित्यर्थः। अनन्वयमेवाह। प्रत्ययाना
मिति यथा घटमित्यत्र घटीयाकर्मतेति घटरूपप्रकृत्यर्थान्वितकर्मत्वरूपस्वार्थप्रतिपादकत्वमम
विभक्तेः। न च धवखदिरौ छिंधीत्यादौ द्वितीयार्थकर्मत्वस्याप्रकृत्यर्थधवान्वितत्वात्कथमादि
ति वाच्यं यद्द्वयसमुदायोत्तरविभक्तिस्तस्यैव प्रकृतित्वेन धवस्यापि प्रकृत्यर्थत्वात्। समासे [illegible]। गभी
रायां नदीति विशिष्टवाक्यात्मकभागः प्रकृतिरिति। नदीपदोत्तरमेव विभक्तेः श्रूयमाणत्वेन तया
नदीपदमेव प्रकृतिः तदर्थस्य च न भवन्मात्रे विशिष्टनदीतीरविशिष्टवाक्योत्तरं च क्वापि विभक्ते
रदृष्टत्वेन तद्वाक्यस्य प्रकृतित्वमिति भावः। ननु डिस्याडिपित्यसमुदायवत् गभीरायां नद्यामिति
वाक्योत्तरं यदि विभक्तिरिति तस्यापि प्रकृतित्वमास्तामित्यत आह गभीरायामित्यादि। गभीरायां न राम
दीति वाक्योत्तरं यदि विभक्तिस्तदा सुपो धातुप्रातिपदिकयोः एतयोरेव यस्य सुपो लुक् स्यादित्य ५३

तेंगभीरायामितिसप्तम्यालुक्स्यादितिगभीरायांनद्यामितिनस्यात्किंतुगभीरनद्यामितिस्यादित्यर्थः। वस्तुत
स्तु। ननुनीलंघटमानयेत्यत्रविशिष्टैककर्मत्वान्वयोनस्यान्नीलस्याप्रकृत्यर्थत्वादित्यत आह। गभीराया
मितीति। विशेषणवाचकपदस्यविशेष्यवाचकपदसमानवचनत्वानुरोधेनगभीरायामितिसप्तमी। भवन्म
तेचनदीपदस्यविशेष्यवाचकपदत्वाद्गभीरायामित्यस्यविशेषणवाचकपदत्वाभावाच्च। गभीरायामिति
सप्तमीनस्यादित्यर्थइतिसारं। नदीपदोत्तरसप्तमीतएवलक्षणार्थे आधारत्वान्वयसंभवेगभीरायामि
त्यत्रविभक्त्यर्थान्वयासंभवादितिभावइतिकश्चित्। तन्न। वक्ष्यमाणस्वमतेपितद्व्यर्थत्वात्। अथ
तिगभीरायांनद्यामितिविभक्त्यंतभागस्यैवेत्यर्थः। विभक्त्यंतस्यनामत्वाभावेननामार्थयोरितिसु
त्यस्यानवकाशादर्देनैवयोस्तदर्थान्वयइतिभावः। अप्राप्तत्वादितिगंगायामितिसुपुरायस्यापि
लात्तीरोकत्वापत्त्यात्तेनबोधकत्ववाच्याएवमपभ्रंशोवारश्यापृशात्तेत्यावश्यकाइत्यपभ्रंशात्प
वच्छिन्नायात्तत्वावच्छिन्नबोधकतानस्याएवनिवेशात्वाकालेनबोधकतायांचशक्तेरनवच्छेदकत्वा

तर्कः तेनवाक्ये लक्षणासंभव इति भावः। व्यक्तमुक्तम्। अपभ्रंशवारणाय शक्त्या स्वबोधेस्याव्यवहितपूर्वकत्तया वाक्ये
५४ न शक्तिरित्याह। वाक्यमित्यादि। न चापभ्रंशस्यापि लक्षणत्वे दृष्टापत्तिः व्यक्तिमत्त्वमेव पदस्य साधुत्वमिति
ञ्च शक्यसंबंधरूपलक्षणायाः एवं व्यक्तिमत्त्वघटकतया तन्न व्यक्तिमत्त्वरूपसाधुत्वाभावात्। समाधौ
नस्वबोध्यसंबंधो लक्षणा तस्यैवास्ति लक्षणा। वै[illegible]पभ्रंशस्य समाधौ बोध्याभावान्नानुपपत्तिरित्यस्व
रसात्तत्वेन बोधकत्वावच्छेदकत्वमभिप्रेत्य दोषमाह किंचेति। अशक्तत्वादिति। स्वबोध्यत्वे हि स्वजन्य
बोधविषयत्वे समवायेन घटपदस्मारितगगनादेः संबंधप्रसङ्ग उपस्थितस्य च शाब्दबोध[illegible]पत्तेः। न च स्व
जन्यशाब्दबोधविषयत्वे तात्पर्यं तदिति वाच्यं गंगायां घोष इत्यादौ गंगापदे लक्षणानापत्तेः तेन गंगापदे
न प्रवाह शाब्दबोधाजननात्तस्माच्छक्यत्वात्स्वजन्यबोधविषयत्वमेव तत्त्वे वाच्यं तच्च शक्यसंबंधस्य ल
क्षणात्वापेक्षया गुरुतरं वा शक्तत्वाभावात्स्वकृते चासंभवतीति भावः। उपस्थिते हि तस्मादिति। वाक्ये राम
लक्षणाया असंभवादित्यर्थः। पदद्वय एव गंभीरपदेन दीपदेववि निगमकेति। एकतरपक्षपातिनी। ॥४

हियुक्तिविनिगमनात्तस्याश्चभावादित्यर्थः। विशिष्टेति विशिष्टायागंभीरानदी तस्यास्तीरइत्यर्थः। नन्वनेक
स्यैवलक्षणयाविशिष्टार्थबोधसंभवेऽपरपदस्यार्थमित्यतआह। नचेतिएकपदवैयर्थ्येनचेत्यन्वयः। पर
स्परेति। नदीपदेनगंभीरनदीतीरबोधजननीयेगंभीरपदसमभिव्याहारोनियामकः गंभीरपदेनकानादृशा
बोधजननीयेनदीपदसमभिव्याहारोनियामकइत्यर्थः। लक्ष्यार्थबोधेतात्पर्यज्ञानस्यहेतुतयानदीपद
गंभीनदीतीरप्रतीतीच्छयोच्चरितमितितात्पर्यज्ञानंगंभीरपदसमभिव्याहारादेवभवति। अन्यथाकेवलं
नद्यामित्युक्तौगंभीरनदीबोधापत्तेरितिभावः॥ एकत्रैवपदे [illegible] पदार्थलक्षणाप्रतिसंधानेतुदात्पद एव
लक्षणायदाउभयपदेलक्षणाप्रतिसंधानंतदोभयपदलक्षणैवशाब्दबोधप्रयोजिकातेनभेदेना
न्वयएवैयर्थ्यमितिन्यायेनचैकमेवविशिष्टतीरंबुध्यतइतिद्रष्टव्यं। अत्रनेदंबोध्यं। गंभीरनघोरन्वय
बोधोत्तरंगंभीरनदीसंबंधग्रहान्नदीपदेनविशि [illegible] ष्टतीरलक्षणेति। अन्यथानदीसंबंधग्रहाद्विशि
ष्टतीरबोधानापत्तेः इत्थंचस्वशक्तिताप्यसंबंधोलक्षणा साचपदएवनवाक्येक्षतत्वादाकृत्लक्षणा।

तर्क वादिमतेपि प्रत्येकं पदरूपे विनिगमकाभावात्लक्षणायां पादुर्वीरत्वाच्च । न चैवं नीलं हि रेफ माननपेक्ष्य विशि
५५ ष्टसंबंधि निलक्षणानुपपत्तिः । पदरूपस्यापि लाक्षणिकत्वे पानानुभावकत्वेन स्वरूपतोप्यप्रसिद्धेरिति वा
केवलं लक्षणावादिनां सहतुल्यत्वमिति वाच्यं लाक्षणिकस्याप्यनुभावकत्वोपगीकारात् । वक्ष्यते च । कोश
क्यसंबंध एव लक्षणा । नदीपदस्य न घोषत्वं गंभीरनद्या अविश [illegible] त्वात् । गंभीरपदस्य तात्पर्यग्राहक क ४
८५ त्वात् पाचगंभीरा भिन्ना नदीति त्रिवार्तं वा वाक्यार्थबोधं विनापि गंभीरनदीतीरत्वासंभवादिति [illegible] कुं । म ५
सं भस्यापद्रूस्यनेनान्वयरसः सूचितः । स च गंभीरपदस्य गंभीरत्वशक्तत्वेन तस्य स्वाश्रयाभिन्नेन नदीसं
बंध एव तीरे वाच्य इति परंपरासंबंधे गौरवात्साक्षात्संबंधसंभवान्नदीपदे [illegible] वलात्लक्षणा यु
क्ता । यद्विचत्रीरोहारपदवत्तथमित्यपि शक्तिः नीलादिपदवत्तु केवलं गुणमात्रे गंभीरपदं यथा गं म
दिति भाष्ये तेन तथापि शुक्लादिपदानां गुणमात्रवाचकत्वेन शुक्लापानयोः घोषइत्यादौ लक्षणा त्वास राम
बंधासंभवाद्विशेष्यवाचकपदे एव लक्षणा यथा शुक्ल त्वात्संबंधोत्तरपदे एव लक्षणा ॥ एवं विचित्र ५५

रित्यन्वयिनो पदस्यैव सार्थक्याच्च सर्वत्रोत्तरपदस्यैव बहुव्रीहौ लक्षणोपि । चित्रगुगभीरपदो लक्षणायां नदी
पदोत्तरसप्तम्यर्थान्वयोन्यस्याद्विशेषणविभक्तेः प्रयोगसाधुत्वादिति विशेष्यवाचकपदस्यैव लक्षणायां च
च विशेष्यवाचकपदोत्तरविभक्तेरेवान्तशब्दसाधुत्वमात्रार्थमिति वाच्ये विशेषणविभक्तिस्त्वेन सामा
न्यतः प्रयोगसाधुत्वकल्पना दित्याहुः । तदसत् । लाक्षणिकार्थानुभावकगभीरपदस्य विशेषण
ते त्वाभावाद्युगपद्वृत्तिद्वयविरोधस्यानेकान्तरीतं यकमपदस्य यमत्वविशिष्टे लक्षणाया नगीकारस्तु
समुदायशक्त्या व्यवहारस्य प्रामाणिकत्वात् । अन्यथा तत्रापि वृत्तिद्वयापत्तिरिति वदन्ति । अत्रेदं बोध्यं गोपद
स्य चित्रगोस्वामिपरत्वे यः संबन्धितावच्छेदकत्तपाग्रहीतत्वे वक्तव्याद्भिन्नाचित्रगोसंबन्धित्वेन तेनैव बोधमाने
ती रत्नवृत्तगंगासंबन्धितीरत्ववद्या आरूढवानरोवृक्षस्तस्य च आरूढः वानरो यस्मिन्निति वाक्ये आरूढपूर्वक रहधा
तोरूर्ध्वदेशावच्छिन्नसंयोगानुकूलक्रियाकर्तृत्वस्य अयं द्वितीयाया आधेयत्वमर्थः वृक्षस्य च ऊर्ध्वदे
शावच्छिन्नसंयोगानुकूलक्रियाश्रयो वानरः इत्यन्वयबोधः समासेन तु आरोहणकर्तृवानरसंबन्धी वृक्ष इ
त्यन्वयधीः संबन्धस्तु कारोहणकर्मत्वं एवं चैत्रेण दत्तं धनं इत्यन्न चैत्रेण दत्तं धनं यस्मै इति वाक्ये चैत्रक

दतन~ ण २

र्दकं यत्संप्रदानकर्मधनमित्यन्वयबोधः। समासे तु तेन कर्तृकदानकर्मधनसंबंधीत्यन्वयबोधः। संबंधस्य
न कं प्र ५६ कर्मकदानसंप्रदानत्वमिति। अत्र च समानाधिकरणबहुव्रीहिः। चक्रपाणिरित्यादौ तु व्यधिकरणबहुव्रीहिः। चक्रं
पाणौ यस्येति विग्रहवाक्ये यत्संबंधिपाणिवृत्ति चक्रमित्यन्वयधीः। समासे तु चक्रयुक्तपाणिसंबंधीति बोधः।
स च तद्गुणसंविज्ञानबहुव्रीहिरतद्गुणसंविज्ञानबहुव्रीहिश्चेति द्विधा। भूवादयो धातवः। चैत्रादीन् भोजय लंब
३५ कर्णमानयेत्यादावाद्यः। अंत्यस्तु। चित्रगुरित्यादौ। तथाहि। भूवाद्यसूत्रादौ क्रियावाचित्वेन निर्मचितत्वेन लं
बकर्णाव यविनोर्यः संबंधस्तद्वत्वच्छिन्नत्वेन चान्वयबोधः लक्षकसंबंधस्य केवलस्य तावच्छेदकत्वान्नेन रूपेणा
न्व न्वबोधाद्विशेषणस्यापि भूवादेः क्रियां पत्वादजहत्स्वार्थानलक्षणा। तस्य समस्यमानपदार्थस्य गुणी
भूतस्यापि समन्यकृविशेष्याविधयाज्ञानेयस्मादिति व्युत्पत्तेरिति संप्रदायः। अन्ये त्वाहुः। यद्यपि लंबकर्णस्या
दौ अजहत्स्वार्थालक्षणा तदालंबकर्णस्यापि विशेष्यत्वेनैवान्वयेऽनुभव[illegible]धः। तस्मादत्रापि जहत्स्वार्थैव यो २
व। विशेष्यत्वेन विधेयान्वयस्स्वार्थत्यागात। यत्र विशेषणतया स्वार्थस्य विधेयान्वयः स तद्गुणसंविज्ञा एम
नबहुव्रीहिः। यत्र स्वार्थस्य विधेयान्वयः स अतद्गुणसंविज्ञानबहुव्रीहिः। विशेष्यान्वयि ५६

हि:१

नाऽन्वयित्वमेव विशेषणत्वं प्रपञ्चितं लंबकर्णोत्यादौ लंबकर्णसंबंधित्वेनोपस्थितिः। चित्रग्वित्यादौ च चित्र
गोसंबंधित्वेनोपस्थितिस्तुल्यैव तथापि लंबकर्णादेर्विशेष्यान्वयिनान्वयात् विशेषणत्वं यथा विधेयान्वयक चि
त्रगोस्तु उपलक्षणत्वात्तथेति। अन्ये तु शाब्दबोधस्य सममेव तन्नामितिके। चित्तु भूवादिः प्रथमः पाठतो येषामिति
विग्रहवाक्यात् भुवाभिन्नः प्रथमः पाठतो यत्संबंधीति बोधः। समासात्तु भुवाभिन्नप्रथमपाठतः संबंधीति बोधः।
एवं चैत्रः आदिः प्रधानो येषामिति विग्रहवाक्याच्चैत्राभिन्नः प्रधानो यत्संबंधीति बोधः। समासात्तु चैत्राभिन्नप्रधा
नसंबंधीत्यन्वयबोधः। संबंधश्च स्वपाठप्राप्यार्थसंबंधित्वं स्वनिष्ठप्राधान्यावच्छिन्नत्वं वा। अन्ये भूवादिभिन्नप्र
थमपाठतः संबंधित्वं चैत्राभिन्नप्रधानसंबंधित्वादिनाऽदिशब्दस्य लक्षणा। लक्षणानावच्छेदकस्यापि भूवादे
र्विशेष्यान्वयिधात्वादिनाऽन्वयात्तद्गुणत्वं लक्षणायां अजहत्स्वार्थत्वं चेत्याहुः॥ अपरे तु। लंबकर्णोत्यादौ वि
शेष्यतयाऽन्वयाननुभवात् तत्र अजहत्स्वार्था भूवादयः इत्यत्र तु गणपठितत्वनिमंत्रितत्वादिनैव बोधः। शाब्द
लक्षणयोर्विधेयान्वयानुभवात् काकेभ्यो दधिरक्ष्यतामित्यत्रैव शाकाल लक्षणयोर्विशेष्यान्वयमानाद्वयलंब

तर्कं ५७

कैमुत्यौ वादिता धारणात कुशलत्वादिकमित्याहुः। आदिशब्देन गणपठितत्वनिमंत्रितत्वादिना लक्षणाभूत्वेना
दिपदे तात्पर्यग्राहकमित्यन्ये। भूतत्वात्वादिना चैत्रत्वमैत्रत्वादिना नानारूपेण लक्षणा उगपद्वृत्तिद्वयविरो
धानुगमात्। तदुपगमे तु पुष्पवंतादिपदेना नानारूपेणैकधर्मावच्छिन्नानां रूपेणैकलक्षणाया। स्वीकारान्न
दोष इत्यपरे। चैत्रशब्देन शक्त्या। यमनेनादिशब्देन च लक्षणा गमैत्रत्वादिना बोध चैत्रपदार्थादिपदार्थ
योरभेदेनान्वयबोधस्यापि तात्पर्यविषयत्वात् द्वयोरभेदान्वयाभावात्तद्धेतुतापत्तिरित्यपि केचिदितिकृतं
पल्लवितेन। अव्ययीभावसमासे पि शक्तिभावमुपपादयति। उपकुंभमिति। उपकुंभमित्यव्ययीभा
वः। अर्द्धपिप्पलीति तत्पुरुषः। उपशब्दे निपाते प्रत्यये तत्ता की होते भावात् कुंभस्योपेतिना न विग्र
हः। किं तु कुंभस्य समीप इति उपकुंभमिति द्रष्टव्याः उत्तरपदेति। कुंभपदस्य कुंभसंबंधिनि पिप्पली
पदस्य पिप्पलीसंबंधिनि लक्षणानन्यथोपाध [illegible] र्थे सामीप्यादावभेदेनान्वयः। वस्तुतस्तु उपपदार्थ
सामीप्यं न तु समीपः तथा चोपपदस्यापि समीपाद्यर्थलक्षणा एकदेशे च सामीप्ये कुंभादिसंबंधिनं ता

राम ५७

दात्मेनान्वय इति पदद्वयलक्षणापेक्षया कुंभपदस्यैव कुंभसमीपपरतात्पपदं तात्पर्यग्राहकमिति।
केचित्तु चेद्दृश्यमुखमित्यादौ इवार्थसादृश्यस्य भेदेन मुखेऽन्वयेनाव्ययनिपातातिरिक्तस्थले एवना
मार्थयोर्भेदेनान्वयबोधानंगीकारात्तु पदार्थसामीप्ये कुंभस्यान्वयबोधसंभवात्संबंधप्रकारका
नुभवानुरोधेन परं कुंभपदस्य कुंभे संबंधे लक्षणा। अनुभवाननुरोधे तु अत्रापि उत्तरपदे लक्षणा सा न४
ति॥ ध्रुः। [illegible] अन्यलभ्यकत्वात् उत्तरपदलक्षणादिना लभ्यत्वादित्यर्थः। अनन्यलभ्यस्यैव शब्दार्थ
त्वादिति भावः। एवं निर्मक्षिकमित्यव्ययीभावेप्युत्तरपदे मक्षिकाभावे लक्षणा पूर्वपदं तात्पर्यग्राह
कमिति ध्येयं। समाहारद्वंद्वस्तु इतरेतरद्वंद्वभेदेन द्वंद्वो द्विधा इतरेतरसमाहारद्वंद्वे पाणिपादमित्यादौ पाणि
पद३ पादस्य पाणिपादस्येति यौगिक समाहारे शक्तिरिति मतं दूषयति। समाहारेति। पाणिपदस्य पाणिस्व
तियौगिके पादपदस्य च पादस्वतियौगिकसमाहारे पदद्वयस्यैव लक्षणा पाणिस्वतियौगिकाभिन्न राम
पादस्वतियौगिकसमाहारवाद्धयेत्यन्वयबोधः। समाहारे च विभक्त्यर्थैकत्वान्वयः। अत एव समा

तर्कं हारस्यैकत्वादेकवचनमेवेति।उत्तरपदएवपाणिपादप्रतियोगिकसमाहारेलक्षणापूर्वपदंचतात्प
५८ र्यग्राहकमित्यप्याहुः।ननुसमाहारेशक्तिरन्यलभ्यत्वादित्याहु।।नपाणीति।समाहारेलक्षणेति।स
माहारश्चेति।क्रियाधात्वपनीतफलानुकूलसजातीयविजातीयव्यापारसमूहस्तस्यैकरूपस्तुल्यः
संबंधःसमाहारः।यथापाणिपादंवादयेत्यत्रवादनक्रियायांतुल्यवदेवपाणिपादयोरन्वयः।ए
न वंधवखदिरौछिंधीत्यत्रछिदानुकूलोपायव्यापारःधवखदिरयोस्तुल्यएवभासते।ननुएकक्रि
यान्वयित्वस्यवादनादिरूपैकक्रियान्वयरूपतयातस्यचसंबंधिभेदाद्भेदेनाननुगमइत्यतआह
।सेनेति।यथासेनात्वंनामनतत्तदश्वादिविषयकज्ञानविषयत्वं।एवंतत्तद्धस्त्यादिविषयकज्ञान
विषयत्वंवनत्वंतुतथापेक्षाबुद्धिविषयत्वमेवसमाहारः।अपेक्षाबुद्धेरव्यासज्यवृत्तेरपिविषयत
याव्यासज्यवृत्तित्वोपगमान्नाननुगमइतिभावः।ननुसमाहारस्यसंबंधिभिन्नत्वेक्रियाजन्यफल
शालित्वरूपकर्मत्वस्यक्रियायामसंभवेनकथंपाणिपादमित्यत्रकर्मविभक्तिरित्याशंकते।ननु राम
५८

अनन्वयः द्वितीयार्थकर्मत्वादेरनन्वयः तमेवाह ॥ समाहारे इति तुल्यवदेकादि ... पित्वरूपेइत्यर्थः

वमिति। एवं समाहारस्य तुल्यवदेकक्रियां[illegible]पित्वरूपत्वे। वस्तुतस्तु। एवमित्यस्य पाणिपादसमाहारमित्य
स्य लक्ष्यत्वे इत्यर्थः। वादनेति। वादनरूपक्रियाजन्यफलशालित्वरूपवादनकर्मत्वस्य तत्राभावादित्य
र्थः। तथा च वादनकर्मत्वे पाणिपादयोरेव न तु समाहारे इति भावः। परंपरयेति। स्वाश्रयप्रतियोगिक
त्वरूपपरंपरयेत्यर्थः। तत्र समाहारे एकइत्यनेन साक्षात्संबंधेनानुभूयमानकर्मत्वबोधस्यपर्यो
पपादनमेवास्वरसः सूचितः। समाहारेति। समाहारवाचकपदोत्तरविभक्त्येत्यर्थः। समाहृयमाणए
वसमाहारप्रतियोगिन्येव। एवकारेण[illegible]समाहारे साक्षात्संबंधाभावादिति पूर्वोक्तास्वरसो
दर्शितः। ननु मत्स्यपानो मकृत्यर्थगतस्वार्थबोधकत्वनियमभंगप्रसंग इत्यत आह। व्युत्पत्तीति। व्यु
त्पत्तिराकांक्षातद्वैचित्र्यात्कार्यकारणभेदेन कार्यकारणभावस्याभिन्नत्वात्। प्रकृते भिन्न एव कार्य
कारणभावः कल्प्यते। अनुभवानुरोधात्तादृशव्युत्पत्तेः स्वीकार इति भावः। अत्र समाहृयमाण
यो हित्वाद्द्विवचनापत्तिः। मत्स्यपानामिति व्युत्पत्तिसंकोचस्यान्ये इत्यनेनास्वरसः सूचितः। पाणिपाद

समाहारस्यानेकोत्तरस्यैकस्य माधिहारर्का
नियोगितावत्तर्पिता... मम समाहारी...

तर्कं ५८ मित्यत्र पाणिपादसमाहारस्यानुभवसिद्धत्वाद्धा पाणिपादावितिद्विवचनापत्तिर्भिपाइत्तरेतरसमाहारसं
ज्ञानुरोधाद्दा पाणिपादसमाहारेलक्षणाकल्प्यत इतितत्र दूषणात्र पमुद्धरन्नन्यमतमुपपादयति। पा
णिपादं चादयेत्यत्रेति। पाणिपादमात्रेतिमात्रपदात्समाहारेव्यवच्छेदः। अनुभवसिद्धत्वात्समाहारे
वृत्तिकल्पनेतदेवाहन अनुभवस्येवाभावादितिभावः। वैय्याकरणार्थप्रवीणेन न्यापिकमेदेन शक्ति
लक्षणयोरूपादानेननु पाणिपादमित्यत्र समाहारेवृत्त्यकल्पनेपाणिपादयोर्द्वित्वात्पाणिपादावि
तिद्विवचनापत्तिः। मम तु समाहारस्यैकत्वात्तन्नद्वित्वानन्यासंभवेननतदापत्तिरित्यभिप्रेत्याह। नबै
वामिति। एवंपाणिपादयोरेवप्रतीतावित्यर्थः। असाधुत्वादिति। व्याकरणप्रतिपन्नत्वादित्यर्थः।।
द्वंद्वश्च प्राणितूर्यसेनांगानामेकवद्भावोवक्तव्य इत्यादिसूत्रेणतत्रैकवचनमेवविहितं। यथादा
रागांबहुत्वाभावेपिबहुवचनमितिभावः।। ननुसमाहारस्येत्ताऽनुपपन्नात्समाहारबोधस्यात्मीऽ
नुदयेनान्वयेसंज्ञापो अभावात्समाहरणासमाहारः अनेकस्यैकीकरणएकोधर्मइतियावत्। राम ५८

न८ ना५

।नद्वेधवकोद्वंद्वसमाहारद्वंद्वइतिमेत्यतआह।इतरेतरेति।इतरेतरसंज्ञासमाहारसंज्ञाविप्यर्थः।नदीतिन
द्वीसंज्ञाघुद्धिसंज्ञायथापारिभाषिकीतथासमाहारसंज्ञापीत्यन्वर्थसंज्ञाभावेपिनक्षतिरितिभावः।स्वरू
पेति।धववखदिरस्वरूपद्वयप्रतीतेरित्यर्थः।नलक्षणेति।यद्यपिशक्तेर्मुख्यत्वान्नशक्तिर्नवालक्षणेति
वलेखेनमुचितंतथापिप्राचीनव्यापिकमतेसमाहारद्वंद्वेलक्षणायाःप्रक्रांतत्वेनसेवादोनिराकृतेति
।अनावश्यपीति।इतरेतरयोगेपीत्यर्थः।अपिनसमाहारद्वंद्वसमुच्चयः।समाहारेसाहित्यलक्षणाअव
तुसाहित्याश्रयेइतिपरेभेदः।धवेति।धवपदस्यखदिरपदस्यवाधवखदिरसात्याश्रयेलक्षणा।इत
रपदंचतात्पर्यग्राहकंमीमांसकमतेत्वाद्यकेएववालक्षणाधवखदिरसाहित्याश्रयोछिंधीत्य
न्वयबोधः।ननुकृतंसाहित्यलक्षणयेत्यतआह।तद्धुरिति।एतत्सूत्राद्यांहिसर्वैवाक्यमावधा
रणमितिन्यायेनसाहित्यंगम्यमानएवद्विवचनबहुवचनेभवतः।द्वंद्वसमासोवा।वाकारश्चार्थेद्वंद्व
समासश्चसाहित्येगम्यमानएवभवतीत्यर्थः।धववत्वेनखदिरत्वेनचोपस्थितेसख्यान्वयेधवद्वयधीः

तर्कप ५० ःखदिरद्वयधीप्रसक्तात्। अन्वयितावच्छेदकव्याप्यसंख्याबोधकत्वाद्विभक्तौ। नो। अन्यथा घटपटत्ववृत्तिद्वि
त्वमादाय एकस्मिन्नपि घटे घटावित्यस्य प्रसंगः। साहित्यलक्षणमापांनुसहितत्वेनोपस्थितेहित्वान्व
यः। एवं चार्थे द्वंद्व इति सूत्रे समुच्चयान्वाचयसमाहारेतरेतरयोग इति चत्वारश्चार्थाः। तत्र समुच्चयान्वा
चयातिरिक्तचार्थे द्वंद्व इति तदर्थः। समुच्चयान्वाचययोः साहित्यानवगमान्न द्विवचनबहुवचनापत्ति
ः न वा द्वंद्वसमास इति। द्वंद्वे साहित्यैलक्षणं विना द्विवचनबहुवचनानुपपत्तिः। द्वंद्वसमासानुपप
त्तिश्चेति तल्लक्षणाऽवश्यकमिति भावः। ननु समुच्चयान्वाचययोः कथं न साहित्यबोध इत्यत
आह। साहित्यं चेति। एतेन साहित्यलक्षणस्य पुनर्वचनमसंगतमिति शंका निराकृता। समु
च्चयादिवारकत्वेन तत्संगतेः तुल्यवदित्यस्य व्यावृत्तिमाह। अत एवेति। तुल्यवदेकक्रियान्व
यित्वस्य साहित्यरूपत्वादेवेत्यर्थः। ननु यजमानस्यैव पत्न्या अपि यागादावन्वयात्साहित्यं राम ५०
दुर्वीरमत आह। यागादाविति। अनुमतौति।। एवंकुत्रविसर्गाद्वारे इत्यर्थः। तथा च यथा यजमा

न या

नस्यक्रियायां कर्तृत्वेनान्वयः त[illegible]यत्वात्। कर्तृत्वेन साहित्यं न विवक्षितं व्यापारसंबंधाभावात् [illegible]दा
च प्रयोजकत्वमात्रेण तयोः संबंधो विवक्षितः तदा भवत्येव साहित्यं। पृथ्वादयस्त्वो स्तिपादि। तथा च द्वंद्वस
तेर हित्वेन क्रियान्वयाधवान्योन्यसाहित्यान्वयपूर्वक इतरेतरपदार्थान्वयस्तत्र समासः। इतरेतरसमा
हारयोस्तथान्वयात्समासः साधुः। समुच्चये तु। असंबद्धयोः एकैकशः क्रियान्वयो न तु साहित्येनापि
छिंधि तयाप्यथा धवं खदिरं च छिंधीति समुच्चये तु तुल्यवदसंबद्धयोः क्रियान्वयधीः एकरूपसजातीयवि
जातीयव्यापारयोर्भिन्नरूपसाहित्यं चादीनां द्योतकतया पश्चान्मानांतरेणावगम्यते। चादीनां वा
चकत्वेपि तुल्यवत् साहित्यान्वयाभावात् द्विवचनबहुवचनयोरेव साहित्यव्यंजकत्वादिति क्रियाभे
देन्वाचयः। यथा धेनामाहर्तुं वनं व्रज शाकमप्यानेष्यसीति। ननु धवं छिंधि खदिरमपि छिंधीत्यत्रा
च न्वयेऽव्याप्तिः क्रियाभेदाभावाभावात्। किंच घटं पटं चानयेत्यत्र समुच्चयेऽतिव्याप्तिः। उभयत्रैव प्रा
धान्येन क्रियान्वयेतात्पर्यात्तस्य समुच्चयत्वादेवमाहरणानयनयोः क्रियापदयोरभेदो देधेनामाहर्तुं

घटाद्यन्वयेऽव्याप्तेः अनिरूढपदभेदेन क्रियाभेदोपपादनेन समुच्चयेऽतिव्याप्तिरिति चेन्नः आख्यातेन यत्र क्रियाचयेऽतात्पर्यं स समुच्चयः । यथा...नावेन यत्र क्रिया

तर्कं० ५२ मित्यादौ [redacted] सोन्वाचयः समुच्चयो गच्छतीत्यादौ तु तस्यैकक्रियान्वयित्वेऽपि विशेषणत्वेनैवान्वयान्नातिव्याप्तिरिति । यत्र
गुणवत् क्रियान्वये तात्पर्यं तत्र समासः । समुच्चये चकारेण क्रियान्वयो नान्तु युगपत् क्रियाच व्यापारमात्रे । इत्थं च तु
ल्यवदेकविधेयान्वयित्वं साहित्यं तेन धवखदिरावितिक्रियारहिते धातूपनीतफलानुकूलव्यापारवत्त्वात् सतीतो
कथं साहित्यबोध इति निरस्तं । चैत्रमैत्रौ स्थितिगतिमन्ताविति यथासंख्येनैकैकेनान्वयात् इति क्रियाघटितादेवं
दः । यद्यपि एतावता द्वित्वान्वयार्थं अन्वयितावच्छेदकतया साहित्यभानमित्यायातं । तच्च घटेन जलमाहरेत्यत्र
च्छिद्रेतरत्वस्यैव योग्यतावच्छेदकतयैव भानोपपत्तौ मीमांसकमते साहित्यलक्षणायां न बीजं तथापि पदानुप
स्थितस्य शाब्दे न भानमिति मंगीकृत्येदं । आकुरित्यस्वरसोद्भावनं तत् । द्वौ जातु प्रत्येकमुपस्थितयोर्धवखदिरयो द
र्द्वित्वबोधसंभवे साहित्यलक्षणाकल्पनमनर्थकं । अन्वयितावच्छेदकसमानाधिकरणसंख्याबोधकत्वं विभक्ते रा ४
भी बो नानत्वाप्तत्वात् [redacted]पि गौरवात् । घटौ आनय पटं चेत्यत्र पटमादाय घटे न द्वित्वान्वयापात्पटस्याप्रकृत्यर्थत्वा
त् । प्रकृत्यर्थमात्रवृत्तिसंख्याबोधकत्वाद्विभक्तीनां यादृशसमुदायोत्तरविभक्तिस्तस्यैव प्रकृतित्वेन धवखदिरा रा म
पि प्रकृत्यर्थत्वात्स्वीकृतेन दोषः । किंच धवादिपदात् साहित्यत्वेनैव पदाद्विबोधः तदा चैत्रमैत्रौ गच्छत इत्यत्र गमनस्या ५२

स्यसादृश्यपदस्य नामार्थेऽभेदातिरिक्तप्रतियोगितासंबंधेनान्वयोपपादनाय तादृशनियमसंकोचकल्पनाया आव
श्यकत्वादिति भावः। यद्यप्येवं चंद्र इव मुखमित्यादौ चंद्र इवार्थयोरभेदेनान्वयोपपादनाय नियमसंकोचस्यावश्य
कत्वादेव। घटेति। घटाद्यभाववत्प्रतियोग्यनुयोगिभावस्य संसर्गमर्यादयैव भानात् लक्षणाकल्पनमन्याय्य
मिति भावः। नानाभावान्नामार्थयोरित्यादिनियमस्याव्ययनिपातातिरिक्तस्थले इति संकोचे मानाभावादित्य
त्यर्थः। नन्वेवं चंद्र इव मुखमित्यादौ चंद्र इवार्थयोः कथमन्वयबोध इत्यत आह। चंद्र इवेति। नत्वसदृशेति। चं
द्रसदृशेत्यर्थः। नन्वेवं इवपदमनर्थकमत आह। इवपदं चेति। तात्पर्येति केवलं चंद्रेतिपदान्नसादृश्यबोध इ
ति चंद्रपदस्य चंद्रसदृशलक्षणायां इवपदसमभिव्याहारस्तंत्रमित्यर्थः। नन्वेतल्लक्षणाकल्पनमपेक्षया च
न्द्र इवपदस्य निपातस्याभेदे नामार्थेन सादृश्ये शक्तिरेवास्तामत आह। अत एवेति। चंद्रपदस्य चंद्रसदृशलक्षकत्वा
देव। अन्यथा लक्षणाकल्पने तदनुपपत्तेः। चंद्रमिवेति द्वितीयानुपपत्तेः। चंद्रपदस्य चंद्रसदृशलक्षणाप
न्नस्याभेदेनान्वयात्। अभेदान्वये च विशेषणविशेष्यवाचकपदयोः समानविभक्तिकतायास्तंत्रत्वाच्चंद्रमि
मिति विशेषणवाचकपदोत्तरं द्वितीया आवश्यकी। भवन्मते तु इवार्थसादृश्यस्याश्रयतया मुखेऽन्वयेना
दे

तर्क· भेदान्वयाभावाद्वितीयानुपपत्तेश्च चन्द्र इव मुखमित्युपमाप्रतीतेरपि सादृश्यबोधोपपत्तेरिति भावः। ननु चन्द्रपदस्य चं
८२ प्रतियोगिकमर्थः। सादृश्यशक्तस्य च इवादेः सादृश्याश्रये लक्षणात् स्वाभेदेन मुखेऽन्वय इति रीत्या चेद्भि
न्नमुखमित्यत्र समानविभक्तिकत्वोपपत्तिः सम्भवत्येव न घटः पट इत्यत्रैव अन्यथात्वापि घटपदस्य घटाभा
ववति लक्षणान्नञ्पदं च तात्पर्यग्राहकमित्यपि सम्भवतीति चेन्न। भूतले न घट इत्यत्राभावविशेष्यकबो ८
धस्य शाब्दानजाजननात्। अभावशक्तस्य नञो भाववति लक्षणाया विना। केवलं चन्द्र इवेत्यप्रयोगात्। शा
ब्दाइव पदात् सादृश्यविशेष्यकबोधाभावात् इवादेः सादृश्यशक्तेरेवाकल्पनात्तेषां निरर्थकत्वमेवेत्या
शयात्। इवादीनां सादृश्ये शक्तत्वस्युपगमेऽपि न व्युत्पत्तिसंकोचः इत्याह। अस्तु वेति। षष्ठ्यर्थे प्रतियोगित्व
चंद्र ८ रूपे विभक्तौ चन्द्रात्प्रथमाविभक्तौ इवपदोत्तरं खलु द्विभक्तेरनुसन्धानं तथा च नानार्थयोरिति नं ४
व्युत्पत्तिसंकोच इति भावः। ननु सुविभक्तौ न लक्षणेत्यत आह। अनुशासनेति निपातप्रयोगा हि केवि
इव्यया इत्यनुशासनबलादित्यर्थः। अनुशासितविभक्त्यर्थातिरिक्तस्थले सुविभक्तौ लक्षणास्तीति राम·
भावः। तथेति। घटो नास्तीत्यत्र घटपदोत्तरं प्रथमाविभक्तेरपि [illegible] सित्वे लक्षणात्पर्यः। भूतले घट इ ८२ न।
ना

स्यैव केवलं चेद्दूषयेत्तिन प्रयोगः। चेद्दूषणमुक्तमित्यत्राह लुप्तविभक्त्यनुसंधानेपि बोधात् चेद्दूषणस्य चेद्दूषणश
लत्त्वकत्वमेवोचितमिति कुत्रापि द्वादिनाशात्तथा सामान्यस्यापाबाधनात्तेषां निरर्थकत्वमेवेत्यस्वरसो तु कल्पनेन
सूचितः। पृथिव्यां गंधो न जले इत्यत्र पृथिवीवृत्तिगंधो गंधाभावो जलवृत्तिरित्यन्वयबोध स्वीकारे समानवि
शेष्यकत्वानुपपत्तेः। पृथिवीवृत्तिगंधः जलवृत्त्यभावप्रतियोगी गंध इत्यन्वयबोधस्वीकार आवश्यक इत्यभिप्रा
यिणां मतमाह अन्ये त्विति। ननु पृथिव्यां गंधो न जले इत्यादौ समानविशेष्यकत्वानुरोधेन तथान्वयस्वीका
रेपि भूतले घटो नास्तीत्यत्र भूतलवृत्तिघटाभाव इत्यन्वयबोधे बाधकाभाव इत्यत आह। घटो नास्तीत्यत्रेति।
एकत्वादिरिति। भावनान्वयि॰न्येचसंख्यान्वयेन घटो नास्तीत्यत्र घटाभावो स्तित्वाश्रय इत्यन्वयस्वीकारे भा
वनाविशेष्ये घटाभावे द्वित्वादेरसंभवितया घटौ न स्त इति न स्यात्। तत्र एकत्वसत्वेनैकत्वबोधे बाधकाभा
वाद् घटौ न स्त इति स्यात्। भावनाविशेष्यवृत्तिसंख्याबोधकत्वादिति व्याप्तेरयमर्थः। नहि वीदृशो न्वयबोध इ
त्यत आह। किं त्विति। भूतले घटो नास्तीत्यत्र समभ्यानिरूपितत्वार्थकतया आस्धातोर्विद्यमानत्वार्थकता
या आख्यातस्याश्रयत्वार्थकतया भूतलनिरूपितविद्यमानत्वाश्रयो घटाभाव इत्यन्वयबोधस्वीकारे भावना

नैवृत्तेः भावना ५

तर्क° १२ न्वयिनिरूपितत्वान्वयनियमात् मयन्मते विद्यमानाबाध्यपत्र रूपाख्यातार्थभावनाया अभावस्यैवान्वयेनाभावस्यैवा
त्वात् घटो नास्तीति स्यात् । नन्वमते च सप्तम्या आधेयत्वमर्थः । तथा च भूतलवृत्त्यभावीयो घटः अस्तित्वाश्रय इति बो
धोदयेन भावनाया घटस्यान्वितत्वा घटद्वये वृत्तबोधात्मस्मभवाद् घटो नास्तीत्यस्यानापत्तिरिति भावः । केति ।
भूतलवृत्त्यभावप्रतियोगी घटः अस्तित्वाश्रय इत्यन्वयबोधस्वीकारे किं रूपितास्तित्वाश्रयो घट इत्याकांक्षा
या अनिवृत्तेरपि इति भावः कथं तर्हीति । भूतलनिरूपितास्तित्वाश्रयो घटाभाव इत्यन्वयबोधस्वीकारे हीत्य
र्थः । इत्यादीति । भावनान्वयिन्यभावे हि तत्प्रभावात् घटो न सत् इति न स्यात् स्याच्च घटो नास्तीत्यर्थः । भावनेति
। भावनान्वयीयोऽभावस्तत्प्रतियोगिनि सत्त्वान्वय इत्यर्थः । तथा च भावनान्वयिन्येव सत्त्वान्वय इति
नि नञ्समभिव्याहारे स्याच्च घटो नास्तीत्यर्थः । भावनेति । भावनान्वयीयोऽभावस्तत्प्रतियोगिनि सत्त्वान्व
य इत्यर्थः । तथा च भावनान्वयिन्येव सत्त्वान्वय इति नञ्समभिव्याहारे नियमः । नञ्समभिव्याहारस्थ
ले तु भावनान्वय्यभावप्रतियोगिनि सत्त्वान्वय इति व्युत्पत्त्यन्तरकल्पने नैव घटो न सत् इत्यत्र घटस्यैव द्विवा राम
न्वयाद् घटो न सत् इत्यस्यानुपपत्तिः । न वा घटो नास्तीत्यस्यापत्तिरिति भावः । कथमिति । अन्यत्र भावनान्वयि १२

गी

न्येव संख्यान्वयस्य दृष्टत्वात् कथमत्राभावत्वेनाभावप्रतियोगिनि संख्यान्वय इत्यर्थः । तथैवेति । अभावप्रति-
योगिन्येव संख्यान्वयप्रतीतिरित्यर्थः । तथा च नञ्समभिव्याहारे संख्याप्रकारकबोधे नञर्थाभावप्रतियो-
ग्युपस्थितित्वेन हेतुत्वं कल्प्यत इति भावः । नञ्समभिव्याहारे यद्विशेष्ये यद्विशेषणप्रतीयते न जातु तद्विशेष्ये
तद्विशेषणाभावः प्रत्याय्यते । अन्यथा वृत्तिनैकानियमानुपपत्तेः । इत्थं च भूतलं घटत्वाभाववान् घट इत्येवा-
न्वय इति नियमवादिनो मतमाह । परे त्विति । इहभूतले घटो नास्तीत्यादौ नञ्व्याख्यातार्थस्य निषेधेऽन्वयो
न दृष्ट इत्यत आह । न प्रतीतीति । पाकानुकूलकृत्यभाववान् चैत्र इतिवद्भूतलास्तित्वाभाववानेको घट इत्यन्व-
यबोधे बाधकाभाव इत्यर्थः । नात इति । घटस्य विशेष्यत्वादित्यर्थः । द्विवचनेति । घटौ न स्त इति द्विवचनानु-
पपत्तिरित्यर्थः । इदमुपलक्षणं । घटौ नास्तीत्येकवचनापत्तिरपि नेत्यपि द्रष्टव्यं । अभावस्य विशेष्यत्वे
घटौ न स्त इति द्विवचनादिकं न स्यात् । विशेषणपदस्य विशेष्यपदसमानवचनत्वनियमात् । परं त्वभा-
वस्यैकत्वात् घटौ नास्तीत्येकवचनमेव स्यात् । घटस्य विशेष्यत्वे चास्य द्वित्वबहुत्वयोः क्रियापद-
स्यापि द्विवचनादिकं साध्विति भावः । घटौ नास्तीत्यत्र घटाविति द्विवचनेन द्वित्वावरुद्धैकत्वान्वयस्तम-

तर्क° बाहयोगपत्वे घटौ न स्त इत्यत्र च घटद्वयेऽन्वयसंभवाद्योगपत्वमिति नातः इत्यस्याभावार्थ इत्यपि कश्चित्।
६३ ननु भूतले घटो नास्तीत्यत्र सप्तम्या निरूपितत्वार्थकत्वापत्त्या तथा नो विद्यमानत्वार्थकत्वापत्त्याऽत्यन्तस्या
अप्रत्वार्थकतया भूतलनिरूपितविद्यमानताप्रपत्ताभाववान्घट इत्येवं बोधस्तत्र वाच्यस्तथाऽप्रत्व
स्याभाव एव विशेष्यो न तु घट इति भावनाविशेष्यगतसंख्याबोधकत्वाभावात्कथं द्विवचनोपपत्तिरि
चेत्तासामान्यारोपराभावारणाभावनाविशेष्यत्वेऽस्यान्वयस्वीकारेण प्रकृते परंपरया भावनाविशे
ष्यत्वस्य घटे सत्त्वादिति। एवं परंपरयाविशेषणस्यापि विशेष्यसमानवचनत्वमवसेयं। चैत्रो नानुप
पत्तीत्यादौ दृष्टत्वादिति बोध्यं। न च तथापि द्वित्वावच्छेदेन भूतलनिरूपितविद्यमानत्वाप्र
त्याभावस्यान्वये एकघटवति भूतले घटौ न स्त इति न स्यात् घटत्वावच्छिन्नसामानाधिकरण्येन नञर्था द्वि°
न्वयेन घटद्वयवत्यपि घटौ न स्त इति स्यात्। अधिकरणान्तरीयघटे भूतलास्तित्वाभावादिति वाच्यं
घटत्वावच्छिन्नावच्छेदेन नञर्थसामानाधिकरण्यान्वयात्। अधिकरणान्तरीयद्वित्वे नञर्थसामा राम
नाधिकरण्येऽपि एतद्भूतलवृत्तिघटवृत्तिद्वित्वे भूतलास्तित्वाभावसामानाधिकरण्याभावान्न घट ६३

यवृत्ति घटेन सह स्यात्पर्य्याप्तिरिति ध्येयं। नन्वेवमिति। सर्वत्रैवानुयोगिवृत्तित्वाभावस्य प्रतियोगिन्यन्वय
स्वीकार इत्यर्थः। जातौ न सत्तेत्यस्य जातिवृत्तित्वाभाववती सत्तेत्यर्थः। तत्र च संबंधसामान्यावच्छिन्नजा
तिवृत्तित्वाभावो वा समवायसंबंधावच्छिन्नजातिवृत्तित्वाभावो वा बोध्यते। तत्राद्यं आह। जातिवृत्ति
त्वाभावस्येति। एकार्थसमवायेन सत्तायां जातिसत्वेन तदभावबोधनासंभवादित्यर्थः। नचैककाली
नत्वादिघटैकार्थसमवायस्यापि वृत्त्यनियामकतया तेन संबंधेन सत्तायां सत्वेपि संबंधसामान्यावच्छि
स्ये न्नवृत्तित्वाभावोव। जन्यमानस्य कालोपाधितया मूर्त्तमात्रस्य दिगुपाधितया कालिकदैशिकवि
शेषणतापोस्तत्वासंभवितयात्तदादायापि वृत्तिविरहादिति वाच्यं। जातिः सतीति प्रतीतेस्तस्यापि वृ
त्तिनियामकत्वात्॥ द्वितीयेआह। जातिसमवेतत्वस्यैवेति। प्रतियोग्यप्रसिद्ध्यानसमवायसंबंधावच्छिन्नजा
तिवृत्तित्वाभावः प्रमेतुं शक्यत इति समवायसंबंधावच्छिन्नसत्तावृत्तित्वस्य चाप्रसिद्ध्या निषेधासंभवा
त्तुल्यत्वं तथापीत्यर्थः। अयोग्यमेवेति। निश्चिता नन्वयमपार्थकमिति भावः। इत्याकां॥ जातिर्न सत्तावृत्तिरिति
वाक्यापयाकृत्यविधोग्यतयोपपत्तौ अयोग्यत्वमन्याप्यमत आह। वृत्तिपदं चेति। सत्ताहीति। जातिर्न सत्तावृत्ति

मा

तर्क १५

शित्वलक्षणापासत्तानिरूपितसाक्षात्संबंधावच्छिन्नवृत्तित्वाभावः प्रतीयते। सत्तानिरूपितसाक्षात्संबंधावच्छि
न्नवृत्तित्वं च स्वरूपसंबंध[illegible]हाय प्रमेयत्वादौ प्रसिद्धमिति नोक्तदोष इति भावः। तुल्यमिति। जातौ न सत्ता इत्यपि
वाक्यमयोग्यमेव योग्यत्वे वा जातिनिरूपितसाक्षात्संबंधावच्छिन्नवृत्तित्वाभावः प्रतीयते इति भावः। कोवि
नुसत्तापदं सत्तासमवायपरं सन्नम्यर्थस्यानुयोगित्वे। तथा च जात्यनुयोगिकत्वाभाववान्सत्तासमवाय
इति बोध इत्याहुः। समवैतीति पदाध्याहारेणा तथा बोध इत्यन्ये शंकते।। तथापीति। निषेधः। भूतलास्ति त्व
निषेधः। कथमिति। नामार्थयोरभेदेनैवव्युत्पत्तेरिति भावः। निपातेति। निपातातिरिक्तस्थले एव नामार्थयोरि
ति व्युत्पत्तेरिति भावः। न नामार्थमात्रस्य। न नामार्थसामान्यस्य। प्रतियंतीत्यनेन। स्वरसः सूचितः। सव्युत्प
त्तिसंकोचे गौरवं। एवं जातौ न सत्तेत्यनेन जातिवृत्तिः सत्ताभाव इत्येतावतैवोपपत्तेर्लक्षणादिकल्पने पिनहि
जातिर्नसत्तावृत्तिरित्येकत्र लक्षणाकल्पनाऽन्यत्रापि तथेत्यत्र प्रमाणमस्ति। भावनान्वयस्य भावप्रतियो
गित्वेति संख्याबोधकत्वे नैवयथवनैका नियमस्याप्युपपत्तेरिति न किंचिदेतत्। किंचिपामकमिति। नत्रो राम
लावमात्रशक्तत्वेन घटो नापित्यत्रात्यंताभावः भूतले न घट इत्यत्रान्योन्याभावः प्रतीयतेऽर्थः। समभ्यास्तु १५

ल्पत्वादिति भावः। शंकते अधिकरणेति। नञ्जन्यात्यंताभावविषयकशाब्दत्वावच्छिन्नं प्रति अनुयोगिवाच
कपदसमभिव्याहृतसप्तमीपदज्ञानत्वेनाऽन्योन्याभावविषयकशाब्दबोधेऽनुयोगिवाचकपदसमानविभक्ति
कप्रतियोगिवाचकपदजन्योपस्थितित्वेन च कारणत्वाच्च पूर्वोक्तदोषापत्तिः। सामग्र्या विलक्षणत्वादित्य
र्थः। न पचतीति। पाकानुकूलकृत्यभाववांश्चैत्र इत्यन्वये अनुयोगिवाचकपदसमभिव्याहृतसप्तमीपदज्ञानस्या
भावेन न तस्याः सामग्रीत्वमित्यर्थः। ननु वैयाकरणमते आख्यातस्य कर्तरि शक्ततया पाककर्तृभिन्नश्चैत्र
इत्येव बोधान्नेदमत्यंताभावबोधोदाहरणं घटते इत्यत आह। चैत्रस्येति। चैत्रस्वत्वाभाववद्धनमित्यर्थः। ष
ष्ठ्यर्थः स्वत्वमर्थो न तु स्वामित्वं। स्वत्वनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वेन निरूपकतासंबंधा
वच्छिन्नप्रतियोगिताकस्वामित्वाभावबोधासंभवादाश्रयतासंबंधावच्छिन्नप्रतियोगिताकस्वामित्वाभा
वबोधस्वीकारे च चैत्रो पिधनेनेदं चैत्रस्येति प्रसंगात्। स्वामित्वस्य चैत्रवृत्तित्वेन धनेऽआश्रयतासंबंधेना
सत्वात्। यदि तु तादृशप्रत्ययवत् स्वत्वनियामकसंबंधानां तस्याभावप्रतियोगितावच्छेदकत्वस्वीकारे स्वामि
त्वमेव षष्ठ्यर्थः। न दाविनिर्गमनाविरहेणा स्वत्वमप्यर्थो पतेया। अन्योन्याभावबोधे समानविभक्तिकत्वस्य नि

तर्क
२५

पामकत्वेव्यभिचारमाह अलघुइतिक्रियाविशेषणमस्थले कर्मविभक्तिः नपुंसकलिंगं। विशेषणविभक्तिश्च
साधुत्वार्था। तथा चलघुभिन्नपाकानुकूलकृतिरित्यन्वयबोधे ऽन्योन्याभावविषयकेविशेषणविशेष्यभाव
कपदयोः समानविभक्तिकत्वाभावेनव्यभिचार इत्यर्थः। नञ्विनिर्मोके। नञः समभिव्याहारस्थले। तत्रेति। य
था भूतलेघटइत्युक्ते ऽभेदान्वयबोधसमानविभक्तिकपदत्वेनकारणतया भूतलघटयोरभेदान्वयबोधे
आकांक्षा अतो नञ्समभिव्याहारे भूतलंनघटइत्युक्ते भूतले घटान्योन्याभावबोधः। अन्यत्रेति नञ्सम
भिव्याहारे प्रतियोगप्रनुयोगिपदयोरभेदान्वये आकांक्षाशून्यस्थले इत्यर्थः। अन्येति। अत्यंताभावबोध
कत्वमित्यर्थः। यथापचतीत्युक्ते पाकानुकूलकृतिचैत्रयोर्नाभेदेनाकांक्षाकिंत्वाश्रयत्वेनेति। नपचतीत्यत्र
नान्योन्याभावबोधः किंत्वत्यंताभावस्येति तथा च प्रतियोगप्रनुयोगिनोरभेदान्वयबोधे यादृशसमभि
व्याहारज्ञानं कारणं तयोरन्योन्याभावबोधे तादृशसमभिव्याहारज्ञानं। एवमत्यंताभावबोधे ऽभेदान्वये
आकांक्षाशून्यप्रतियोगप्रनुयोगिवाचकपदसमभिव्याहृतनञ्पदज्ञानं कारणमित्यर्थः। तद्बोधमुपपा राम
दयति। अस्तित्वेति। नञसत्वे नञ्समभिव्याहारे। घटपटयोरिति विशेषणविशेष्यभावकपदयोः समा २५

नविभक्तिकत्वस्याविरुद्धविभक्तिराहित्यस्य वाऽभेदान्वयबोधे आकांक्षितत्वादिति भावः। तच्च न घटः पट इत्यत्रनाद्रैभें
ति। भूतले घट इत्यत्र भूतलवृत्तिर्घट इत्येवान्वयबोधात्। आधारत्वस्य संसर्गमर्यादितया नाभेदान्वयबोधकत्वमिति तु
त्र संसर्गाभावप्रत्यय एवेति भावः। अत्र चान्योन्याभावबोधे विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्या
वश्यकत्वे दृष्टिभिन्न हरिरित्यत्र तु समविभक्त्यनुसंधानेन शाब्दबोधोपपादनेपि चैत्रो न पचतीत्याख्यातस्य कर्तरि लक्षणा।
पाके चैत्रपाककर्तृभेदान्वयात् तान्नत्तो न पचतीत्यादौ पाकेऽत्तः कस्य भेदप्रतिपादनात् तन्न समानविभक्तिकत्वा
व्यभिचारः। विरुद्धविभक्तिराहित्यस्यापि नत्वेव प्रतियोगिपदोत्तरविभक्तिविरुद्धशून्यानुयोगिपदसमभिव्या
हृतनञ्पदत्वेनानुयोगिपदोत्तरविरुद्धविभक्तिशून्यप्रतियोगिपदसमभिव्याहृतनञ्पदत्वेन वा हेतुत्वे
नवाहेतुत्वेन पचतीत्यादौ प्रतियोगिपदोत्तरविभक्तेरप्रसिद्धेः। नसत्तोकपचतीत्यादावनुयोगिक्रियापदोत्त
रसुविभक्तेरप्रसिद्धतयानानुगतरूपेण हेतुत्वम्। अन्यतरस्य हेतुत्वे चाननुगमः। किंतु विशेष्या
नुयोगिप्रतियोग्युपस्थापकनामपदयोः समभिव्याहारे समानविभक्तिकत्वं तंत्रं। घटो न नील इत्यत्र घ
टपदार्थान्वितनीलपदार्थान्योन्याभावबोधे नीलनीलपदसमानविभक्तिकघटपदसमभिव्याहृतनञ्

तर्कं
१६

पदत्वेन चैत्रो न पचतीत्यादौ धर्मिपरत्वात् समभिव्याहृतनञ्पदत्वेन नञ्तो ऽपचतीत्यादौ क्रियाविशेषणस्य समभि
व्याहृतत्वाद्द्वितीयांतत्वोक्तादिपदसमभिव्याहृतनञ्पदत्वेन हेतुत्वमिति बोध्यं। ननु पुरुषोत्तम इत्यत्र न तावत्कर्म
धारयः कर्मधारये विशेषणवाचकपदस्य पूर्वभावनियमेनोत्तरपदस्य पूर्वनिपातापत्तेः। न च विशेष्यवि
शेषणभावे कामचार इति वाच्यं। जातिनिमित्तके गुणनिमित्तकं विशेषणमेवेति नियमात्। अत एव उत्प
लमिति न प्रयोगः। नापि षष्ठीसमासेन निर्द्धारणे इत्यनेन निर्द्धारणे षष्ठीसमासनिषेधादित्यत आह। सेत्ते
प इति। पुरुषोत्तम इत्यादौ क्वचिद्विशेषणस्य परत्वं स्यादित्यनेन न परनिपातस्याप्यनुशासनसिद्धत्वात्कर्मधार
यस्यैवोपगमात्। अथ तथापि विशेषणं विशेष्येण बहुलमिति सूत्रे उभयोपादानबलाद्विशेषणावि
शेष्यतावच्छेदकयोः परस्पराव्यभिचारित्व एव कर्मधारय इति प्राप्तं। एवं चात्र तु स्ववद्भिन्नत्वस्य घटादि
साधारण्येन पुरुषावधिकोत्तमत्वरूपत्वासंभवेन सार्वत्र्यादिमत्त्वरूपोत्तमत्वस्य च पुरुषत्वाव्यभिचारि
त्वाभावात्कथं कर्मधारय इति चेन्न। उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरन्यतरव्यभिचारित्व एव कर्म राम
धारयात्। अत एव शिंशपावृक्षेति संगृह्णते। एतेनोद्देश्यतावच्छेदके विधेयाभिन्नत्वनित्वमेव नेत्यपि १६

तिसंभवदपमतत्तमपाक्तो। सभेपवद्धिमानित्यादावगतेः। नचतथापिगुणपदद्व्यमेत्यादावगतिरितिवाच्यं। त
त्वात्। नापत्त्याऽभेदार्थकषष्ठीसमासोपगमात्। अन्यथाभवनमतेष्यातः। अथवाषष्ठीसमासएवोपवं। नचननि
र्धारणाद्यत्वेनेननिषेधः मनुष्यादापेक्षयाजातिगुणक्रियादिभिरेकदेशस्यपृथक्करणंहिनिर्धारणं। निर्धार्यत्व
विशिष्टसामान्यधर्मापेक्षयाजातिगुणक्रियाद्यवच्छेदेनपत्कर्षविद्धर्मिणःभेदबोधनमितियावत्। नचात्रतत्त
भवति। श्रीकृष्णत्वविशिष्टोपस्थापकपदाभावात्पुरुषोत्तमपदस्ययोगरूढतयातत्संभवेपिसमासवाक्याद
न्यतरस्तदुपस्थितेः। यथानराणांक्षत्रियःशूरतमइतिनतुनरक्षत्रियःशूरइति। अपिचनिर्धारणरूपार्थेष
ष्ठीसमासनिषेधेपिराहोःशिरइतिवदभेदार्थकषष्ठीसमासेबाधकाभावः। अन्यच्चनिर्धारणषष्ठ्या अभेदो
भेदश्चाऽर्थः। निर्धारणपदार्थविशेष्यतयाप्रकृत्यर्थेविशेषणतयाचभेदान्वयनराणांमित्रः क्षत्रियः क्षत्रिया
न्यतरान्यशून्यतमाद्भिन्नइत्यन्वयबोधः। शूरतमत्वविशिष्टेनचक्षत्रियान्यनरान्यत्वान्वयः। नातः। क्षत्रियान्य
नरस्यशूरतायोतादृशप्रयोगः। यवनानांक्षत्रियःशूरतमइतिविज्ञानीयापेक्षयानिर्धारणप्रत्ययेभेदापर्यः।
भेदसंसर्गकबोधेविरुद्धविभक्तिराहित्यस्यतंत्रतयातत्संसर्गमयोग्यातद्भानासंभवात्॥ केचित्तुनिर्धारणष

नञ्॰ ६० ष्ठ्याश्रयभेदस्यैवार्थः। नराभिन्नत्वविशिष्टतादात्म्येन शशकमत्वावच्छेदेनान्वयान्नराहोः शिर इत्यादिनोऽविशेषणशू
रतमत्वेन रनिष्ठशरतमत्ताविशेषः। तेन देवानामपि शरत्वान्ननादृत्यप्रयोगानुपपत्तिरित्याहुः। तन्नात्तत्रिप
मुख्यविशेष्यकानुभवापलापापत्तेः। नराणाप्रमेयः शश इत्यपि प्रयोगापत्तेस्तत्त्रिपनरः शूरत्ववान्त्त्रिप
भिन्नः शूरत्वाभाववानित्यनुमानमपि प्रथमान्तार्थमात्रार्थमुख्यविशेष्यकबोधस्यानुभवापलापापत्तेर्धरना
देयः। तत्त्रिपान्यनरान्यत्वसंव्यापकभेदप्रतियोगितावच्छेदकत्वविशिष्टतादात्म्यसंबंधेन नराभिन्नत्तत्त्रिपे
षूरत्तस्यान्वय इत्यपरे एव निर्धारणा षष्ठ्याश्रयार्थ इत्यपरे। अन्ये तु निर्धारणा षष्ठ्यास्ताहृत्स्यव्यवच्छेदस्यार्थः
। व्यवच्छेदश्च द्विधा ऽत्यन्ताभावो ऽन्योन्याभावश्च षष्ठीसमभिव्याहृतप्रातिपदिकस्यत्रत्वार्थीभूतं तदन्यस्मिन्न
हाणाषष्ठ्यार्थव्यवच्छेदेवाधिकरणत्वेन लाक्षणिकार्थः। प्रतियोगित्वेन च विधेयपदार्थो भासते। तत्त्रिया
णांकर्णः प्रचुरदहातीत्यादौ कर्णपदस्य कर्णः कर्णान्यश्च अर्थः। तत्त्रियाणामित्यत्र कर्णः प्रचुरदानकृति
मान्यत्त्रियाभिन्नः कर्णान्यप्रचुरदानकृत्यभाववानित्यन्वयः। गवां कृष्णा संपन्नक्षीरेत्यत्र कृष्णापदस्य कृष्णा
तदन्याचार्थः। गवाभिन्ना कृष्णा संपन्नक्षीरा गवाभिन्ना कृष्णान्या संपन्नक्षीरेतमभिन्नेत्यन्वयबोध इत्याहुः। राम ६०

।पुरुषेषूत्तम इति सप्तमीसमासः सप्तमीसमासस्य वा न च निर्द्धारणे षष्ठीसमासवत्सप्तमीसमासोऽपि निषिद्ध इति वाच्यं। स्वरविशेष
निषेधस्यैव सूत्रप्रयोजनत्वात् षष्ठीसमासे स्यादुत्तरपदस्यान्तोदात्तत्वं सप्तमीसमासे तु पूर्वपदप्रकृतिस्वर एवावतिष्ठत इति सप्तमी
समासो निर्द्धारणे रूपे त्वौपसाधुरित्यपि केचिदिति कृतं पल्लवितेन। ननु स्वायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयुञ्जामहे इति
न्यायेन तटे घोष इति विहाय गंगायां घोष इति लक्षणामुखप्रयोगे बीजाकांक्षायां शैत्यपावनत्वादिप्रतीतिरेव प्रयोजनं ते
नाऽवसीयते। सा च लक्ष्यत्वानोपपादयितुं शक्येति व्यंजनाख्यातिरिक्ता वृत्तिरुपेयत इत्यत आह। व्यंजना चेति। न त्वन्यत
रमिति। शक्तिलक्षणातिरिक्ता नव्या वृत्तिरित्यर्थः। तथा चैपयोर्द्दिशक्तिलक्षणास्तिकान्तद्शक्तिशक्तिलक्षणातिरिक्तत्वा
भावात्। यदि च न शक्तिलक्षणात्मिकान्तदा न वृत्तिरिति अतिरिक्तवृत्तित्वाभावसत्त्वमव्याहतं तेन नक्षिध्यसिद्धिव्या
घातः। कथं तर्हि शैत्यपावनत्वादिप्रतीतिरित्यत आह। लक्षणायेवेति॥ तस्यैति। व्यंग्यार्थप्रतीत्युपपत्तेरित्यर्थः।
प्रत्यक्षानुमित्योः स्वसामग्रीभेदाद्भेद इव भेद इत्याशंकां तेनान्विति। इह लक्षणयैव तदर्थसिद्धिरूपं मुख्यार्थ इति।
गंगायां घोष इत्यत्र गंगापदमुख्यार्थे प्रवाहे स्तरानुपपत्तिः। घोषाधिकरणत्वानुपपत्तिर्लक्षणाबीजमित्यर्थः
।ननु किमेतावतेत्यत आह न चेति। नहीत्यर्थः। वापीस्नानुमितो गतासिन पुत्तनेप्याधमस्यापि केऽप्यत्र गता
मपि दूतीप्रतिनगतामिति मुख्यार्थान्वयानुपपत्तिरस्त्येवेति अधमपदव्यंजनासंभवत्येवेत्यत आह॥ सर्वत्रे

तितदेवाह। गच्छगच्छसीति। गच्छगच्छसि चेत्कांत पंथानः संतु ते शिवाः। ममापि जन्म तत्रैव भूयाद्यत्र गतो भवानित्यत्र
त्वद्गमने मे मरणं भवितेत्यतस्त्वं मा गा इति व्यज्यते। तत्र च मुख्यार्थान्वयानुपपत्तेर्लक्षणाबीजस्याभावान्न लक्षणा
संभव इति व्यंजनाख्यवृत्त्यंतरमावश्यकमिति भाव। अन्वयानुपपत्तिर्लक्षणाबीजमित्यत्र बीजशब्दार्थं विकल्प्य दूषय
ति किमिदमिति। तज्जनकत्वं लक्षणाजनकत्वं। गंगेति। शक्यसंबंधो हि लक्षणा। स च गंगाया घोषस्य च गंगातीरयो
संयोगस्तच्च वनानुपपत्तिज्ञानकारणमित्यर्थः। तज्ज्ञापकत्वं लक्षणाज्ञापकत्वं। चक्षुरादिनेति। यत्र गंगापदस्या
गंगातीरत्वेन लक्षणा तत्र तत्संबंधविषयकशाब्दात्मकज्ञानस्यानुपपत्तिज्ञानव्यतिरेकेऽनुदयेपि चक्षुरादि
नात ल्लौकिकप्रत्यक्षे जननीये तदनपेक्षणात्। व्यतिरेकव्यभिचारेणान सामान्यतस्तज्ज्ञापकत्वसंभव इति भा
वः। न च लक्षणाविषयकशाब्दबोधजनकत्वमेव तत्त्वमिति वाच्यं। यत्र गंगापदस्य तीरे जहत्स्वार्थालक्षणा
तत्र गंगातीरसंबंधस्य शाब्दबोधाविषयत्वेनान्वयव्यभिचारेण न तथात्वसंभव इति एवमग्रेपीति हृदयं। ना
पीति। तेन तात्पर्यग्राहकत्वं शक्यसंबंधरूपलक्षणातात्पर्यग्राहकत्वं। तात्पर्येति। प्रकरणादिनापि तद्ग्रहात्। ता
त्पर्यग्राहादित्यर्थः। तथा च मुख्यार्थान्वयानुपपत्तिज्ञानस्य व्यभिचारान्न सामान्यतः तात्पर्यग्रहहेतुत्वं ए
वं च क्वचित्तदपेक्षणेपि सर्वत्रानपेक्षिततया प्रकृते प्रकारांतरेणैव तात्पर्यग्रहसंभवेन बाधकाभावः। तात्प

क्षणाबीजत्वं। यष्टिरितियष्टीः प्रवेशयेत्यत्रयष्टिपदस्ययष्टिधरेलक्षणा। तथाचात्रमुख्यार्थेयष्टौप्रवेशनान्वयानुप
पत्तिरितिव्यभिचारादित्यर्थः। ननुमुख्यार्थबाधानुपपत्तिर्नलक्षणाबीजं। अपितुतात्पर्यविषयानुपपत्तिरेवेतिव
्यभिचारइतिशंकते। तात्पर्येति। अत्रापीति। यष्टीःप्रवेशयेत्यत्रापीत्यर्थः। अस्तीति। भोजनप्रयोजनकप्रवेशन
मेवात्रतात्पर्यविषयः। तदनुपपत्तिर्हिमुख्यार्थेयष्टावस्त्येवेत्यर्थः। सर्वत्रेति। गंगायांघोषइत्यादावपीत्यर्थः। अस्तु
कोदोषइत्यतआह। साचेहापीति। साचतात्पर्यानुपपत्तिश्चइह। पिगच्छसीगच्छत्यादिव्यंजनास्थलेपि। अस्तीति
। अत्रकांतगमनाभावएवतात्पर्यविषयः। तदन्वयानुपपत्त्यागमनबोधकपदस्यगमनाभावेलक्षणापैवोप
पत्तौनातिरिक्तव्यंजनांतरकल्पनेगौरवादितिभावः। लक्षणाप्रयोजनं गंगापदस्यतीरेलक्षणाप्रयोजनं। शैत्ये
ति। स्वापत्तेशब्दप्रयोगेकिंमित्यवाचकंप्रयुंजामहेइतिन्यायात्। गंगातटेघोषइतिविहायगंगायांघोषइ
तिलक्षणायाःप्रयोगस्तत्रशैत्यपावनत्वादिप्रतीत्यर्थमेवेत्युन्नीयते। लक्षणायाःप्रयोजनवत्त्वनियमादिति
भावः। नास्तीति। शैत्यपावनत्वादिप्रतीतिः। लक्षणेति। शैत्यपावनत्वादौलक्षणासाध्येत्यर्थः। प्रयोजना
भावात्प्रयोजनस्यप्रयोजनांतराभावादित्यर्थः। प्रयोजनाभावेपिलक्षणायांकोदोषइत्यतआह। लक्षणा

तर्क
९९

पाद्येति। यथा गंगापदस्य तीरे लक्षणायां लक्ष्यप्रतीत्यतिरिक्तशैत्यपावनत्वादिप्रतीतिः प्रयोजनं तथा शैत्यपावन
त्वे लक्षणायां तस्य प्रयोजनांतराभावात् लक्षणाया अनिर्वाहात् प्रयोजनप्रतिपत्तये व्यंजनावश्यकत्वमिति गदाधरणीये निभा
वः। शैत्यपावनत्वादौ लक्षणा विनाश्य — तस्याः प्रयोजनाभावः शैत्यपावनत्वादिप्रतीतेरेव प्रयोजनत्वादिति समा
धत्ते। लक्ष्येति। तथापि लक्ष्यप्रतीतिप्रयोजनकत्वेपि प्रयोजनांतरे लक्ष्यप्रतीत्यतिरिक्ते प्रयोजनांतरे। तत्र लक्ष्य
प्रतीत्यतिरिक्तप्रयोजनाभावे किमनिष्टमित्यर्थः। ननु लक्षणायां लक्ष्यप्रतीत्यतिरिक्तप्रयोजनवत्त्वनियमभं
ग एवानिष्टमित्यत आह। लक्षणायां हीति। ननु गौरवेपि अन्यत्र दृष्टत्वात्तथा कल्पनीयेन स्वकार्यकारणा
भावे गौरवादित्यत आह। अप्रयोजकत्वाच्चेति। न हि यत्र कुत्रचिद्दर्शनमात्रेण व्याप्तिदर्शनियमावधारणसा
नाभावादिति भावः। तथा च लक्षणाये वक्ष्यप्रयोजनप्रतीतिनिर्वाहेन वस्त्वंतरकल्पनमिति प्रसिद्धत्वात् लक्ष
णामूलव्यंजनां निरस्याभिधामूलां तां निरसितुं शंकते। स्यादेतदिति। नानार्थेति। सैंधवमानयेत्यादौ
अर्थविशेषे। गमनादिरूपार्थप्रत्यये। प्रकरणादि। मनुष्यकरणादि। निर्णायकमिति। शक्तेनाव राम
च्छेदकैकसमतिशक्यतावच्छेदकनानात्वमेव नानार्थत्वं। तत्र सैंधवमानयेत्यादौ भोजनप्रकरणे शक्त्यादि ९९

थेति। जनकत्वे इति। जनकपुंस्त्वं हि पितृत्वं तच्चैकदेशो जनकत्वे यथा चैत्रस्य निरूपितत्वसंबंधेनान्वय इत्यर्थः
। तथा च व्युत्पत्तिसंकोच आवश्यक इति भावः। ननु चैत्रस्य पितेत्यादौ जनकपुंस्त्वरूपपितृत्वैकदेशे जनकत्वे चै
त्रस्य नान्वयः। किंतु स्वनिरूपितजनकत्वसंबंधेन पितृपदार्थे एवेति। न पदार्थः पदार्थेनान्वेतीति व्युत्पत्तिसं
कोचः एवं च प्रकृतेऽपि घटो नेत्यादौ घटपदस्य घटप्रतियोगिकत्वलक्षणायां घटप्रतियोगिकस्य स्वाभिन्नाभा
वाश्रयतासंबंधेन प्रथमापाप्रतियोगित्वलक्षणायां तु घटस्य स्वप्रतियोगिताकाभावाश्रयतासंबंधेन घ
टेऽन्वय इत्याधेयकाभाव इति मतं दर्शयति। अप्येतिति। समुदाय एव अभाववत्त्वेन एवकारार्थाभावरूपपदा
र्थैकदेशे व्युदासः। इतरपदार्थेति। घटपदार्थान्वयः परंपरासंबंधेन स्वाभिन्नाभावाश्रयत्वसंबंधेन स्व
प्रतियोगिताकाभावाश्रयत्वसंबंधेनेत्यर्थः। न च नामार्थयोरिति व्युत्पत्तिभंग इति वाच्यं। नामार्थयोरभे
दातिरिक्तसंबंधेनाविभक्त्यर्थाघटितसंबंधेन च नान्वय इत्येव व्युत्पत्तेरिति भावः। एवं चैत्रस्य पितेत्यादौ चै
त्रस्य स्वनिरूपितजनकत्वसंबंधेन पितर्येवान्वय इति बोध्यं। आहुरित्यस्वरसोद्भावनं तद्बीजं तु घटो यत्र
भाववान् घट इत्यन्वये कस्याभावस्य [illegible] का तात्पर्ये अनिवृत्तिः। अननुभवश्चेति। ननु अभाववानिति लक्षणायां

इत्यस्य   त्वेकि

तर्कः १० कारेण पदार्थमेवन्नञ्संकोचेनञनञर्थाभावस्याप्रतीतेः संबंधेन घटेऽन्वयेनामार्थयोरित्यस्य संकोच इति तुल्यमि
ति अभाववत्तिलक्षणा। घटपदस्य घटप्रतियोगिकेनभावाभाववत्तिलक्षणायां लक्षणा इत्यस्य संग्रहीत
त आह। पूर्वेति। व्युत्पत्तिसंकोचस्याविशिष्टत्वेपीति॥ शेषः। लक्षकत्वमेव नञ्पदस्येति शेषः। अन्यथा
नञोभाववत्तिलक्षणाकल्पने अघटमिति विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्याविर
हविभक्तिराहित्यस्य वाऽभेदान्वयबोधेहेतुत्वेन भवन्मते अभावस्येवाप्रतीतपान्वयेनाभेदान्वयबोधाभा
वेन स... योग्यनुयोगिवाचकपदयोः समानविभक्तिकत्वमुपपन्नं स्यादित्यर्थः। निपातेतिनिपातादीत्य
र्थः। आदिनाऽव्ययपरिग्रहः। अन्येषेति। अव्ययनिपातातिरिक्तनामार्थयोरभेदातिरिक्तसंबंधेनान्वय
बोधाभाव इत्यर्थः। नामार्थ... कारकशाब्दबोधे व्ययनिपातप्रत्ययान्यतमजन्योपस्थितिहेतुत्वादित्य
र्थः। नञ्स्थलेच प्रत्ययजन्योपस्थितेरसत्त्वेपि निपातजन्योपस्थितेः सत्त्वेन व्यभिचाराभाव इत्यपि कश्चि
त्।। ननु अन्यतमनिवेशाश्चित्यः ननु अव्ययातिरिक्तनिवेशे गौरवमत आह। अतएवेति। अव्ययातिरि
क्तत्वनिवेशादेवेत्यर्थः। भेदेनो।। इवार्थे सादृश्ये चंद्रस्य प्रतियोगितयाऽन्वय इत्यर्थः। चंद्ररूपनामार्थ राम १०

सनवैय्यर्थ्यमियामत्वविभक्तौनलक्षणोत्पत्त्यानुशासितविभक्तिमर्थोतिरिक्तेनलक्षणोत्येवतत्दर्थइतिभावस्तस्मात्र
वराभित्याहौविभक्तौलक्षणोपपत्तावपिनघटःपटइत्यत्रप्रथमापोकथंलक्षणातथानुशासनाभावादितिभा
वः।प्रकृतेपिनञ्समभिव्याहाराद्घटपदोत्तरप्रथमायामपिआनुशासनकीलक्षणासंभवतीतितुल्यमित्यर्थः
।आनुशासनमेवाहतत्त्वदिदमाहुरिति।निपतेति।निपातःप्रतियोगिवाचकपदेननिपातःप्रयोगापेक्षितेकेचि
दव्ययानञादिरूपाप्रतियोगिवाचकपदार्थान्वितस्वार्थबोधकाःकेचिदव्ययाइतियावतानइतिहिनकश्चि
२६ त्रिदपिप्रयोगःकिंतुघटःपटइत्यादिरूपएवतथाचत्वार्थेप्रतियोगिवाचकपदार्थान्वितत्वंअभेदेनविभ
क्त्यर्थद्वारावातन्नञ्चघटपदस्यघटप्रतियोगिकेलक्षणायांअभेदेनप्रथमायाःप्रतियोगित्वेलक्षणायां
तुविभक्त्यर्थद्वाराऽन्वयःघटपदेलक्षणायांप्रथमायाःशब्दसाधुत्वमात्रकल्पनापेक्षयाप्रथमायाएवप्रति
योगित्वेलक्षणौचितेत्यत्रापिप्रतियोगित्वेलक्षणायाऽनुशासनकीतिभावः।यद्यपिप्रतियोगित्वरूपार्थेप्र
थमेतिनव्याकरणेनप्रतिपादितंतथापितादृशानुशासनतात्पर्यंतनैवेत्यनुशासितत्वमितिध्येयम्।शाकटाय
थापीतिनञ्प्रार्थ्येति।नघटःपटइत्यत्रघटान्योन्याभावस्यपटेकथमन्वयः।नामार्थयोरभेदातिरिक्तसंबंधेनान्व

पं २

तर्क ७९ पवोधासंभवादित्यर्थः। शंकते नन्वत्रेति। तथाच न नामार्थयोरन्वयः किंतु विभक्त्यर्थेन नामार्थयोरिति भावः। नतद्
तिन घटः पट इति वाक्यादित्यर्थः। शंकते नञ्पदमिति। नञर्थस्याभाववतः पटेऽभेदेनैवान्वय इति नैतद्व्युत्प
त्तिविरोध इति भावः। घटस्येति नञोऽभाववति लक्षणायां घटस्य प्रतियोगितासंबंधेनाभावान्वयो बाध्यः स
चनसंभवतीति भावः। तदेवाहतस्येति। अभावस्येत्यर्थः। पदार्थैकेति नञोऽभाववदर्थकत्वपक्षेऽभावस्यै
कदेशित्वादित्यर्थः। गौर्नित्यापशुरपशुरित्यादौ सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः
सति विशेष्यबाध इति न्यायेन स्वर्गो [illegible]त्त्वध्वं इति वत् नित्यत्वस्य गोत्वेऽन्वयापत्त्या प[illegible]दौ पदार्थेनान्वे पं:
ति न तु पदार्थैकदेशेनेति नियमस्यावश्यकत्वात्। नञ्यर्थाभाववदेकदेशेऽभावे घटस्य प्रतियोगितयान्व
यासंभव इति भावः। तथापीति शंके। परिसमाधत्ते मैवमिति। संसर्गाधिकेति नामार्थयोरिति व्युत्पत्त्या नञो
ऽभाववति लक्षणैव अभाववतस्त्वाभेदेनैव घटेऽन्वय इति न नामार्थयोरिति व्युत्पत्तिविरोधः। पदार्थः
पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तेश्च संसर्गाधिकपदार्थयोरिति तत्स्थलएवाभ्युपगमात्। नञर्थ
भाववदेकदेशेऽप्यभावे घटस्यान्वये बाधाभाव इति भावः। ननु व्युत्पत्तेः संकोचे प्रमाणाभाव इत्यत आह। प्र राम

रौत्तु संभवति लघौ गुरौ तदभावादिति नापि पनकंबुग्रीवादिमत्त्वस्य घटत्वापेक्षया गुरुत्वेनानवच्छेदकत्वात्पाके बुग्रीवादिम
त्त्वावच्छिन्नप्रतियोगिताकाभावबोधो भ्रमात्मक एव। यद्यपि कंबुग्रीवाद्यवच्छिन्नप्रतियोगिताकत्वस्याप्रसिध्या तेन सं
बंधेन कंबुग्रीवादिमतो नाभावोपरि भ्रमस्तथापि सांसर्गिकविषयतायामपि प्रकारतात्वविषयतात्वोपगमे न प्रति
योगितायां कंबुग्रीवाद्यवच्छिन्नत्वांशे भ्रमः इति बोध्यं। किंतु घटो नास्तीत्यादौ प्रतियोगितया घटस्य स्वावच्छिन्न
प्रतियोगिताकत्वसंबंधेन च घटत्वस्याभावोपरि भाने कंबुग्रीवादिमान्नास्तीत्यत्र तु घटत्वावच्छिन्नप्रतियोगिता
कत्वसंबंधेन कंबुग्रीवादिमत्त्वस्याभावोपरि भ्रमः। स्वावच्छिन्नप्रतियोगिताकत्वस्यैव तत्र संबंधत्वादित्याहुः। आ
७९ शयमवितृणोति नञ् घट इति। अभावे घटपोरिति। प्रतियोगिकतया घटस्याभावोपरि बोधोपपत्तेरित्यर्थः।
घटपदेपीति। अपिना नञ्पदसमुच्चयः। नाम्नार्थयोरिति। नीलो घट इत्यत्र नीलघटयोरभेदेनान्वयादर्शनेति।
अभेदेतिरिक्तसंबंधेनेत्यर्थः। तथा च नञर्थाभावे प्रतियोगितासंबंधेन घटस्यान्वयो न संभवति तत्तु नञ्हुवा
वेन न नञोपि नामत्वादिति भावः। कथं तर्हीति। नामार्थयोरिति व्युत्पत्तिस्वीकारे हीत्यर्थः। न घट इति प्रथमाया
साधुत्वात्प्रतियोगितासंबंधेनैव नञर्थान्योन्याभावे घटस्यान्वय इति भावः। अयथार्थसाधुत्वे संभवति शाब्दसा
धुत्वस्यान्याय्यत्वात्प्रथमायामेव लक्षणामाह। प्रथमायामेवेति। षष्ठ्यर्थप्रतियोगित्वे। ननु सुविभक्तौ लक्ष

X कथं [illegible] संभव [illegible] साधुत्वं [illegible]
[illegible] ८

न

णासंभवात्। कर्तृकर्मणोः कृतीत्यनुशासनवैयर्थ्यापत्तेः। कर्तृत्वकर्मत्वप्रकारकबोधस्य षष्ठ्या तत्
तर्क द्धर्मविशिष्टलक्षणयैवोपपादयितुं शक्यत्वादित्यभिप्रायेणाशङ्कते। नन्विति। तर्हि तु पदविभक्त्योर्लक्षणानङ्गीका
५८ रे हि। षष्ठीतः भारतस्याश्रवणाव्याप्तस्य कृतिरिति कर्मकृद्योगे विहितषष्ठीतः कर्मतेति कर्तृत्वस्यापि बोध्यः। शेषे
षष्ठ्याः त्वमेन संबंधमात्रशक्तषष्ठीतः संबंधत्वेन बोधसंभवेपि कर्मत्वत्वेन बोधो न संभवती तयानुभवोपपत्त ति ४
ये लक्षणास्वीकार आवश्यकः। न चानुशासनस्य शक्तिनिर्णायकत्वपाकर्तृकर्मकृद्योगविहितषष्ठीत्वेन कर्तृ
कर्मत्वत्वादिना शक्तिरेवास्त्विति वाच्यो अनन्यलभ्यस्य शब्दार्थत्वादिति भावः। अत्र हि दृष्टान्तमुदाहरति
कथं वेति। एकस्यां स्त्रीव्यक्तौ दाराशब्द इति दाराः पुंसि च भूम्न्येवेति बहुवचनान्त एव दारशब्दः साधुरिति भावः। एव
पि स्वकृत्यर्थवृत्तिसंख्यावाचकत्वेतु प्रोक्तत्वात् मात्रवृत्तिसंख्यावाचकं भवन्मतेपि बहुवचनेन लक्षणाया एक
त्वबोध्यतामिति वाच्यो। एक इति पदेनैवैकत्वबोधसंभवे घटा इति बहुवचनस्यैकत्वे तात्पर्यग्रहे लक्षणा ५३
याएकत्वबोधवारणासंभवात्। भवन्मते च संभवस्यार्थो साधुत्वे शब्दसाधुत्वस्यानापाद्यत्वादिति। अनुशासन राम
कीति इष्यं लक्षणा षष्ठ्यां कर्मत्वे बहुवचनस्य चैकत्वे लक्षणेत्यर्थः। इष्टैवेति। कर्तृकर्मणोः कृतीत्यनुशा ५८

योगितावकत्वात् । तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वोक्तौ च तादात्म्यत्वस्यातिरिक्तत्वोपगमस्यैव निरुक्तत्वादिति संस-
र्गाभावत्वान्योन्याभावत्वादिकमखण्डमेवेति किंतद्वैस्याभावत्वे लाघवं [redacted] न च सामान्या[redacted]भावत्वेन छि-
त्तिवाच्ये । सामान्यधर्मस्य हि अवच्छेदकत्वेन नञ्पदाच्छक्तौ वाभावबोधोपपत्तौ लक्षणो विनैवोपपत्तेरित्यस्ये-
त्वबीजं नञ्पदात्संसर्गाभावत्वादीनामवच्छेदकत्वे नञ्पदाद्घटसंसर्गाभावत्वप्रकारकबोधस्तत्त्वाभावत्वप्रका-
रकबोधस्य च लक्षणं प्रसक्तत्वेन प्रसक्तो तद्दृष्टं मवारित्यत आह । विनिगमनेति । संसर्गाभावत्वस्यातिरिक्तत्वे
न्योन्याभावत्वस्याप्यतिरिक्तत्वेन तदपि शक्यतावच्छेदकमित्यर्थः । अभावमात्रस्यैव संसर्गाभावेऽन्योन्या-
भावे चेत्यर्थः । तच्छक्यत्वेति । नञ्शक्यत्वावधारणादित्यपि संप्रदायानुसारिणी व्याख्या वक्तव्या । ननु
अभावत्वस्य नञ्शक्यतावच्छेदकत्वे घटो नास्तीत्यत्र संसर्गाभावत्वप्रकारको बोधः घटो नेत्यादौ अन्यो-
न्याभावत्वप्रकारको बोधः कथं स्यात् । परिच संसर्गावच्छिन्नप्रतियोगिता[redacted]काभावविषयकशा-
त्वादेः कार्यतावच्छेदकत्वतयान्नादृशानुभवोपपत्तिरिति भाव्यते । तथापि अभावत्वप्रतीतौ [redacted] रूपत्वेना अ ३
त्यन्ताभावत्वध्वंसत्वादिविषयकत्वेनैवोपपत्तावतिरिक्ताभावत्वे मानाभाव इति नाभावत्वं शक्यतावच्छेदकं

ति ना

तर्क· ५७

मतस्त्वाह। विनिगमनेति। संसर्गाभावत्वमिवान्योन्याभावत्वमपि शक्यतावच्छेदकं विनिगमनाविरहादिति भावः।
भूरिप्रयोगस्य संसर्गाभाववद्वान्योन्याभावेऽपि सत्त्वान्न नियमतः प्रतीयमानेऽप्यर्थे शक्त्यस्वीकारेणानार्थोच्छेदा
पत्तेः। चैतन्नियचतीत्यादौ वैयाकरणमते कर्तुर्वाच्यतयास्माकमपि यदाख्यातेन कर्त्तरि लक्षणा तदा शक्तेरान्यो
न्याभावस्य न ज्ञानसत्त्वेऽपि न समभिव्याहृतिनैय्यायिकानुसारिणी व्याख्येति विभावनीयम्। पटादिषु घटो नास्तीत्यत्रात्य
ताभावत्वप्रकारक एव बोधः अनुभाविकः। ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे मानाभावेन ध्वंसप्रा
गभावकाले घटो नास्तीति बुद्धेरत्यन्ताभावविषयकत्वेनैवोपपत्तेरिति विभाव्यते। तदात्यन्ताभावत्वमन्योन्या
भावत्वं शक्यतावच्छेदकमिति मन्तव्यम्। अत्र च घटवति भूतले यत्किंचिद्घटप्रतियोगिकात्यन्ताभावसत्त्वा
त्। भूतले घटो नास्तीति बुद्ध्यापत्तिवारणाय पान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिबल
लभ्या। तत्र घटत्वावच्छिन्नप्रतियोगिताकाभावविषयकत्वावच्छिन्नप्रतिकिंचित्पदसमभिव्याहृत
घटपदसमभिव्याहृतनञ्पदज्ञानत्वेन कारणता। तेन नीलो घटो नास्तीत्यत्र न घटत्वावच्छिन्नाभावधीः।
किंचित्पदं च नीलादिपदत्वेन विशिष्य पाद्यम्। तेन भूतलादिपदसमभिव्याहारेऽपि न दोषः। न च तथापि नी
लो घटो नास्तीत्यत्रानुपपत्तिः अभेदेन नीलादिसाकांक्षत्वेन नञ्ज्ञानेतिनिर्दृष्टत्वात्। कंबुग्रीवादिमान्नास्तीत्या

राम ५८

व्यासज्यवृत्तितपात्त्रानन्वयप्रसंगः। एवं च द्वित्वबोधार्थं साहित्ये न लक्षणागमनं बोधार्थं च चैत्रत्वेन बोध इति युगप
द्वृत्तिद्वयविरोधः साहित्यावच्छिन्नगमनकर्तृत्वात् संभवश्च। इत्थं च द्वंद्वे क्रियान्वयात् वैसाहित्यबोधो न भवत्येव उत्तरं तु भ
वत्येव पूर्वयुगपदुपस्थितेष्वयुगपत्क्रियान्वये तात्पर्ये तत्र समासः। समुच्चये तु क्रमेण उपस्थितेषु क्रमेण क्रियान्वयबो
धे तात्पर्ये न समासः। एवं प्रधानगुणभावविवक्षया विशेष्यविशेषणत्वविवक्षयाऽभावात् तत्र समासाभाव इति दि
क्। घटाविति सरूपैकशेषः। विरूपैकशेषे तु पितराविति तत्र जनकशरीरत्वेन लक्षणया मातापित्रोरवगमः। विभक्त्युप
नीतपुंस्त्वं तु पितृत्वे वान्वेति योग्यत्वात्। शक्त्या पितुः लक्षणया स्वार्थनिरूप्यत्वेन शक्यसंबंधेन जनकत्वेन रूपे
णामातुर्बोधके एकपदे वलक्षणया वा पितृत्वमातृत्वाभ्यां बोधकमिति नव्याः। श्वशुराविति तत्र पत्नीशरीरजकत्वेन
प्रातिस्विकरूपेणावाबोधः। दंपती पुत्रा सकरोः ब्राह्मणौ वा नपेत्यत्र पुमान्स्त्रियेति विरूपैकशेषत्वा ब्राह्मणप
दे स्त्रीपुंसलक्षणौ वविभक्त्यर्थपुंस्त्वस्य च स्त्रीपामनन्वयोऽयोग्यत्वात्। विभक्तिरेव वा शक्त्या पुंस्त्वस्य लक्षणया स्त्री
त्वस्य बोधिका। ननु ब्राह्मणत्वेन शक्त्यैव ब्राह्मणी बोधसंभवे ब्राह्मणपदे लक्षणा व्यर्थेति चेन्न। आयवर्ति
स्त्रीनिरूपब्राह्मणीत्वेन बोधार्थं तदादरात्। केचित्तु विंद्धमातापितरौ नित्य पुंस्त्वस्य ब्राह्मणोत्व्यंजकतया ब्राह्म

तर्कं रूपो ज्ञानलक्षणत्वाभावेन ज्ञानलक्षणत्वेन शक्यात् तद्बोधाभावाल्लक्षणैव। अत एव ज्ञानलक्षणावेधनात्पश्चिन्नक्तात इत्याकुल
न्ना। पुंस्त्वघटितस्य तत्त्वं जनकत्वे गौरवात्। अपकृष्टज्ञानलक्षणबधश्च वयात्पश्चिन्नक्रात्मस्यान्यथानुपपत्तेरिति। शिवो नमस्तु
७२ यादित्यत्र शिवपदे शिवदुर्गान्यतरत्वेन बोधकं। शक्त्याशिवत्वेन लक्षणया च शिवापार्वतीबोधकमिति तु नव्याः। भ्रातरौ
पुत्रावित्यत्र भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति विरूपैकशेषात् भ्रातृपदेन भ्रातृत्वसामानाधिकरण्येन पुत्रपदेन चापत्य
स्तु त्वेन पुत्रदुहितरौ लक्ष्येते। हरी नमस्याव इत्यत्र शक्त्यैव विष्णुत्वादिना बोधकं पुंरूपपदमिति द्युपविरोधानुपगमात्
। एकरूपैकलक्षणया विष्णुत्वादिना बोधकमित्यप्याहुः। उपपदसमासे कुम्भकारः क्षीरपायी खड्गशायीत्यादौ धा
त्वर्थे नामार्थयोर्भेदेनान्वयस्याव्युत्पत्त्या लक्षणया कुम्भादिपदानि कुम्भविषयक क्षीरकर्मक खड्गाधिकरणका
दिपराणि। व्युत्पत्तिसंकोचे तु शक्त्या कुम्भादेर्विषयकत्वादिसंबन्धेनान्वबोध इति। कर्मधारये नीलोत्पलमित्या
दौ नीलाभिन्नमुत्पलमित्यभेदप्रकारको बोधोऽनुभवसिद्धः। तत्र वैयाकरणमते कर्मधारये शक्तिकल्पना
त्समासत्वेनैव साकल्पते न तु विशेषतः कर्मधारयत्वेनेति सर्वत्र समासे शक्तिः॥ अन्यमते तु नीलपदस्यै
व नीलाभिन्ने लक्षणेति मतद्वयमपि निराचिकीर्षुराह। नीलोत्पलमित्यादाविति। अन्वयविधयैवेति। समस्त रामः

शाब्दसामग्रीकाले निरूपितत्वसंबंधेन नीलाभाववान् भेद इत्यादेः प्रतिबंधकत्वं न तस्या कल्पनादिति १०

र्गमर्यादयैवेत्यर्थः॥ एवकारेण प्रकारत्वव्यवच्छेदः। येन तत्प्रकारकबोधोपपत्त्यर्थं अभेदवृत्तिरपि कल्प्येतेति भावः॥ न
नु नीलमुत्पलमित्यत्र संभवत्यर्थसाधुत्वे शब्दसाधुत्वमव्याप्यमिति न्यायेन न विशेषणविभक्तिः प्रयोगसाधुः किल
भेदार्थिकापूर्त्ते चैतत्। नीलमुत्पलमिति शाब्दसामग्रीकाले नीलाभेदाभाववदुत्पलमिति मानसप्रत्यक्षाद्विवारणा
य तत्र शाब्दसामग्र्याः पृथक् प्रतिबंधकतायाः भवताप्यवश्यं स्वीकार्यत्वात् मन्मते च नीलाभेदप्रकारकज्ञानस्य तत्र योग्यता
ज्ञानविधया आवश्यकत्वे न विपरीतज्ञानोत्तरमुत्पत्तिर्निर्णीयं प्रति विशेषदर्शनस्य हेतुतया तदभावादेव मा
नसवारणात्। विशेषदर्शनसत्वे च तदभावव्याप्यवत्ताज्ञानरूपप्रतिबंधकसत्वेन शाब्दबोधस्यैवानुदया
त्तादृशशाब्दसामग्र्याः प्रतिबंधकताधिकों न च मन्मते नीलस्याभेदसंबंधेनान्वयस्वीकारे तादृशसामग्री
काले अभेदसंबंधावच्छिन्नप्रतियोगिताकनीलाभाववदुत्पलमिति प्रत्यक्षादेरनुत्पादस्य विशेषदर्शना
भावादेव निर्वाह इति वाच्यं॥ तथापि अभेदप्रकारकबोधस्वीकारे अभेदे नीलस्य निरूपितत्वसंबंधेन भान
तया नीलमुत्पलमिति विशेषणविभक्तेरभेदोऽर्थः। एवं च नीलोत्पलमित्यत्रापि अभेदस्य लक्षणा आवश्य
कीत्यासमासयोः समानाकारकज्ञानजनकत्वनियमात् समानार्थकसमासारंभकवाक्यस्यैव विग्रहत्वात्।

क न

तर्क° नचैवंनीलाभेदस्यकथमुत्पलेऽन्वयः नामार्थयोःभेदेनान्वयाभावादितिवाच्यं समासातिरिक्तस्थलएवतन्नियमा
७३ दित्यतआह। अतएवेति। यतएवकर्मधारयेननुसमासत्वेनशक्तिः बालक्षणा अतएवेत्यर्थः। बलीयानितिकर्म
धारयेयदिसमासत्वेनशक्तिः तर्हितत्पुरुषेऽपिशक्तिरेवेतितत्पुरुषाद्बलीयस्त्वव्याघातः। यदिचकर्मधारयेल
क्षणातर्हितत्पुरुषेऽपिसेति। उभयथाऽपिबलीयस्त्वव्याघातइतिनकर्मधारयेवृत्तिःकल्प्या। ननुचविशेषणविभ
क्तेरभेदार्थकत्वमतेव्याससमासयोःसमानार्थकत्वानुरोधादभेदलक्षणावश्यकीत्युक्तमितिवाच्यं। आहत्वा दे ५
नरइत्यत्रव्यभिचारेणतादृशनियमाभावात्। तदिदमुक्तमभेदस्यान्वयविषयेवभानोपपत्तेरिति। ननुराज
घ५ पुरुषइत्यत्रापिसंबंधलक्षणानुपपत्तिः व्याससमासयोःसमानार्थकत्वनियमानुरोधेनैवतत्कल्पनान्नामा
र्थयोरितिव्युत्पत्तिश्चसमासातिरिक्तस्थलएव। अन्यथासंबंधलक्षणायाऽनिर्वाहादित्यतआह। तत्रहि
ति। तत्पुरुषेहीत्यर्थः। पूर्वपदेराजपदेतादृशनियमाभावेपिसंबंधप्रकारकबोधस्यानुभवसिद्धत्वात्सं
बंधेलक्षणा कर्मधारयेतुनैवमितिभावः। ननुसंबंधप्रकारकानुभवस्त्वदुभयत्रापितुल्यः तत्रास्तिचेदु राम
भयत्रापिमास्त्वित्यनुभवेविवादइत्यतआह। संबंधिनिलक्षणेत्युक्तमितिव्युत्पत्तिसंकोचमानाभावा ७३

त्समासासैंमासयोः सर्वत्रापि नामार्थयोर्भेदेनान्वयाद्राजपदस्य राजसंबंधिनि लक्षणा नीलस्य चाभेदेनैवोत्पले ऽ
न्वयान्नानुपपत्तिविरोध इति न कर्मधारयेपि लक्षणाकल्पनमिति भावः ॥ न चात्पुरुषात्कर्मधारयस्य बलीयस्त्वमे
८१ वासिद्धमिति वाच्यं । निषादस्थपत्यधिकरणविरोधापत्तेः । तथा हि एतयैव निषादस्थपतिं याजयेदित्यत्र निषा
दः स्थपतिर्यस्येति बहुव्रीहिस्वीकारेऽभयपदलाक्षणिकत्वगौरवात् । तस्यान्तरपदलाक्षणिकत्वमतेपि
पुरःस्फूर्तिकप्रथमपदलाक्षणिकतत्पुरुषस्यैव लघुत्वादिति निषादानां स्थपतिरिति वा निषादश्चासौ स्थ
पतिश्चेति वा समासः तत्र षष्ठीतत्पुरुषस्वीकारे नामार्थयोर्भेदेनान्वयाभावेन निषादपदस्य निषादसंबंधिनि
लक्षणावश्यकत्वगौरवं । कर्मधारये तु न तदिति तदपेक्षया लघुत्वात्कर्मधारय इति सिद्धान्तः । तस्य च कर्म
धारयेपि लक्षणाकल्पनेऽव्याघातः ॥ ननु निषादस्यमेकरजातीयत्वेन तस्य यागोपयुक्तपूर्वविद्याप्रयुक्तिक
ल्पने गौरवं । एवं स्त्रीशूद्रेणाधीयतामित्यत्र संकोचकल्पनेऽपीति तदपेक्षया तत्पुरुष एव साधुः ॥ न चात्र शूद्र
पदस्य निषादेतरशूद्रपरत्वे न संकोचे निषादस्य वेदाध्ययनप्रसंगः ॥ अध्ययनपदस्य योगोपयुक्ताध्य

तर्क° १५

पनेतरपरत्वे च यच्छ्रोतरस्यापि यत्र योगोपपत्तावध्ययनसंसर्गगतिवाच्यो । विवेचतः यान्येतराध्ययनपदत्वाद
ध्ययनपदस्यत्वेन निषाददस्य यागोपपत्तौ वेदेतरवेदनिषेध ॥ श्रोतरस्य तु पावकदराशेरेवात्रस्य विशेषणा
प्राप्त्यभावादिति चेत् । मैवं लाघवात्कर्मधारयप्रवृत्तेरुत्तरम्पूर्वविधाप्रयुक्तिकल्पनस्य गुरुत्वेन न्याय्य
त्वात् तर्कितगौरवस्य चाप्रतिबंधकत्वात् कर्मधारये पि लक्षणाकल्पने तु तत्पुरुषापेक्षया लघुत्वाभावे
नापूर्वविधाप्रयुक्तिकल्पनगौरवप्रसक्तत्वेन तत्र कर्मधारयस्वीकारस्यानर्थकत्वं स्यादिति तत्र लक्षणा
नंगीकार एव साधुः । ननु लक्षणापि भावे पि कर्मधारय एव स्वीक्रियते न तत्पुरुष उत्पन्नबीजाभावकशक्ति
ज्ञानलक्षणाज्ञानयोः शाब्दबोधहेतुतायां विशेषाभावात् । न च मुख्यार्थपरत्वे संभवति लक्ष्यार्थपरताया
अन्याय्यत्वादिति न्याय एव शरणमिति वाच्यं । असति विशेषणे बाधके कर्मधारयविधेयैव वेदानो प्रा
माण्येन तत्पुरुषविधयापीति । मन्मते पि तु वचनात् तस्मात्कर्मधारये समासत्वेन शक्तेर्लक्षणापावा स्वी
कारे पि बलीयस्त्वमुपपादयितुं शक्यमेवेति चेन्न । यावत्संबंधरूपलक्षणाज्ञानस्य विना शक्तिज्ञानम
संभवितया शक्तिज्ञानादेव शाब्दबोधोपपत्तौ लक्षणाज्ञानकल्पने गौरवादिति वैदिकाः । शाब्दबोधस्य श राम १५

त न्वं ६

क्लिष्टज्ञानमूलकत्वेन लाघवस्यैव सिद्धांतबीजत्वादित्युक्तं पल्लवितेन। ननु पापि चित्रगुधनमित्यत्र बहुव्रीहिगर्भ स

तत्पुरुषस्थले बहुव्रीहौ लक्षणांतरं तत्पुरुषे लक्षणा स्वीकारे लक्षितलक्षणा स्वीकारापत्तिः। बहुव्रीहेरन्यपदार्थे

संबंधिनि अनुशासनाभावात्परंपरासंबंधेनैव लक्षणापानिर्वाहात् बहुव्रीहौ शक्तिस्वीकारस्यावश्यकत्तयास

मस्तत्वेन सर्वत्रैव समासे कल्पनमिति चेन्न। चित्रगुपदस्य बहुव्रीहिलक्षणापान्यपदार्थपरत्वे तात्संबंधिनिप न्वं ५

रंपरासंबंधेन तत्पुरुषलक्षणाभावेन लक्षणाद्वयापादेव युगपद[illegible]प बोधोपपत्तेः युगपद्वृत्तिद्वयविरोधस्य मिम्

चमणिकृन्मतेऽनंगीकारादिति। अघटपट इति नञ्तत्पुरुषे घट[illegible]न्नः पट इत्यत्र पबोधस्यानुभाविकत्वा

न्नञः संसर्गाभावमात्रवाचकत्वेन तत्र अन्योन्याभावत्वप्रकारकबोधस्यासंभवित्तया घटभिन्ने समासस्या

न ४ क्तिरिति मतं दूषयति न[illegible] तत्पुरुषेपीति। घटसंबंधिपरमिति। घटसंबंधिनि लाक्षणिकमित्यर्थः। संबंधि

स्यात्र प्रतियोगिकत्वं। अन्यत्र लक्ष्यस्यैव शाब्दबोधत्वात्तत्र शक्तिरिति भावः। कथं तर्हि अन्योन्याभावत्वप्र

कारको बोध इत्यत आह। नञ्पदस्येति। ननु संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थ इति संसर्गाभावत्व

अन्योन्याभावत्वं च शक्यतावच्छेदकमिति नञ्पदस्य नानार्थत्वकल्पनापत्तिः अन्योन्याभावेन लक्षणा

तर्क॰ वोचितः। अनन्यत्वमप्यस्यैव शब्दार्थत्वात् इत्यपि प्राप्येणाह। संसर्गेति। अत्यंताभावमात्रवाचकत्वे घटस्य प्रागभाव
१५ दशायां ध्वंसदशायां च कपाले घटो नास्तीति बुद्धेरनुदयप्रसंगात्। ध्वंसप्रागभावप्रतियोगिभिः त्रिभिः सहात्यंता
भावस्य प्राचां मते विरोधाद् अत्यंताभावविषयकत्वासंभवात्। अतः ध्वंसादिविषयकत्वमेवोपपेयं तथा च तात्साधा
रणापपसंसर्गाभावत्वेनैवेति। संसर्गाभावत्वं च संसर्गारोपजन्यप्रतीतिविषयीभूताभावत्वं ध्वंसप्रागभावदशा
यां कपाले घटो नास्तीति धीः ध्वंसादिविषयिणी। तत्र चोत्तरकालीनत्वविशिष्टसमवायः प्रागभावस्य पूर्व
कालीनत्वविशिष्टसमवाय ध्वंसस्य च प्रतियोगितावच्छेदकः संबंधः प्रसक्तो हि प्रतिषिध्यत इति न्यायात्
र। [illegible]ऽसत्ति पूर्वं उत्तरकालीनत्वविशिष्टसमवायेन कपाले घटस्याभावात्। तत्र तेन संबंधेन कपाले घटो
स्तीति संसर्गारोपानंतरं घटो नास्तीति बुद्धिः। एवं ध्वंसदशायां पूर्वकालीनत्वविशिष्टसमवायेन कपाले
घटस्याभावात् तत्र तेन संबंधेन कपाले घटोऽस्तीति संसर्गारोपानंतरं घटो नास्तीति बुद्धिः। अत्यंताभा
वे तु संयोगमात्रेणैव घटवत्तारोपाद् अत्यंताभावधीः। न चान्योन्याभावप्रत्यये तादात्म्यारोपस्य हेतुत्वं या राम
तादात्म्यस्यापि संसर्गत्वेनान्योन्याभावेऽतिव्याप्तिरिति वाच्यं। संयोगादिसंबंधवत् अभूरिप्रयोगात्। संयोगादि। १५

धेव संसर्गव्यवहारात् । तादात्म्यातिरिक्तत्वेन संसर्गस्य प्रवेशाधानं च तथापि नेत्याकारकाभावप्रत्यक्षत्वात् सामा
भाव लौकिकप्रत्यक्षे प्रतियोगिज्ञानहेतुताया आवश्यकत्वेपि प्रतियोगिमत्संसर्गारोपहेतुत्वे मानाभाव इति वा
च्यम् एकदा नानासंबंधावच्छिन्नाभावप्रत्यक्षत्वावारणाय तत्तत्संबंधावच्छिन्नाभावप्रत्यक्षे तत्तत्संसर्गारोपस्या
पि हेतुत्वात् । न च ध्वंसप्रागभावयोः प्रतियोगितावच्छेदकसंबंधमानाभावेन कथं तत्प्रत्यक्षे प्रतियोगिसं
सर्गारोपस्य कारणत्वमिति वाच्यं । अनुभवबलेन प्रतिबध्यप्रतिबंधकभावानुरोधेन चात्यंताभावस्येव तयोर
पि प्रतियोगितावच्छेदकसंबंधांगीकारात् ॥ तथाहि ॥ अत्यंताभावस्येव ध्वंसप्रागभावयोरपि ज्ञानदशा
यां तत्कालावच्छेदेन प्रतियोगिमत्ताज्ञानानुरूपात् समवायेन तद्घटवत्ताज्ञाने प्रतितद्घटत्वावच्छिन्नप्रतियोगि
ताकात्यंताभावप्रागभावादिमत्ताज्ञानवत् दृष्टिना प्रतिबंधकत्वं न पमपद्रूपत्समवायेन तद्घटत्वावच्छिन्नप्रतियो
गिताकाभाववत्ताज्ञानत्वेनैव प्रतिबंधकतया ऽत्यंताभावस्येवा तयोरपि संबंधावच्छिन्नविशेषधर्मावच्छि
न्नप्रतियोगिताकत्वस्वीकारात् । न चाव संसर्गाभावत्वेन जन्यशक्यतावच्छेदकेन चान्योन्याभावत्वस्येव तया
ऽस्तामिति वाच्यं । सामान्यपदार्थान् इतिन्यायेन ध्वंसप्रागभावादिसाधारणात् यासंसर्गाभावत्वस्येव तया

नं ३

त्वात् न तु घटः पट इत्यादौ सामानाधिकरण्यानुरोधात् अन्योन्याभाववत्तिलक्षणया अन्योन्याभावे शक्त्या नञः प्रयोगा भावात्र
नञा चैत्रो न पचतीत्यादौ चैत्रस्य भूतलेन घट इत्यादौ मन्मतेन नञो मुख्यार्थता तेभ्र वादिस्याश यः । लाघवेन ति
संसर्गाभावत्वं संसर्गारोपजन्यप्रतीतिविषयाभावत्वमिति तदपेक्षया तत्प्रतियोगित्वेनाऽभावस्यैव लघुत्वेना
भ्युपगन्तुं शक्तिरिति भावः । ननु संसर्गाभावत्वेन संसर्गारोपजन्यप्रतीतिविषयाभावत्वे । संसर्गारोपस्याहि
अनाहार्यस्य हेतुत्वेऽनाहार्यबाधबुद्धेः प्रतिबन्धकतयाऽभावप्रत्ययानुपपत्तिः । आहार्यस्य च तस्याहे
नीबाधाभावेनासंभवः । बाधकालीनेच्छाजन्यज्ञानस्यैवाहार्यत्वात् । पदिच्छबाधकसामग्रीकालीनस्या
प्याहार्यत्वमिति मन्यते तत्राप्यभावलौकिकप्रत्यक्ष एव प्रतियोगिसंसर्गारोपस्य हेतुतयाऽतो द्विषाभा
वे व्याप्तिः । न च संसर्गावच्छिन्नप्रतियोगिकाभावत्वं तत् तादात्म्यसंयोगान्योन्याभावेति व्याप्तेः । संयोगिता
दात्म्यस्य संयोगरूपत्वेन तस्यापि संसर्गावच्छिन्नप्रतियोगिताकत्वात् संसर्गतया तादात्म्यतया वावच्छे
दकतायैव लक्षणे दुर्वचत्वात् तादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वेनान्योन्याभावत्वं संयोगसंबन्धावच्छि
न्नप्रतियोगिताकसंयोगात्यन्ताभावेतिव्याप्तेः । संयोगितादात्म्यस्य संयोगरूपतया तादात्म्यावच्छिन्नप्रति

ध्वोधान्तवर्णस्येवास्वादेरपि प्रतीत्यापत्त्या अभिधया नानार्थकविषयकशाब्दबोधजननीये प्रकरणादिकं सह
कारि अवश्यं वाच्यमिति भावः। प्रकरणादिशून्येति। गमनादिप्रकरणशून्याश्वादिरूपार्थान्तरमित्यर्थः। त
न्नेऽर्थान्तरप्रत्यये अभिधाशक्तिः सहकारीति। प्रकरणरूपसहकार्यभावादित्यर्थः। लक्षणामूलामित्यनु
षज्यते। अयोगात्। मुख्यार्थान्वयानुपपत्त्या हि लक्षणा कल्प्यते। प्रकृते च तदसत्त्वेन न लक्षणेति भावः।
आर्थः अर्थान्तरप्रत्ययानुरोधेनान्यथाचलत्वात् प्रतीत्यर्थं व्यंजनारूपवृत्त्यन्तरमावश्यकमिति भावः। नानार्थ
स्थले। र्थान्तरप्रतीतिः॥ शक्तेर्वनच प्रकरणाभावेन सहकार्यभाव इति वाच्यं तस्य सहकारित्वासंभवादि
ति न वृत्त्यन्तरमिति समाधत्ते प्रकरणादीनामिति। सहकारित्वेति। नानार्थकविषयकशाब्दत्वावच्छिन्नं
प्रति प्रकरणादीनां व कारणता अननुगमेन व्यभिचारादित्यर्थः। तत्तात्मकानां नामप्यनुगमेऽपि ता[illegible]पं अ